247

गीत गोविंद with ~~टीककल्लोलिनी~~ रसकदंबकल्लोलिनी टीका

	: Gita	: Govinda with Rasa Kadamba	: **Title**
	:	: Jayadeva	: **Author**
	:	:	: **Editor**
	:	: Saka 1718	: **Year, Vols.**
	:	:	: **Publisher**
247	:	: -kallolini Tika of भगवद्दास।	: **Remarks**

॥श्रीगणेशाय नमः॥ ॥श्रीराधावल्लभो जयति॥ ॥अनादिसंसिद्धश्रीलावृंदावनविहारिणा॥श्रीजयदेवमुख
द्वारा रसिकेषु प्रकाशिता॥१॥ संभ्रांतो राधिकायानयनविलसितैर्विभ्रमभ्रूविलासैः किंचित्क्रांतकांतैः कन
कनिकषवत्स्वद्मं मुग्धहासः॥ विश्रांणो मंतु केलीर्मधुरमधुरया राधया कृष्णचंद्रः कंदर्पाक्रांतवक्षो जयति
वृंदावने वृंदयालक्षितो सः॥२॥ इह रवकुसुमकलनववल्लवीवृंदवदनेंदीवरनाथनमधुरमूर्तिः श्रीवृंदाव
नेश्वरीस्तनकुड्मलमकरीविरचनरचनाकलितकरकमलानंदकंदलितमकरध्वजादेशाचलितयोः श्रीम
त्कालिंदीतटसंनिधिमाधवीव्रततिस्फुरत्कुसुमकदंबसौगंध्यलुब्धसंचरीकपटलीध्वनितकलमाधुरीमु
[illegible] विधनिकुंजमंजुलद्रुमवनवने ऽवलंबिनी कंदर्पकोटिलीलारसजलधिमग्नहृदय
वृंदावनकिशोरीकिशोर[illegible]रत्नचूडामण्योः राधामोहनयोः मम तत्तज्जनकृत्यं केलिमहानंदसंवर्द्धिनी विहा
रमाधुरीत[illegible]पयैव वर्णयितुं श्रीमज्जयदेवनामा कविरिष्टदेवतास्मरणलक्षणं मंगलमाचरति॥ मेघैरि
ति॥ तत्रायोग्योप्यन्यं जनस्तद्गुणगतत्वेनैव व्याचष्टे॥ जयंति सर्वोत्कर्षेणवर्तंते॥ प्राकृताप्राकृतेभ्योपीद
स्वरूपयोरतिरेकात्॥ उक्तं च॥ कृष्णस्तु भगवान्स्वयमिति॥ कास्ताः रहः केलयः॥ सुरतक्रीडाः॥
उद्य[illegible]केऽयमेकांत[illegible]तिच॥ सजाता विजातीयेभ्योऽपि एकांतत्वेन राधया सह[illegible]
सुर[illegible]निरूपितः॥ [illegible] विहायगोप[illegible] [illegible]इति॥ अथवा॥

प्रकरणवशात्कस्मिन्नसति॥ रहः एकांते सति॥ एकांतात्स्थैर्येद्वयोः व्ययंइति॥ सखीभिरपि किंचिद्यवधानस्थित त्वा
त्॥ वद्वति॥ यान्तेगेहाद्दहिरवहिताली परिजनइति॥ जयंतीत्यनेन नमस्कारायत्वमुक्तं॥ तेन नमस्क्रियया
याकाव्यमुखं द्योतितं॥ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति॥ भगवतीदंष्ट्राग्रीवादिनृपं
मंगलं तत्र प्रेमैव संगच्छतो परमकल्याणरूपत्वात्॥ केलय इत्यनेन कथालक्षणं वस्त्वपि निर्दिष्टं॥ एवं
महाकविनात्रिविधमपि काव्यमुखं समुन्मीलितं भवति॥ जयतीत्यनेन वर्तमाननिर्देशात्केलीनां नित्य
त्वं प्रतिपादितं॥ केलय इत्यनेन बहुवचनेनानंतत्वं च दर्शितं॥ कैर्वेश्च लीलोपासनया परमैकांतिकत्व

मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय॥ इत्थं नंद
निदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः॥१॥ ॥

स्फुटमेव॥ तासांस्थानानि दर्शयंति॥ क्व यमुनाकूले॥ यमुनायाः कूलं तत्र॥ प्रत्यध्वकुंजद्रुमं॥ अध्वानश्च कुं
जाश्च द्रुमाश्च अध्वकुंजद्रुमास्तान्प्रति॥ लक्षणेनाभिप्रती इति समासः॥ अध्वनि कुंजे कुंजे द्रुमे द्रुमे इत्यर्थः॥
अनेन महाविलासित्वं कथितं॥ तदुक्तं॥ चापल्यसीमेति कर्णामृते नथा च॥ अधादिषु केलयो यथा॥ क
स्याः [illegible]॥ एतानि यातायोनंदसूनुना॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा॥ न लक्षं तेपदान्य
[illegible]र्यते प[illegible]वे[illegible]॥ निश्च[illegible] मन्निन्ये प्रेयसी प्रियः॥ इमान्यधिकमग्रानि[illegible]वहेनो

२१० १२ तत्केऽस्य नास्कांतस्य कामिनः॥ अत्रावरो पत्... ...त्र प्र
२ स्तनादेयं प्रियार्थे प्रेयसा स्कृतः॥ प्रपदाक्रमणेन तेषु रूपतास कल्पेपदे॥ केत्र भसाधनं तत्र कामिन्याः कामि
नाकृतं॥ तानिरूद्रयताकांतामुपविष्टमिह धकमिति॥ श्रीभागवते॥ अथवा॥ प्रियसखिपरिरंभणाभिमुखा
नुवंधादसद्भावविनिवेशनान्नमलीव्योम्नितानि॥ इयमविषमंदन्यास तो जल्पगोष्ठी पदलतिरिह राधा कृत्स्न
यो रातनोति॥ मनोहारी हारस्खलितमलि निस्तार तरलैः परिह्वाय न्मात्वो मिलितपुरटा लंकृति कणः अयं कुं
जस्तव्या कृतकुसुमपुंजप्रणयवानु समंतादुत्तुंगं पिशुनयनि रंगं मुरनिरमिति॥ यमुनाकूलजस्तनेन संनो
गश्रमहरणाय शिशिरसमीरपस्याद्युवचर्यं जलकेली नां इत्यादि संपत्ति र्दर्शिता॥ कयोः राधामाधवयोः॥ रा
धमाध संसिद्धा वितिराध्यते साध्यते संसिद्धिं प्राप्यते स्व सौंदर्यादिगुणेभ्यात्र नायक शिरोमणे राकांक्षितमन
येति सा राधा॥ अथवा॥ राध्यते साध्यते वशीक्रियते स्वासाधारणानुरागमाधुर्यकौशलेनाशेषनायक चूडा
मणिरनयेति सा राधा॥ तथा चोक्तं॥ अनयाराधितो नूनं भगवान्हरिरीश्वर इति भागवते॥ अनेन नाम्नैवाशे
षनायिकगुणाः कथिताः॥ मां श्रियं त्रीनो वैकुंठेश्वरीं वा धुनोति निजसौंदर्यादिगुणैः कंपयंति स्व प्रवणां करो
तीति माधवः॥ धूञ् कंपने॥ पचाद्यच्॥ यथा हलीनाशुक॥ यस्याद कल्पनरुपल्लवशेखरे षुलीलास्वयंवर २
संपन्नतेजयश्रीरिति॥ लीलया शृंगाररसविक्रमेणाजयश्रीः सर्वाति नायिनी त्रोभेति॥ अथवा॥ जयस्या वि
ष्णोः प्रसिद्धा महिषी॥ जयोभर्त वक्षसि नित्यमेव स्थितिलक्षणा सो नाम्यो कथस्तिनूयुक्तेति वा॥ उक्तं च॥ ॥

श्रीर्यस्य दांबुनरजश्चकमेतु तस्या लक्ष्म्यापि वक्षसि पदं किजन त्वनुष्ठमिति॥ यदाख्याश्रीलक्ष्मीनाचरन्तपो
श्रीर्मायाः सौंदर्यादिगुणसंपन्नेः धवः पतिर्माधवः॥ धवः पतिः श्रियो
विहाय कामानसुचिरं धृतव्रतेति॥ अथवा॥ मायाः सौंदर्यादिगुणसंपन्नेः धवः पतिर्माधव॥ धवः पतिः श्रियो
नत्तैर्ल्यनिधानात्॥ मधोर्मधुवंश्यो नवो माधव इति वा॥ वामधोर्मधुररसेन वो माधवः॥ वकृतिच॥ शृंगारः सखि
मूर्त्तिमानिवेति॥ मधौवसंते नवो माधवः स्मर इति वा॥ तत्र नव इति स्तन्त्रेणाप्य॥ इत्युक्ति इति गुणः॥ तथा चो
क्तं॥ साक्षान्मन्मथमन्मथः॥ स्त्रीणां स्मरो मूर्त्तिमानितिच॥ एभिर्व्याख्यानैर्नायिकस्य गुणाः कथिताः॥ राधा च
माधवश्च राधामाधवौ तयोः॥ तथा॥ जस्या कामयमानो पि श्रीराधायामासक्तो वन्वेति॥ तस्याः स्वनिपातश्च
अल्पस्वरमिति वा॥ आस्तिककामुकोयं नायकश्च॥ तदुक्तं॥ रूपामां परस्त्रियं प्राप्यतुंव नालिंगनादिभिः॥
नवांश्च जनयेद्भावानुत्सस्याद्धृष्टिककामुक इति॥ केचित्तु श्रियाविनाभगवतः क्रीडासंभवादिति गोपीषु ल
क्ष्मीत्वमापादयंति॥ तत्तु रुक्मिणी कृष्णजन्मनीति॥ तस्यास्तस्याः पृथक्निर्देशात्॥ नायं श्रियोंगउनितां
तरतेः प्रसाद इति निषेधाच्च न संगच्छते॥ किंच॥ मूलप्रकृति रुक्मिणी त्युपनिषद्वचनात्॥ रुक्मिण्याः प्र
णत्वमवगम्यते॥ ततो पि गोपीनां नावाधिकाश्रवणात्॥ तत्रान्नोकनीयमिति॥ तद्यथा॥ तद्भावमापुरिति
नित्ययुक्तां दुरापमिति॥ नित्ययुक्तांपाति व्रत्यविधानेन नित्ययुक्तानां महिषीणामित्यर्थः॥ अन्यच्च॥ यद्यपि
नित्याद्वितीयवत्त्वेनो राधामोहनोतथाप्यनेन पारकीयत्वात्तासेन शृंगाररसस्य प्रतिष्ठाध्वनिता॥ तदुक्तं॥
वक्रवार्यते यतः खलु यत्र प्रछन्नकामुकत्वं च॥ याच मिथो दुर्लभता सा परमा मन्मथस्य रतिरिति॥ ४

नरत्तः॥ वामतां कुर्वतिं तं च स्त्रीणां याचनिवारणा॥ तदेव पंचबाणस्य मन्ये परममायुधमिति॥ रुद्रः॥ शृं
गारतिलके च॥ अनन्यनारगणा स्वीयाधनहारी परांगना॥ अस्याश्च केवलं प्रेम ते नैषा रमिणीमतेति
॥ किंलक्षणयोः राधामाधवयोः॥ इत्थं वक्ष्यमाणप्रकारेण नंदनिदेशाच्चलितयोः लोकानुसारतस्तुष्ट
ष्टानंदनिदेशात इति॥ कदाचित्॥ श्रीकृष्णः संबंधयोगेन स्वसंकोच्यव्यवहारादस्मात्ः संगमस्तदसे
चस्व व्रजेगोदोहनाय मानीतः॥ तस्मिन्नेव समये तन्निकटे श्रीव्रजेश्वरस्यागमनं जातं॥ तत्र प्राणकोटि
प्रियपुत्रमेवागमं चरह्नाघ्राणयकोपोक्तान्॥ देवत्वमेहे राधे यतस्त्वयायमानीतस्तस्मात्त्वमेवैनं मंदिरं त्व
त्वं प्रापयेति वचनोपक्रमेणैव तन्निदेशात्ः स्वानीतेऽस्मिन्नेव विलंबे नैव कदाचित् क्रीडाप्रतिबंधकं च न त
नं प्रस्थापनाय दास्यतीति चलितयोः॥ मेघैरित्यादि॥ कालिंदेत्रासंपन्नोद्दीपिताः केलयो यमुनायाः कूले ऽ
धकुंजकुंजं प्रतिजयंतीति मेघादीनां श्रीव्रजेश्वरदृष्टौ वनयानकहेतुत्वं तयोः रसिकशिरोभूषणभूत
योस्तु शृंगारहेतुत्वमेव नित्यं॥ तथा च लोके प्रसिद्धिः॥ श्रीवृषभानोर्गवां कृष्णवत्सपालानां दोहने श्रीकृ
ष्णः करोति॥ भगवत्प्रियाणां श्रीव्रजेश्वरस्य गवां दोहः श्रीरामादीनां क्रियत इति॥ केचित्तु नंदनिनाम्नी
काचित्सखी तस्याः देशात्ः वचनादिति व्याख्यानं कुर्वंति॥ तत्र ग्रंथेष्वप्रसिद्धानामकल्पनया नानया
नस्वीकारः॥ ग्रंथानुसारीत्वयमित्यर्थः॥ नंदयतीति नंदः॥ नंदिगृहपचादिभ्यो ल्युणिन्यचः॥ इति वकु
लोक्तेरत्र इति॥ नंदश्चासौ निदेशश्च आनंदकारिनिदेशाः॥ स्वामीष्टक्रीडायां प्रेरणात्॥ कस्माच्चिद्रा

धायाः प्रियसहचर्य्यानिष्पन्नं नर्मोक्तिस्तस्मात्॥ सख्या रसपोषकत्वात्॥ तल्लक्षणं यथा॥ स्वात्मनोप्यधिकं
प्रेम कुर्वाणा यान्योन्यमच्छलं॥ विश्रंभिणी वयोवेषादिभिस्तुल्या सखीमता॥ मिथः प्रेमगुणोत्कीर्त्तिस्तयोरास
क्तिकारिता॥ अभिसारो द्वयोरेव सख्याः कृष्णे समर्पणं॥ नर्माश्वासनं नेपथ्यं हृदयोद्घाटपाटवं॥ छिद्रसं
वृत्तिरेतस्याः पत्यादेः परिवंचना॥ शिक्षासंगमनं काले सेवनं व्यजनादिभिः॥ तयोर्द्वयोरुपालंभः संदेशप्रे
षणं तथा॥ नायिकाप्राणसंरक्षाप्रयत्नाद्याः सखीक्रिया इति॥ चलितयोः॥ तमेव प्रकारमाह॥ हे सखि रा
धे नन्वस्माद्धेतो रिमं त्वन्मुखचंद्रनिहितेक्षणचकोरं त्वमेव गृहं प्रापय क्रीडानिकुंजं प्रापयेत्यर्थः॥ अखिल
लोकपास्मरत्तेन गृहमित्युक्तं॥ तेन च संभोगसंपत्त्याएवैनं सुखयेति गूढाभिप्रायः॥ त्वमेवेत्यन्ययोगो निराकृतः
अथवा॥ गृहं प्रापयेति॥ सामान्यनारीव्यावृत्त्या गृहिणी निर्वर्त्यसंभोगादि कर्म्मणि समुदितानवेत्यर्थः॥
अत्र गृहशब्देन तात्स्थ्यात् गृहिण्युच्यते॥ गृहशब्दच्छलेन तामेव पुरस्कृत्य वनविहारदर्शनात्॥ प्राप्नोति
रुदयार्थे वित्तेति॥ पारानोदय युक्तिक्षितिचूडामणिः॥ एवकारोऽन्ययोगव्यावृत्त्यर्थः॥ तयैवाथवा यं गृहिणी
मात्रस्यादिति सख्याः गृहपरिहासनमिति॥ कृष्णकर्णोक्तिः॥ तस्मादिति॥ कियत्तोयं तवाधीनो यतोयं तवाधी
नो ज्ञानोऽभीरुः मदनवेपितः॥ एवं विधे हि तुभिः स्मरत्राहतोः सोढुमसमर्थः॥ अत्र नक्तं भीरुरिमं गृहं प्रापयेत्य
त्रेदमोरत्न देशोद्दितीयाहोस्वेन इति सूचेणएनादेशः कथं न नैव तातिन वाच्यं॥ अवादेशविषयतो नावात्
एकक्रियाविशिष्टेन कथितस्य पुनः क्रियांतरविशिष्टत्वे कथं नमन्वादेशः॥ इहतु नक्तं भीरुरित्यनेन भीरुत्व

गी.टी. विप्रलब्धतया निर्दिष्टे माधवस्वरूपेण पुनः क्रियावैशिष्ट्यं प्रतिपाद्यते॥ ततः क्रियांतरविशिष्टत्वात्तावान्नेहौ त्वादेशः
४ तानेव भावानाह॥ अंबरमाकाशं मेदुरं सांद्रं स्निग्धं भवन्ति॥ अपरं च तमालद्रुमैः वनभुवः श्यामाः भवंति॥
नक्तं रात्रिकालः॥ एवं देशकालवस्तुलक्षणादिभावाः सूचिताः॥ तथा च तद्भावानां श्यामत्वेन शृंगाररसता
दात्म्याच्छृंगाररसस्वरूपत्वं ध्वनितं॥ उक्तं च॥ श्यामो भवति शृंगार इति॥ किंच वनभुवः श्यामा इति॥ नायिकास
हचर्यं॥ तमालद्रुमे मे विश्वनाथकस्येति॥ तथा चोक्तं॥ प्रेमप्ररूढ उदितः कुसुमावलिभिः सखुर्यधात्त्वव पु
घांबुदश्चातपत्र इति॥ विमुक्तं भवति॥ अत्र काव्ये शृंगारप्राधान्यात्तस्यैवालंबनोद्दीपनविभावाः॥ राधामा
धवालंबनविभावाः॥ भीरुरित्यनुभावः॥ हर्षवेगशंकौत्सुक्यक्रीडाजल्पनादयो व्यभिचारिणः॥ उक्ता भवंति
॥ एवं कारणकार्यसहकारिभिरिति स्थायिभावः॥ सकलरसराट्स प्रपंचः संयोगाख्योऽभिलाषेर्ष्यास्त्रियाध
सर्णी विप्रलंभाख्यश्च शृंगारः सांगोपांगः समुन्मीलितो भवति॥ तदुक्तं॥ कारणान्यथ कार्याणि सहकारीणि
यानि च॥ रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः विभावानुभावास्तत्कथ्यंते व्यभिचारिणः॥ व्यक्तः
स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः॥ तथा भारतेन॥ विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरि
ति॥ एवमेव कविना रसमुख्ये स्थिरीकृते तदा श्रायमबुधाकेश्चिन्नायकस्यात्रिष्ठत्वं नायिकायाः प्रौढत्वं शृं
गारविभावानां भयानकहेतुत्वं पितुश्चानिदेशादृतिपितुश्च दूतित्वं स्माकृतं॥ तदा कविनिरूपितस्य रसस्यान्य
थात्वमुपपद्यते॥ तेन पूर्वव्याख्यानमेव समीचीनं॥ अथवा॥ निदेशो नाम रणादेशः सामीप्यार्थे विभक्तिः॥ इति

नंदनिदेशातः नंदसमीपान्नंदनिदेशातः व्रजाद्या॥ अथवा॥ उभयोः संगमो जातस्तदेवाह्लादकारी श्रीवृंदावनांत
रदेशाविशेषस्तस्मात्त्वक्षचतु एवेः पि कृष्णो केरतुचलितयोरित्यर्थः॥ तत्र कातर्येण सा छलात्संबोधयति॥ हे
राध इति॥ इमं मद्रक्षणं जनं॥ अयं मद्रक्षणो जनो भीरुस्त्वया श्वस्य कुमसमर्थ इति॥ अत्रानुकूलो नाय
कः स्वाधीनपतिका नायिका॥ तयोर्लक्षणं वक्ष्यतेऽग्रे॥ पूर्वार्द्धेऽभिसारिकालक्षणो विप्रलंभः॥ अपरार्द्धे संभो
गश्च शृंगारः॥ अथवा श्रीराधां नंदयतीति हर्षयतीति नंदः श्रीकृष्णः नंदश्चासौ निदेशश्च नंदनिदेशः तस्मा
तू॥१॥ कविरिदानीं सकलरसज्ञजनमनोहारिहरिचरितानुवर्णनेन समुचितेष्टदेवतानावितांतःकारणः

वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती॥ श्रीवासु
देवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधं॥ ॥२॥ ॥

शृंगारोत्तरं प्रबंधं कर्तुं प्रतिजानीते॥ वाग्देवतेत्यादि॥ जयदेवकविः जयः श्रीकृष्णस्तं द्योतयति महाभाग्य
वतां तद्रहस्योपासने प्रवर्तकत्वेन प्रकाशयत्यसौ जयदेवस्तेन प्रकारेण मानो वा॥ अत एव कविः॥ अथवा॥
जयश्चासौ देवश्च जयदेवो भगवान् स्वयमेवास्मिन् ग्रंथे जयदेवव्यपदेशेन कविरित्यर्थः॥ जयेन श्रीराधिकावि
जयेन दीव्यतीति जयदेवः स चासौ कविश्चेति वा॥ एवं गीतगोविंदाख्यं प्रबंधं प्रकर्षेण बध्यतेऽस्मिन् श्रीकृ
ष्णो हृदयमिति प्रबंधस्तं करोति॥ तत्र हेतुगर्भं विशिनष्टि॥ कीदृशः॥ श्रीवरांगना राधा॥ अथवा॥ श्रीत्रसे
वायां॥ क्विब्वचीतिघित्रादी दीर्घोऽसंप्रसारणं च॥ श्रयतरुणतां कृष्णो रामाश्रयमिति श्रीः॥ श्रीयतश्रनेनेति वा सा

श्रीः राधेव॥ वसुषु दीव्यतीति वसुदेवो नंदः उक्तं च॥ द्रोणो वसूनां प्रवर इत्यादि॥ वसुभिर्दीव्यतीति वा॥ तस्या
पत्यं वासुदेवः कृष्णः अनेन धनाढ्य इति नायकगुणः कथितः॥ अथवा॥ वस निवासे वसत्यस्मिन् हृदये वने श्री
राधागुणो वा इति वासुः॥ अथवा॥ धातूनामनेकार्थत्वात्॥ वासयति सर्वमिदं स्वविलासपरिमलेनेति वा
सुः॥ उणादिक उणप्रत्ययः॥ स चासौ दयादिगुणैर्दीव्यतीति देवः॥ द्योतयति सर्वमिदमिति वा॥ स्वविलासेन प्रि
यजनानानंदयतीति वा॥ ते हर्षवानिति वा देवः॥ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांति
गतिष्विति॥ विलासवान् गुणवान् सर्वातिशायिशृंगारवान् मोदमांश्चेत्यर्थः॥ वासुश्चासौ देवश्च वासुदेवः॥ त
योः श्रीवासुदेवयोः रतिकेलिकथया सुरतक्रीडानुवर्णनेन समेतं युक्तं॥ रतिरनुरागस्तेन केलिर्युवत्योर्नागर
योः संवादस्तत्सहितमिति वा॥ ननु तयोरद्भुतानुरागिणोः श्रियादिभिर्दुर्विनिवर्त्यलीलापरत्वेन कथमक्षिकारस्त
त्राह॥ किंलक्षणः कविः॥ वाक् चासौ देवता चेति॥ वाचां देवतेति वा॥ वाग्देवता परा सरस्वती तस्याश्चरितेन
प्रसादमाधुर्यादिगुणसंपन्नलोकोत्तरकाव्यरचनाविशेषरूपेण चित्रितं चित्ररूपं सद्म यस्य तादृशः॥ अ
त्र विचित्रनगवद्गुणवर्णनेन विचित्रकवितारूपमहाधननिधानत्वेन समस्तरसिकजनविश्रामसुखाश्रयत्वे
न च चित्रसमृद्धसाम्यं॥ अथवा॥ यतो वाचो निवर्त्तंत इति श्रुतेः॥ तदगोचरत्वादयमर्थः॥ वाक् वर्णनीयतन
गवद्गुणरूपा वाणी सैव परमपुरुषार्थत्वेनेष्टदेवता तस्याश्चरितेनाविर्नविनतित्वानंदरूपत्वात् विचित्रं
आश्चर्ययुक्तं कृतं चित्रमेव सद्म गृहं यस्य तादृशः॥ वाक् परा सरस्वती तस्याः देवता सर्वेश्चिमत्वेन सर्वोपास्य
तया श्रीराधाप्रियस्तच्चरितेन विलासेन चित्रितमालेख्ययुक्तं कृतं। चित्रं सद्म चयस्येति वा॥ अपरमपि दृढं
विविधालेख्यैर्मंडितं नवनीति ध्वनितं॥ तथा चास्य गृहमपि भगवता साक्षाद्दावित्वेन परमगोप्यमपि स्वहस्त
लिखनेन च मंडितमिति भागवतैः प्रसिद्धं॥ ननु कथं तादृशं प्रसादभाजनत्वमस्येत्यत आह॥ पुनः कीदृशः
पद्माकरस्य स्याः सा पद्मावतीति शरादीनामिति दीर्घः॥ सर्वसौभाग्यलक्षणान्विता श्रीराधा पद्मा भगवद्वशीकर
णकांतिविद्यिनेयस्याः सा पद्मावतीति वा॥ तस्याश्चरणयोश्चारणेन परिचर्यया च क्रवर्त्तीसिवधिकः॥ तेन ता
दृशप्रसादपात्रत्वमित्यर्थः॥ अथवा॥ चरणयोर्विषयभूतयोरेव चारणे च क्रवर्त्ती विचित्रकिश्रेष्ठः॥ नृत्यादिना
सदा तत्सदा राधनपरः॥ अथवा॥ पद्मावती तस्य जीला तस्याश्चरणयोर्यच्चारणं नर्त्तनं तेन चक्रवत्तिंतुंशी
लमस्यासौ तादृशः॥ एतेन नत्यज्ञाधिकं कवेः सूचितं॥ यथाह॥ तद्योगयुक्ता हि गणयंति न लौकिकमिति
॥ लौकिकश्चायमर्थः॥ चरणयोश्चरति परिचरतीति चरणचारणः॥ पद्मावत्येव चरणचारणचरणासेवि
कायस्य स चासौ चक्रवर्त्तीसु ख्यश्च स इति॥ तस्य शृंगारित्वं कथितं तेन च सरसकाव्यकरणेऽधिकारः॥ उ
क्तं च॥ शृंगारी चेत्कविः काव्ये जातं रसमयं जगत्॥ स एव चेदशृंगारी सर्वं विरसतां व्रजेदिति॥ आजेरव्याश्च
र्ययोश्चित्रमित्यमरः॥ वारणास्तु कुशीलवा इत्यपि॥ कविः काव्यश्च रावितिविश्वः॥ २॥ यदीत्यादि॥ हेस
ज्जनगण यदि हरिस्मरणे कृष्णानुचिंतने मनः अखिलभुवनयुवतिचित्तचोरे न्यविगृहव्याहृत्याश्रीम
त्कमनीयकिशोरव्रजेंद्रनंदने नक्तिरित्यर्थः॥ उक्तं च॥ गोविंद एव निखिलात्मनिरूढ तावादिति॥ किंच॥
नक्तिरस्य ततनंतदिहामुत्रोपाधिनैराशूर्वमेवामुष्मिन् मनः कल्पनमेतदेव नैष्कर्म्यमिति तापिन्यां॥ तत्रा
पि सरसं रसः शृंगारस्तत्सहितं॥ यदि च विलासकलासु विलासः स्त्रीणां भगवत्संबंधिनां राधादीनां हावभावि

गी०टी० शेषस्तत्संबंधिनीषु कलासु क्रीडासु कुतूहलं कौतुकं॥ नाकाजिकौविश्रोपस्कविलासोंगक्रियादिष्विति॥ तदु
६ क्तं॥ स्खलति बकुलं पादन्यासे विलोकितमन्यतः स्थिरमपि तदंतोर्जं मयाति विधूननं॥ स्मितमपि सुधा व्यर्थः॥
क्रोधे हर्थे च चमत्कृतिदर्पितसविधं यांत्यासत्वा विलासरसोप्ययमिति॥ एतेन भगवत्यारिजनेषु भक्तिरुच
ते॥ कलासा चतुःषष्टिकलायांकलासा क्रीडनादिष्विति विश्वः तदा जयदेवकवेः सरस्वती वाणी शृणवाकर्णयि
त्वर्थः॥ अथवा॥ देवाः ददतीतिदा नेन पुण्यातिशयवंतः शृणुत अत्यादरेण वधारयत॥ कलासु च
तुःषष्टिरूपासु॥ चतुःषष्टिर्नेबं॥ हसितं गीतं पठितं नर्तितं नृत्यं तथा॥ वीणावेणुवाद्यं तालः सुस्तकत्ता

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलं॥ मधुरकोमलकांतपदावलीं शृणु तदा जयदेवसर
स्वतीं॥३॥

नमायुधोवेरः॥१॥ धनुर्वेदश्च शिक्षा च राजशिक्षा च रत्नयोः॥ शिक्षा कल्पो व्याकरणं छंदो ज्योतिर्निरु
क्तिकं॥२॥ परनाथा पुराणं च स्मृतिरामायणं तथा॥ महाभारतमाख्यानं राजलक्षणवेदनं॥३॥ नियुद्धयु
द्धोत्तरणं नूतं तंत्रग्रहे लिंकासप्पशीविषसंशोधो नूमिद्धीष्टसाधनं॥४॥ शाकुनं गीतयोज्ञानं तथाप्याप
कर्षणं॥ चिंतानिवर्त्तनं पुष्टिवर्त्तनं पिंडकर्षणं॥५॥ देशनाषापरिज्ञानं धुंनांगीकरणं तथा॥ विक्षेपणं चा ६
टनं चैवमणिवस्त्रादिमंडनं॥६॥ विकल्पोच्चारकरणं विचित्रकरमर्द्दनं॥ जिखितं चित्रकविता राजनीति
स्तथापरा॥७॥ सनायादित्यवन्त्वं दुर्गसेनादिवीक्षणं॥ अंगसंवाहनं चाक्षदर्शनं चौरलक्षणं॥८॥

प्रमार्द्दनं तुरुष्कस्य स्त्रीचित्तहरणं तथेति॥ कीदृशीं जयदेवसरस्वतीं॥ मधुरकोमलकांतपदावलीं॥ शृंगार
रसप्राचुर्यान्मधुरा॥ रीतिवोधकत्वात्कोमला सुकुमारा॥ गेयत्वात्कांता कमनीया मधुरा चासौ कोमला
चासौ कांता च परंपरा यस्याः सा तादृशीमित्यर्थः॥ तत्र मधुरा यथा॥ मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः॥ येन मा
द्यंति धीमंतो मधुनेव मधुव्रता इति दंडी॥ सुप्रयोगे महिष्ठं दे युक्तिमत्स्पष्टसंधिनि॥ सुकुमारार्थसंयुक्तं सुकुमा
रं प्रचक्षते॥ इति लीलारविंदे॥२॥ यन्मनःश्रोत्रविश्रांतं प्रकाशात्मकं भवेत्॥ शब्दबंधानुयोगेन तत्कांतमि
ति कीर्त्तितं॥३॥ तथा च मधुरत्वं द्विविधं॥ शब्दाश्रितमर्थाश्रितं च॥ तत्र शब्दमधुरत्वं पृथक्पदत्वं॥ अर्थम
धुरत्वं चोक्तिवैचित्र्यं॥ कोमलत्वमपि द्विविधं॥ बंधस्यापरुषत्वं शब्दस्य कोमलत्वं॥ अर्थकोमलत्वं च परुषे
ऽप्यर्थेऽपरुषत्वं॥ तद्यथा॥ मृतेयशःशेष इति॥ एवं कांतत्वमपि बंधविशेषादिनामनः श्रोत्रप्रीतिप्र
दत्वं॥ शब्दाश्रितं अर्थाश्रितं च दीप्तरसवत्वं च॥ शृंगारादौ रसे वीर्यगुणे रागे दुर्वेर सद्भुतमरः॥ एभिः
पद्यैर्विषयप्रयोजनसंबंधाधिकारिणो दर्शिताः॥ रहःकेलयो जयंतीति विषयो दर्शितः॥ उक्तगुणव
तोः श्रीराधामाधवयोः कलक्षणा भक्तिः प्रयोजनं॥ प्रतिपाद्यप्रतिपादकभावलक्षणः संबंधः॥ उक्तल
क्षण एतद्रसनाविर्नातः करणोधिकारी॥ एवं चत्वारो निरूपिताः॥३॥ इदानीं ग्रंथानिर्दिष्टत्वाय प्रामा
ण्यापादनाय च केनचिन्महाभागवतेन महाकविमन्यायो वर्णितं पद्यं संस्मृत्यते॥ वाचस्पतिः॥ उमापति

गीत० टी० नामालक्ष्मणसेनामात्यो वाचः पल्लवयति विस्तारयति॥ गद्यादिप्रबंधे चतुरः॥ व्यंग्यार्थशून्यं वाच्यार्थशून्यं चा
स्यकवित्वमिति ध्वनितं॥ शरणः शरणनामा कविः दुरूहस्य विषमार्थकाव्यस्य शीघ्ररचने श्लाघ्यः स्तुत्यः॥ दुर्वि
७ चारपदार्थज्ञानात्मशास्य॥ गूढार्थत्वादिदोषयुक्तं प्रसादादिगुणरहितं एतस्यापि काव्यं चेति। तथाच॥ शृंगा
ररस एवोत्तरः श्रेष्ठो यत्र शृंगारेण उत्तरं प्रधानं वा यत्र प्रमेयं तस्य रचने कवितायां ग्रंथने राचार्यगोवर्द्धन
स्पर्द्धी गोवर्द्धनाचार्येण सह स्पर्द्धावान् कोपि न विश्रुतो न ख्यातः॥ रसांतरप्रवेशो न माधुर्यादिगुणसंपन्नपद

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव॥ शरणः श्लाघ्यो दुरूहद्रुते॥ शृंगारो
त्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धी कोपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः॥४॥ ॥

रनायां सोप्यसक्त एवेति भावः॥ इतरविधाध्यापनादिना न तु सत्कवितायामाचार्यत्वमिति सोपहासमु
क्रमाचार्येति॥ धोयीकविक्ष्मापतिः॥ धोयीनामा कविराजः श्रुतिधरः श्रुतिः श्रवणं तन्मात्रादेव यथा
दियाही॥ ननु तस्य कवितायां कौशलमिति भावः॥ अथवा॥ उमापतिधरः उमापतिं पार्वतीपतिं श्रीम ७
हादेवं धरति ध्यानतया हृदि विन्दतीत्युमापतिधरः त्रिवन्न कोपि तत्कृपया प्राप्तविद्योपि केवलं वाचः
पल्लवयति पुष्पफलादिरहितां वाणीं वाग्विलासं बद्धपटादिशब्दपरंपरां विस्तारयति। शाब्दब्रह्मणो ह

ङ्कस्य शाब्दपरंपराणि पत्राणि॥ अथ पिरंपराणि पुष्पाणि तत्क्रियपरंपराणि फलानि एवं पुष्पफलरहितां के
वलपल्लवपरंपरामित्यर्थः॥ शरणः अंधपरंपरया नग्नवद्बहिर्मुखानां केवलं पाण्डित्यमात्रेण शरणं गंतुं यो
ग्यः ननु भगवत्स्वापकस्मात् दृशोपि दुरूहद्रुते गूढशब्दार्थमात्रे श्लाघ्यः बहिर्मुखैः स्तुत्यः ननु भगवत्स्वगुणे
रित्यर्थः॥ आचार्यगोवर्द्धनकर्मविद्यायाः उपदिष्टत्वेन स्वधर्माचरणे न च आचार्यत्वं। तेनैव केवलं विश्रु
तः विख्यातः कर्मजडेषु मतः तेषु कोपि कश्चिदपि स्पर्द्धनिनैरेव स्पर्द्धायुक्तो न भवति॥ तेषामेव मान्यः॥ न
तु भगवद्भक्तानामित्यर्थः॥ अथवा॥ आचार्यगोवर्द्धनस्य स्पर्द्धी आचार्यगोवर्द्धनस्पर्द्धी कर्मजडत्वात्तु
स्पर्द्धावान् भगवद्भजनयुक्तेषु भागवतेषु असूयावान् दोषारोपक इत्यर्थः॥ श्रुतिधरः श्रवणेन श्रवण
मात्रेण सर्वं विन्दतीति श्रुतिधरः सोपि राधारमणरसेन विश्रुतः न विख्यातः॥ तद्भवरोगवानित्यर्थः॥
यद्वा॥ श्रुतिधरः वेदधरोपि तद्रसानभिज्ञः॥ धोयीनामाकविः बाह्यान्तर एव देवस्यापि प्रशंसाजनपरो
पि शुद्धाशुद्धविचारपरोपि तद्रसेष्वनिपुण एव॥ कविक्ष्मापतिः कविषु क्ष्मापतिः कविराजस्तन्नामा क
श्चित्कविः सोपि चत्वनवधान एव अतः एते पूर्वोक्तगुणा उक्ता तेमदासार्थका एव ननु गुणार्थ इति भा
वः॥ शृंगारोत्तरसत्प्रमेयरचनैः श्रीराधामोहनयोः शृंगारलीला एव सत्समीचीनः प्रमेयः सिद्धांतवाक्यः
तस्यरचनैः सिद्धांतवाक्यरचितैः गिरां संदर्भशुद्धिं वच सांप्रयथनपा विश्रंसबद्धादिकरां राधामोहनयोः प्रे

गीतगो॰टी॰ मप्परांयथनपरंपरां जयदेव जयति सेवेस्मिः उक्तानुक्ताकविस्म सर्वोक्तिवैशिवर्न्नंति॥ अतः दीव्यतिसर्वेपि रिविरो
८ जते इति जयदेवः परमकविस्म एव जानीते॥ श्रीराधारमणयोः दृवेक्तिरसविलासयुक्तां चनादिसंसिद्धां जी॰
जां जानाति एव नान्य इति॥ एवकारेणैव उक्तानुक्ता निराकृता॥ इत्यर्थः॥ तदेव दर्शयति॥ कोपीति॥ कोपि
तेषु उक्तानुक्तेषु मध्ये कोपि कश्चिदपि न विक्षतः श्रीराधाकिशोरयोर्विलासेषु न विख्यातः न प्रसिद्ध इत्य
र्थः॥ उमापतिधरो एकः शरणनामा द्वितीयः॥ आचार्यगोवर्द्धनस्तृतीयः॥ श्रुतिधरश्चतुर्थः॥ धोयीपंच
मः॥ कविक्ष्मापतिः कविराजनामा षष्टः॥ एते षट्पंडितास्तत्कालीना जयदेवसमकाला अपि जयदेवतु
ल्यान्भागवतान संति॥ जयदेव महाभागवतपरमरसिकभक्तः एते स्वस्वकार्यैषाधिनिस्तत्त्वामन्निर्विरिख्या
ता॥ उमापतिधरः श्लेषः शरणः लोकप्रतारकतया शरणप्रद इति कौटिल्यागमादिपरः॥ गोवर्द्धन॰
नामाकर्मादिविद्याचारवान् श्रुतिधरः अस्य छात्र श्रोता वेदमात्र ज्ञातावान वैराग्यरहस्यविचारको वा॥
धोयी वा ह्याचारवान् दांभिकः॥ कविक्ष्मापतिः॥ लौकिककविपरत्वात् विराजेति प्रसिद्धः भगवत्पराय ८
णस्त एक एव जयदेव नान्ये एते इति वा भावार्थः॥ अथवा॥ एते षट्दर्शनिवेत्तारोपि अत एव षडेव उक्ताः
षट्दर्शनिनो भिन्ना एव ये भागवतास्त एव ते भक्तिरसवेत्तारः॥ नान्ये षट्दर्शनिपरा अपीति जयदेवोप
लक्षणीकृत्य उक्ता इति भावः॥ इति राज्ञो लक्षणस्य प्रसिद्धेति॥ षट्पंडितास्तस्य सभापतिपदेनाहंका

रित्वं नाश्रं चेति ध्वनितं॥ गिरां च रसां संदर्भशुद्धिं गुणालंकाररसंपन्नग्रथनविशेषं जयदेव एव जानीते नान्यः॥ तथा
च गिरां संदर्भशुद्धिं जयदेव एव जानीते भगवद्गुणवर्णनाकरत्वात्॥ तदुक्तं श्रीभागवते॥ न यद्वचश्चित्रपदं
हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्॥ तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः॥१
॥ तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि॥ नामान्यनंतस्य यशोंकितानि यत् शृण्वंति
गायंति गृणंति साधवः॥ ॥२॥ ॥ इति विशिष्टशब्दार्थवत्त्वाच्च महाकाव्यत्वं दर्शितं॥ वेत्ति शुद्धां निपयनिर्दो
षत्वे गुणवत्त्वालंकारयोगित्वे सति रसवत्वे॥ तदुक्तं॥ निर्दोषं गुणवत्काव्यमलंकारैरलंकृतं॥ रसान्वि
तं कविः कुर्वन् कीर्तिं भक्तिं च विंदति॥ पल्लवः किशलये पिंगे विटपे विस्तरेऽपि च इति विश्वः॥ जगुःश्लिष्टमरंतु
नम्मित्यमरः॥ उत्तरं प्रतिवाक्ये स्याद् ध्रुवदिव्येत्यादि मेऽन्यवदितिच॥४॥ ननु एवमुक्ते राधामाधवयोः रहः
केलयः जयंति॥ तेन पारकीयत्वेन अस्वर्ग्यमयशस्यं च फल्गुकल्पं तथावहं॥ जुगुप्सितं च सद्भिर्होपप
त्यं कुलस्त्रियः इति न्यायादि नाटाक्रांतत्वात् तुच्छत्वाच्च कथं रसनिष्पत्तिः कथं वा जयंतीत्युक्तं तदेव निरतिशा
यात्यद्भुतभक्तिमत्वनिरूपणेन सर्वनियामकतया स्वद्भुतैश्वर्येण नियम्य गोपकिशोरीस्वजनिर्भयर
सास्वादजीलामयमूर्त्तिरेव जारगुणेन पिकश्रेष्ठत्वापादनेन सर्वविघ्नविहतयेन मास्क्रिया मंगलम
यानवरतत्वानंदरूपतां चापादयन् उक्तदोषं परिहरति॥ प्रलयेति॥ उक्तं चास्मिन्नेवार्थे रासाध्याये हेना॥ श्रु
केनापि गोपीनां तत्पतीनां च सर्वेषामपि देहिनां॥ योंतश्चरति सोध्यक्षः क्रीडनेनेह देहभाक्॥ अनुग्रहाय

गी·गो·टी· भक्तानांमानुषंदेहमाश्रितः॥ भजतेतादृशीः क्रीडायाः श्रुत्वातत्परोभवेदिति॥ तासांमाहात्म्यमपि भगवतै
वोक्तंतत्रैव॥ एवंमदर्थोज्झितलोकवेदस्वानांहिमय्यनुवृत्तयेवलाः॥ यथापरोक्षंभजतातिरोहितमसूयितुं
९ माहर्थतत्प्रियंप्रिया॥ नपारयेहंनिरवद्यसंयुजांस्वसाधुकृत्यंविबुधायुषापिवः॥ यामाभजन्दुर्जरगे
हशृंखलासंवृश्च्यतद्वःप्रतियातुसाधुनेति॥ एतदुक्तंभवति॥ नायकोयंपुरुषोत्तमस्तस्यनित्यप्रियाः
प्रेमरसैकमूर्त्तयः॥ अतोनिःसीमरसास्पदत्वंसर्वोत्कृष्टत्वमपिसुसिद्धमितिसिद्धांतः॥ अस्वरूपमित्यत्र
यदुक्तंभगवतातत्तुप्राकृतविषयंरसनिष्पत्त्यैवक्रोक्त्यातद्भावपरीक्षार्थमिवेति॥ गीतस्यास्यमालवरागो
रूपकतालः॥ तयोर्लक्षणं॥ नितंबिनीचुंबितवक्त्रपद्मःशुककच्छविःकुंडलवान्प्रमत्तः॥ संगीतशाला
प्रविशन्प्रदोषेमालाधरोमालवरागराजइति॥ रूपकस्याद्द्रुतंलघुरिति॥ ॥प्रलयपयोधिजलइति
गीतार्थस्तु॥ हेकेशवजय॥ कोब्रह्माईशश्चरुद्रस्तौवशयतीतिकेशवस्तादृश॥ भक्तसुखकारितयासर्वो
त्कर्षेणवर्त्तस्व॥ ननुभक्तसुखसंपादनेकुतःसामर्थ्यमित्यतआह॥ जगदीशेति॥ जगतांचतुर्दशभुवनाना
मीशानियंतः तथाचचतुर्दशभुवननाथस्यतेतवकथंनसामर्थ्यमितिभावः॥ तत्रहेत्वंतरमप्याह॥ हेहरेहरति
भक्तानांक्लेशमितिहरिः॥ तदेवक्लेशकृत्यकरणेनापिभक्तकार्यपरत्वंभगवतोदर्शयति॥ धृतमीनशरीरेत्यादि ९
ना॥ कीदृशधृतमीनशरीर॥ धृतंपरिगृहीतंस्वेच्छयाविकृतंमीनस्यमत्स्यस्यशरीरंयेनतादृश॥ एतत्तुध्रुव
पदंप्रतिपदमनुवर्त्तमानत्वात्॥ तदुक्तं॥ उद्ग्राहःप्रथमोभागस्ततोमेलापकःस्मृतः॥ ध्रुवपदत्वाच्चध्रुवःप

श्चादाभोगश्चांतिमोमतः इति॥ चतुर्भिरवयवैः प्रबंधोभवति॥ यद्यपिकश्चित्॥ धृतमीनशरीरइति॥ कश्चिद्धृत
कच्छपरूपेत्यादिभिन्नंभिन्नमेवपदमस्तितथापिजयजगदीशहरेइत्यस्यप्रतिपदमनुवर्त्तमानत्वात्॥ ध्रुवपदं॥ न
न्वाकिमितिलीलाशरीरंमयापरिगृहीतमित्यतआह॥ त्वंप्रलयपयोधिजलेप्रलयकालीनाःपरस्परं
मिलितायेपयोधयःसमुद्रास्तेषांजलेवेदंनिमग्नंतंमीनशरीरमुपादायधृतवानसि॥ कथंयथास्यात्॥ वि
हितंवहित्रचरित्रंयथास्यात्॥ विहितंकृतंवहित्रस्यपोतस्यचरित्रंयथास्यात्तथा॥ पुनःकथंयथास्यात्॥ अखे

प्रलयपयोधिजलेधृतवानसिवेदं॥ विहितवहित्रचरित्रमखेदं॥ केशवधृतमीनशरीरजयजगदीशहरे॥१

प्रथमंमीनवंधमाह॥ हेधृतमीनशरीर॥ धृतमीनवंधतत्स्वरूपं॥ प्रसार्यहस्तचरणौपुमानूर्ध्वाङ्गनायते॥ ना
यिकामुपरिस्थाप्यमीनवंधःप्रकीर्त्तितः॥१॥ प्रकर्षेणमनसःलयस्तदाकारतायत्रसुरतेसप्रलयः॥ सयथा॥ सु
रतेचसमाधौचमनोयत्रनलीयते॥ किंतेनसुरतेनार्थः॥ किंतेनचसमाधिनेति॥२॥ तत्राऽनंदस्यभक्तत्वेनपयो
धिजलंतस्मिन्॥ वेदंवात्स्यायनशास्त्रप्रतिपाद्यमीनवंधादिकुशलत्वंविद्यतेज्ञायतेरतिकौशलंकेशस्यशा
दिलीलांवात्रखेदंयथास्यात्तथाधृतवानसितं॥ पोषितवानसीत्यर्थः॥ कीदृशं॥ यदंविहितंकृतंवहित्रस्यपोत
स्यचरित्रंकेलिजलधिपारप्रापकरूपंयेन॥ एतेननायकचूडामणित्वंसूचितं॥१॥ ॥७॥ ॥

गी०गो०टी० अखिदं॥ खेदरहितं यथास्यात् तथा॥ परमानंदनिधानत्वात्॥ अथवा॥ वेदं तानं धृतवानसि॥ मत्स्यहतापितवा
नसीत्यर्थः॥ अतीनकातुरगेणागलितखेदत्वात् खेदमित्युक्तं॥ अत्र पयोधिपदेनैव जलत्वे प्राप्ते पुनर्जलपदो
१० पादानमंतर्द्वीपादिरहितत्वेन विश्रामस्थलाभावं सूचयितुं॥ तथा च निरालंबेपि पयोधौ वेदं धृतवानसीति॥ वे
दधारणार्थमेव ते शरीरपरिग्रह इति निष्कार्यपरत्वं दर्शितं॥ इषुरीमाफयोमत्स्यो मीनो वैसारिणोऽण्डज इत्यम
रः॥१॥ क्षितिरित्यादि हे केशव धृतकच्छपरूप धृतं कच्छपस्य रूपं येन तादृशजय॥ कूर्मावतारेपि हेतुमाह॥ तव
पृष्ठे क्षितिः तिष्ठति॥ तिष्ठतीति वर्त्तमानकालनिर्देशेनाधुनापि तिष्ठतीति प्रसिद्धमेवेति भावः॥ ननु पंचाशत्को

॥ क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे॥ धरणिधरणकिणचक्रगरिष्ठे॥ केशव धृतकच्छपरूप जय जगदीश हरे॥२॥

टियोजनविस्तृतामत्र पृष्ठे कथं स्थितेत्यत आह॥ अतिविपुलतर इति॥ अतिशयेन पृथिव्या अपेक्षयाप्य
धिकविस्तीर्णे॥ पुनः कीदृशे॥ धरणिधरणकिणचक्रगरिष्ठे॥ धरण्याः पृथिव्या धारणेन यत्किणचक्रं चक्रा
कृतिरुधिरमंडलं तेन गरिष्ठे॥ गौरवयुक्ते॥ तच्छोणितचर्चितं पंचक्रं यस्मिन् तादृश इति वा॥ कूर्मे किमठक १०
छपावित्यमरः॥ व्रणचिह्नं तु किणो इति हारावली॥ तथा च नक्रकूर्मे पृथिव्यादिधारणकर्मणा गवतो
भारवहनमप्युक्तमिति भावः॥२॥ यद्वा॥ कच्छपस्य चरित्रद्वयमाह॥ एकं पृथिवीधारणं॥ अपरं मंदराचलधा
रणं॥ पृथिवीधारणं पूर्वपदेनैवोक्तं॥ उत्तरार्द्धपदेन धारणमेव दर्शयति॥ रूपद्वयवक्ति॥ चरितद्वयेन वा

कच्छपवंधमाह॥ धृतकच्छपरूपस्वीकृतकच्छपवंधः तत्र कारणं॥ हस्तौ पादौ च सर्वं कोष्ठकौ॥ तामुपरिवद्धत्वः॥ स्थापये
त्तुरते यत्र कच्छपः सप्रकीर्त्तितः॥ तव पृष्ठे विशाले क्षितिर्हे दावन तिष्ठतु जन्मिमित्तिष्ठति वर्त्तत इत्यन्वयः॥ कीदृशे पृष्ठे॥
अतिशयेन विपुलयति विशेषणमहत्वं रसस्य प्राप्नोति तथा॥ अनेन नायकस्यांशो दहनत्वं सूचितं॥ किंदृशे॥ धर
णिधरणकिणचक्रगरिष्ठे॥ पूर्वोक्तिवंधधारणेन किणांकं कुंकुमादिविंदुपत्रकं चक्राकृतिकं कणं तेन गरिष्ठे प्रा
प्तगौरवेऽनर्घ इत्यर्थः॥ अन्यदविरलमचिक्कमव्रणमेवानर्घमिदं पुनस्तत्त्वशरीररत्नं प्रियानखचिह्नितमपिच्छ
मूल्यमिति॥ श्रीराधोक्तिरत्र सर्वत्र ज्ञेया॥ तद्यथा॥ सर्वस्यापि रत्नस्य व्रणेनार्घः परिहीयते॥ दयिताधररत्नं तु व्रणे
नैवास्यनर्घतामिति॥ तिष्ठतीति फलपर्य्यंतकार्यनिर्वाहकतया स्थिरतालक्षणो नायकगुण उक्तः॥२॥ व॥
ध्वीधारणं तु कल्पपर्यंतं॥ एकेनैव अंशेन॥ अपरेणांशेन धारणं कृतमिव द्वयं एकीकृत्योक्तमित्याह॥ धरणि
धरणस्य मंदरस्य विवर्त्तनाश्रितं यत्किणचक्रं लांछनावर्त्तस्तेन गरिष्ठे कठिने पृष्ठे पृष्ठिभागे॥ देवदैत्यैरमृता
र्थं क्षीरसमुद्रमथनसमये मंदरसमुद्रं बुडितस्तदा खेदं प्राप्ताः स्वनकादेवाल्लान् कूपयन्नेव कच्छपः सन् आवि
र्भूय मंदराचलो धृत इति॥ तत्कार्यमेव इदं च साधारणं प्रयोजनं दर्शितं॥ पृथिवीधारणं तु सर्वसाधारणमेव
तेनैव तु नायकस्य सर्वनायिकानारीदहनं विपरीतरतादि सूचितमिति भावः॥२॥ वसतीत्यादि॥ हे केशव
वधृतशूकररूप धृतं शूकरस्य रूपं येन तादृशजय॥ वाराहावतारपरिग्रहप्रयोजनमाह॥ तव दशनशिखरे द
ताग्रे लग्ना संश्लिष्टा धरणी लोकधारकत्वेपि पृथ्वी वसति॥ कुत्रके व॥ शशिनि तिबंडेनिमग्नालीना कलंकक

गी॰गो॰टी॰ एवंविधात्मिकेकेलिमुदितंनदंगसौंदर्यंवर्णयंत्याह॥ वसतीति॥ हेधृतशूकररूप॥ शूकरोतितन्नूकरोतिकंरा
निनिशूकरः॥ अत्रतुमानकंदर्पणतेनथात्वंतस्योच्यते॥ उक्तंच॥ कामिनीनयनकज्जलपंकाद्दुस्थितोमदनम
११ त्तवराहः कामिमानसवनांतरचारीकंदमुस्तनतिमानलतायाइति॥ तवदशनशिखरेधरणीजगतीतिष्ठतीस
न्वयः॥ धरित्रीरसंप्रेयसीवाधरणीतच्छीलासातवदशनशिखरेदंताग्रेदशनक्षतविधानेवसति॥ कस्मिन्केव॥
॥शशिनिपरमानंदजनकेचंद्रेनिमग्नाकर्णकलंकेव॥ सायथाविद्यमानापिनशोभातिरस्करणीति॥ एतेन
नायकस्यगुणप्रकर्षोदर्शितः॥२

वसतिदशनशिखरेधरणीतवलग्नाशशिनिकलंक
कलेवनिमग्नाः केशवधृतशूकररूपजयजगदीशहरे॥३॥

लेवलांछनलेशोवनिमग्नेतिपदोपादानेनवाज्चंद्रस्यसाम्यंदशनेप्राप्यते॥ तत्रकलंकलेशस्यनिमग्नत्वात् ११
॥ पूर्णबिंबेतस्यस्पष्टत्वात्॥ अतोबालचंद्रस्यदीर्घतयासादृश्यमपिप्रसंगछते॥ मग्नेतिपदवैयर्थ्यमिपित॥ किंच
॥ दंतस्त्रिग्धायास्तस्याः पोषणमप्युक्तमितिभावः॥ रदनाग्रनादंतारदाद्वलमरः॥ अग्रंशिखरमिसांकुरद्वि
श्रृंगेवत्वमतमितिधरणिः कलास्यान्मूलकेहस्तेशिल्पादावंशमात्रके॥ षोडशांशेचचंद्रस्यकलनाकालयोःक
लेतिविश्वः॥३॥

पुनःकोकशास्त्रप्रदर्शितांनखक्षतादिरूपांलीलांचतुरनायिकाप्रकारांतरेणाह॥ तवेति॥ क्रीडायांप्रवर्तमानस्याथ
पश्चाद्भावोनास्ति॥ तत्रदवसरनत्वात्॥ नखक्षतनिर्दयत्वकथनायरतिसमयेनृसिंहरूपइत्युक्तं॥ तवकरक
मलवरेतवहस्तकमलवरेश्रेष्ठेनखमस्ति॥ कीदृशं॥ अद्भुतमाश्चर्यजनकमग्रभागोयस्यतत्तथा॥ रक्तत्वकथ
नेनकंजसाम्यं॥ पुनःकीगीयस्यदृशं॥ दलितहिरण्यकशिपुतनुभृंगं॥ दलितोविदारितोहिरण्यकशिपुना
मायातनुरेवभृंगोयत्रतत्॥ अन्यत्रभ्रमरेणकमलंविदार्यते॥ अत्रतुसएवदलितइत्यनेनश्रृंगाररसप्रदर्शितःक्रे
ति॥ केशवेत्यादिपूर्ववत्॥४॥

तवकरकमलवरेनखमद्भुतशृंगं॥ दलितहिरण्यकशिपु
तनुभृंगं॥ केशवधृतनरहरिरूपजयजगदीशहरे॥४॥

तवकरेत्यादि॥ हेकेशवधृतनरहरिरूपधृतंनरहरे॥ नरसिंहस्यरूपंयेनतादृशजयः॥ नृसिंहावतारप्रयोज
नमाह॥ तवकरकमलवरेकरीहस्तः सएवकमलवरः पद्मश्रेष्ठस्तत्रनखंतिष्ठति॥ कीदृशं॥ अद्भुतंआश्चर्य
भूतंश्रृंगमग्रभागोयस्यतादृशं॥ अद्भुतत्वमेवाह॥ दलितोविदारितोहिरण्यकशिपोर्दैत्यस्यतनुर्देहः सएव
भृंगोभ्रमरोयेनतादृशं॥४॥ भृंगोद्विपप्रदलविदलनार्थंप्रवर्तते॥ विदलयतिचतत्॥ अनेनपुनर्हरिरूप
नखेनभृंगएवविदारितइत्यद्भुतं॥ तथाचहतोपिहिरण्यकशिपुकायस्यभृंगत्वनिरूपणेनश्रीनृसिंहकरां

 बुद्ध्यापेक्षया तिरस्कृतत्वं ध्वनितं॥ नन्वद्भुतो हि हिरण्यकशिपोर्विदारणायात्र च सिंहवपुराविष्करणमिति नाव:॥प
 मानि लिं ह्र चंद्रार्कविह्नसिंहांशुवाजिषु॥ शुकाहि कपिभेकेषु हरिर्ना कपिले त्रिष्वित्यमर:॥ शृंगे प्रभुत्वे शिख
रे चिह्ने क्रीडांबुयंत्रके॥ विषाणोत्कर्षयोरग्रे शृंगं स्यात्कूर्चशीर्षक इति विश्व:॥ पुनर्नवि:॥ कररुहो नख
रो नखमस्त्रियामित्यमर:॥ तुंते काले कृत्रोवान्ये विरले चापि वाद्यवदिति च॥ द्विरेफ: पुष्पलिड्भृंगषट्पदभ्र
मरालय इत्यमर:॥४॥ आलिंगनरूपां क्रीडामाह॥ छलयसीति॥ हे धृतवामनरूप॥ वामयति नामयति आलिंगिनो
छलयसीति॥ हे केशव धृतवामनरूप धृतं वामनस्य खर्वस्य रूपं येन तादृश जय॥ वामनावतारप्रयोजनमाह॥

छलयसि विक्रमणे बलिमद्भुतवामन॥ पदनखनीरजनितजनपावन॥ केशव धृतवामनरूप जय जगदीश हरे॥५॥

आलिंगनरूपां क्रीडामाह॥ छलयसीति॥ हे धृतवामनरूप॥ वामयति नामयति आलिंगनादिनिर्मी
नादिना वाय: स वामन:॥ तत्संबोधनं॥ तेन मानेन त्वं विक्रमे सुरतविक्रमे सुरतपराक्रम इत्यर्थ:॥ बलिं त्रिवलिं
छलयसि वंचयसि॥ विपरीतविधानेन जातात्रमयसीति सूचितं॥ हे अद्भुतवामन आश्चर्यवामन॥ पदनखेति
संबोधनं॥ विपरीतसुरतेन तत्रयं पदनखं पदनखक्षतं तत्क्षालनाय यन्नीरं तेन जनितं जनस्यानंदस्पंदनस्य पा १२
वनं चित्तप्रसादकारित्वं॥ एतेन नायिकोत्कर्ष: पावनत्वं च नायकस्योक्तं॥ ननु नखदानं करनखेनैव जन्यते न प
दनखेनेति॥ सत्यमेतत्तु विपरीतरतौ नायिकापदनखकृतानि प्रायेण ज्ञातव्यं॥५॥ ॥ठ॥ ॥

हे अद्भुतवामन॥ आश्चर्यरूपवामन विक्रमणे पदाक्रमणनिमित्तं रूपमुपादाय बलिं दैत्यराजं छलयसि॥ वंचय
सि॥ भगवानुपेंद्रो वामनरूपं धृत्वा बले: सकाशात् पदत्रयपरिमितां भूमिं प्रार्थ्य॥ पश्चाद्बृहद्रूपं प्रकटीकृत्य
चतुर्दशभुवनैरपि पदत्रयापूरणेन बलिं गृहीत्वा त्रिलोकीमिंद्राय ददादिति॥ पुराणप्रसिद्धेरद्भुतत्वं सर्वात्मि
नो भगवतो भक्तपरवशत्वेन छद्मनापि भक्तकार्यसाधनमिति वाद्भुतवामनेत्युक्तं॥ बलकृतलकृतदृग्गो हृत्वा
द्वारपालो बलेरित्यद्भुतत्वं ध्वनितं अन्यच्चाद्भुतत्वं दर्शयति॥ पदनखसंबंधी यन्नीरं गंगाजलं तेन जनितं समु
त्पादितं जनानां पावनं पवित्र्यं येन तादृश अत्रापि प्रवर्द्धमानस्य भगवतस्त्रिविक्रमस्य चरणांगुष्ठनखाग्रेण
विदीर्णे ब्रह्मांडस्य प्रथमे पार्थिवावरणे तेनैव तन्मिनितं चरणारविंदं प्रक्षाल्यदेवागतं॥ यद्द्वितीयावरण
जलं तत्कमंडलुजलेन कीर्तं क्रमेण मस्मली कंपाप्रगंगेति लोकान्पावयति इति पुराणप्रसिद्धे:॥ तथा
च॥ स्त्वे किञ्चितेनातिह्रस्वेन वामनेन ब्रह्मांडनखस्याचानयनादाश्चर्यं छद्मवत: चरणनखस्पृष्टजले
नापि संसारालोकपावनत्वमित्यद्भुतमहिमयोगेनात्याश्चर्यमित्यपि ध्वनितं॥ किंच॥ छलयसीति भूतेप्यद्या
पि बलिसमीपे वर्त्तमानत्वात् वर्त्तमानप्रयोग पावन इति नायकगुणाश्च कथिता:॥ नलिनी सीयपानीयनी
रक्षीरांबुसंवरमित्यमर:॥ बलिश्चामरदंडे स्याज्जरयाश्लथचर्मणि उदारवयवैदैत्ये करे प्रजोपहारयो:
॥ गृहदारुविशेषे च गंधके च क्वचित्ततमिति विश्व:॥५॥ क्षत्रियेति॥ हे केशव धृतभृगुपतिरूप धृतं भृ
गुपते: परशुरामस्य रूपं येन तादृश जय॥ तत्प्रयोजनमाह॥ क्षत्रियाणां यद्रुधिरं तन्मये तद्विकारे पय

घातितुः सहतापोपशमनीं किंतुमाह॥ क्षत्रियेति॥ विभवतिरसमितिभगवौ रसिकाः रसिकानां पतिः प्रभुः प्र
शस्तो भृगुपतिरूपः परशुरामार्थेरूपेः॥ रसिकचूडामणे॥ जयजगदीशहरेपदं पूर्ववत्॥ क्षत्रियरुधिरमद्
शेपयसि जगत्स्नपयसि॥ श्रीकालिंदीजलक्रीडायां कुंकुमकर्मिरितायां गच्छतीति जगत्त्राधिकासमूहं स्नप
यसि स्नानं कारयसीत्यन्वयः॥ कीदृशं जगत् व्रजयुवतिवृंदं॥ अपगतपापं स्नानमात्रेण नष्टसंसारकलु
षं॥ पुनः कीदृशं जगत् युवतिवृंदं॥ शमितभवतापं॥ शमितः शांतिं प्रापितः भवस्य कामस्य विरहोत्पन्नो
तापो येन॥ भवोत्र कामवाचकः॥ भीमो भीमसेन इति वत्॥ ह॥ सुप्रसन्नात्मकां लीलामाह॥ वितरसीति॥

क्षत्रियरुधिरमये जगदपगतपापं॥ स्नपयसि पयसि शमितभवतापं॥ केशवधृतभृगुपतिरूप जय जगदीशहरे॥ ह॥

सि कुरुक्षेत्रारव्यतीर्थजले तत्र प्राणिजातं अपगतपापं नष्टकलुषं यथास्यादेवं स्नपयसि
स्नानं कारयसि॥ यद्वधिपरशुरामेणैकविंशतिवारान् क्षत्रियान् हत्वा तद्रुधिरैः कुरुक्षेत्रे पंच ह्रदान् विधा
य पितृतर्पणं कृतं॥ तद्वधितन्महावीर्यं जातमिति पुराणप्रसिद्धेः॥ कीदृशं जगत्॥ शमितभवतापं॥ श
मितो नाशितो भवस्य संसारस्य तापः संतापो यस्य तादृशं॥ प्राणिनो पापसंबंधाद्भवसंताप स्तत्तीर्थस्नानेन तु
सर्वपापनाशे संतापनाशं इति भावः॥ जलेमज्जतः संतमस्य तापनाशः उचितएवेति ध्वनितं॥ रुधिरेण गके
षोक्तो रुधिरं कुंकुमादः स्त्रतेति विश्वः॥ भवः संसारसंतप्ति॥ श्रेयः सेकरजन्मखितिच॥ अनेनापि धर्मरक्षण

पतद्विरोधिक्षत्रकुलसंहरणात्मककार्यं दिग्निर्णि॥ तथा च रुधिररूपे जले मज्जतां साधनकोटिसंसाध्यसं
सारध्वंसजक्षणपावनत्वापादनेनाद्भुतपावनत्वं वीर्यं च कथितमिति भावः॥ ह॥ वितरसीत्यादि॥ हे के
शवधृतरघुपतिरूप॥ रघुपतेः श्रीरामचंद्रस्य रूपं येन तादृश जय॥ श्रीरामावतारकृत्यमाह॥ रणे सं
ग्रामे दिक्षु दशदिशासु दिक्पदेनैव दशसंख्योपलक्षिति लोतिषि॥ दशमुखस्य रावणस्य ये मौलयो मस्तकानि ता
न्येव बलिमुपहारं वितरसि॥ ददासि॥ कीदृशं दिक्पतिकमनीयं॥ दिशां ये पतय इंद्रादयस्तेषां कमनीयं अभी
ष्टं॥ तत्र हेतुः रमणीयं रावणवधश्रवणाल्लोकानिरामत्वात्॥ प्रत्येकं विभागकथनाय दशमुखोपादानं॥ किरीट

वितरसि दिक्षु रणे दिक्पतिकमनीयं॥ दशमुखमौलिबलिं रमणीयं॥ केशवधृतरघुपतिरूप जय जगदीश हरे॥७॥

मुकुटचूडामुमौलंकेत्रोत्संपन्ने॥ अत्रापि लोकपालानां स्वनकानां कार्यकरत्वं तैरपि सेव्यमिति वाडुतवी
र्य कोशलं च द्योतितं॥ प्रत्येकं तन्मौल्यर्पणात्॥७॥ ॥ हे रघुपतिरूप॥ जय॥ रवबणकप लीपतयस्तेषां पतिः
श्रेष्ठस्तत्त्वबुद्धिः॥ एतेन बहुयुवतिष्वासक्तिर्निवारिता॥ दिक्षु॥ रतिविहारदिशासु रणे स्मरसंग्रामे दशमुखेद
शप्रकारो यो मौलिः केशपाशस्तेन बलिं पूजां वितरसि विस्तारयसि॥ यद्वा॥ दशमुखोयः कामाय मौलिना कीरीट
स्तेन बलिं पूजां वितरसि ददासि इति केचित्॥ कीदृशं॥ दिक्पतिकमनीयं॥ दिक्पतयः इंद्रादयस्तेषां कमनीयं म
नोहरं॥ तद्भोग्यं वा॥ तद्गोचरमिति त्वचा॥ पुनः किंभूतं॥ रमणीयं॥ रतिजनकं॥ शेषं पूर्ववत्॥७॥ ॥

 एवंहतिविहारगवितिंप्रस्ताह॥ वहसीति॥ हेधृतहलधररूप॥ हलविलेखनेधातुः॥ हलनंहलः विलेखनंनख
१४ क्षताधरक्षतरूपंरतोधत्ते इतिहलधरः॥ सुरतकेलिप्रसंगात्हलधररूपस्तत्संबुद्धिः॥ धृतनानागरवाधरक्षतम
दरूप॥ त्वंविशदेनिर्मलेवपुषिशरीरेवसनंवस्त्रंवहसि॥ त्वंगसुंदरस्ववसनधारणनारतोधारयसीत्युक्तं॥ की
दृशं॥ जलदाभं॥ जलदानांनीलमेघवृंदानांआभाशोभायस्मात्तत्॥ जलपदस्याभिप्रायोयं॥ जलदोयथास्वजीव
नंदत्वाविश्वजीवनंकरोति॥ यथात्वमपिवेदोक्तंहित्वाविहारंकुरु॥ नहिवेदोक्तमर्यादापालनेनसर्वोपिरसःसा
धयितुंशक्यःपुनःकीदृशं॥ हलहतभीतिमिलितयमुनाभं॥ हलेनयद्हननंतीत्यातद्भयेनमिलितायायमुनात
स्याआभेवाभादीप्तिर्यस्यतत्॥ हलहतीतिपाठेसएवार्थः॥ हलधरपदेनवारल्मीतलक्षणोनायकयुगउक्तः॥ ८

वहसिवपुषिविशदेवसनंजलदाभं॥ हलहतिभीतिमिलितयमुनाभं॥ केशवधृतहलधररूपजयजगदीश
हरे॥ ८॥

वहसीति॥ हेकेशवधृतहलधररूपधृतंहलधरस्यरूपंयेनतादृशत्वंजय॥ तद्भावमाह॥ त्वंविशा
देशुभ्रेवपुषिदेहेजलदाभंसजलमेघनीलंवसनंवस्त्रंवहसिधारयसि॥ कीदृशं॥ हलहतिभीतिमिलितय
मुनाभं॥ हलेनहतिर्हननंतद्भीत्यातद्भयेनमिलितायायमुनातस्याइवआभादीप्तिर्यस्योतादृशं॥ इयंमत्वया १४
निलवशात्कंपमानस्यवस्त्रस्यनयमुनयासाम्यमप्रेक्षाग्नेपिमा॥ नीरूपणंहिकंपउचितएवेतिभावः॥
कदाचिद्वृंदावनेवारुणीपीत्वागोपीभिःसहविहरताबलभद्रेणजलक्रीडार्थमाहूतामन्नप्रलापमितिमत्वाग

वेणांतिकमनागच्छंतीकालिंदीरोषतोहलाग्रेणकृष्टेतिपुराणप्रसिद्धेः॥ अस्मिन्नप्यवतारेताभिःप्रेयसीभिःर
ममाणस्यतत्सुखार्थयमुनाकर्षणादिलीलाविष्करणंतत्त्वसमिति॥ किंच॥ हलधरपदेनदुष्टनिग्रहार्थमेव
हलंधृतवानिति॥ नकेकार्यपरत्वमवतारप्रयोजनंध्वनितं॥ गात्रंवपुःसंहननंशरीरंचकलेवरमित्यमरः॥ शु
भ्रेशुक्लःशुचिश्वेतविशदश्येतपांडुराइति॥ वस्त्रमाछादनंवासश्चैलंवसनमंशुकमितिच॥ भीतिःसाध्वस
कंपयोरितिविश्वः॥ ८॥ निंदसीत्यादि॥ हेकेशवधृतबुद्धशरीरधृतंबुद्धशरीरंयेनतादृशत्वंजय॥ ननुवेदनिं
दकस्यकथंस्तुतिरित्यतआह॥ यज्ञविधेःश्रुतिजातंक्रतुविधानसंबंधिवेदवाक्यसमूहंनिंदसि॥ ननुसर्वमि
त्यर्थः॥ सोपिकिमितिनिंद्यतइत्यतआह॥ अहहकष्टंदर्शितोबोधितःपशूनांघातोयेनतादृशं॥ वेदोपिपशु

निंदसियज्ञविधेरहहश्रुतिजातं॥ सदयहृदयदर्शितपशुघातं॥ केशवधृतबुद्धशरीरजयजगदीशहरे॥ ९

नांघातंबोधयतीत्यहहकष्टमितिवनिंदयसीतिभावः॥ एतादृशनिंदायामपिहेतुमाह॥ सदयहृदयेति॥
दयाकृपातत्सहितंहृदयंयस्यतादृशश्चयंभावः॥ रागवशान्निरंकुशान्दृष्ट्वाऽग्नीषोमीयंपशुमालभेते
त्यादिविधिवाक्यैःस्वर्गादिकफलंप्रदर्श्यनिपुरस्कारेणगुडजिह्विकयावैदिकमार्गेप्रवर्त्यपश्चात्स्वरस्वर्गा
दिफलजनकंनिरपराधिवधप्राणिवधसाध्यंयागादिकमुक्तिविरोधित्वात्तेषामत्यंतमितिविचार्यपरम
पुरुषार्थसाधनेनिवृत्तिमार्गेतान्प्रवर्तयितुंनहिंस्यात्सर्वभूतानीत्यादिनायज्ञादिबोधकवेदस्यनिंदांक

रीषि॥ ननु सर्वथा वेदनिंदायामेव तात्पर्यमित एव सूहंतवैन तत्तात्पर्यमितानां त्वाद्दुरात्मनां वैदिकमार्गे स्थिविश्वा
सइति॥ तेषां मोहनयैव तवेतदवतारचरित्रमिति स्वतन्नार्थतिद्धिरोधिनो श्रेयस्सिवं चुनरूपमवतारप्रयो
जनमप्युक्तमिति॥ अहहेत्यद्भुतेवा॥ अहहेत्यद्भुते खेदे इति विश्वः॥ वेदेश्रवस्मिचश्रुतिरित्यमरः॥ जानेजातो
द्यजन्मस्थितिविश्वः॥ ९॥ पूर्वोक्तिविहारपुष्पंप्रस्ताह॥ म्लेछेति॥ हेधृतकल्कि म्लेछनिवहे सादि॥ हेकेशवधृ
तकल्किशरीर धृतं कल्किनः शरीरं येन तादृशत्वं जय॥ तच्चेष्टितमाह॥ त्वं म्लेछनिवहं निधने म्लेछानां निव
हः समूहास्तेषां निधनेनाशनिमित्तं करवालं खड्गं कलयसि धारयसि॥ कीदृशं॥ किमपि करालं॥ ७॥

म्लेछनिवहनिधने कलयसि करवालं॥ धूमकेतुमिव किमपि करालं॥ केशवधृतकल्किशरीर जय जगदीश
हरे॥ १०॥

वेदोक्तमध्यादिग्रहं त्यक्त्वा विहरेति पूर्वोक्तिं तद्दशा चरंतं प्रस्ताह॥ निंदसीति॥ हे धृतबुद्धशरीर॥
बुद्धं तानं श्रीहर्षनातुजास्वरूपाय तं स्वरूपं येन तादृशत्वं जय॥ जगदीशादिपूर्ववतू॥ हेसदयहृदयत्वं यज्ञविधेः
मकरध्वज यज्ञविधेः॥ अहहेति खेदे श्रुतिजानं तत्प्रतिपादकमयदिशागं निंदसि मयदि अतं तेनागं नमन्यसे
न वेदस्तत्त्वियामकइत्यर्थः॥ उक्तं च॥ रतिचकेप्रवर्त्तस्मिन्नैव शास्त्रं न चक्रम इति नो मे॥ कीदृशं॥ दर्शितः पशु
घातो येन॥ ९॥ पूर्वोक्तिविहारपुष्पंप्रस्ताह॥ म्लेछेति॥ हे धृतकल्किशरीर धृतं सापराधशरीरं येन तादृश॥ ज
यजय॥ शेषं समानं॥ त्वं म्लेछनिवहनिधने करवालं कलयसि॥ म्लेछन्त्र व्यक्ते शब्दे॥ म्लेछस्या व्यक्तरूजन
नस्य निवहः समूहस्तस्य निधने विरामे॥ खड्गं खड्गं चदति करालं तीक्ष्णं॥ नखं कलयसि रदासि॥ १०॥ ॥

अतिशयेन भयंकरं कुमिव धूमकेतुमिव॥ औत्पातिकग्रहविशेषो युतेनं पन्नरूपतां प्राणिनां मिव॥ रणे उदि
तं तत्करवालं पन्नरूपतां म्लेछानां नाशो भवतीति॥ करवालस्य धूमकेतुसमं॥ धूमकेतौ औत्पातिकग्रहविशे
षो युदितेनं पन्नरूपतां प्राणिनां विपदो भवतीति भावः॥ यद्वा धूमः केतुश्चिह्नं यस्य स धूमकेतुर्वह्निस्तमिव॥
अत्र खड्गस्य नीलत्वा धूमसाम्यं॥ मुष्टेश्च सुवर्णमयत्वात्॥ अग्निसाम्यं॥ म्लेछः पापरतो जातिभेदस्यादप
भाषणे इति विश्वः॥ समूहनिवहव्यूहसंदोहविसरव्रजाइत्यमरः॥ निधने कुलेनाशे इति विश्वः॥ खड्गे तु
निस्त्रिंशचंद्रहासासिरिष्टयः॥ कौक्षेयकोमंडलाग्रः करवालः कृपाणवदित्यमरः॥ धूमकेतौ शिखितौ वक्रा
त्यानग्रहभेदयोरिति विश्वः कराली तीक्ष्णोन्यवदितिच॥ धृतवान्सादिभिर्वन्निमानप्रयोगे रचनाशरणान्भगवतश्चली
लया नित्यलेदानिनि॥ १०॥

श्रीजयदेवकवेरिदमुदितमुदारं॥ शृणु सुखदं शुभदं भव
सारं॥ केशवधृतदशविधरूप जय जगदीश हरे॥ ११॥

सार्वलीलाकथनं शृणु श्रीकृष्णं स्तौति॥ श्रीति॥ हे रसिक॥ श्रीजयदेवकवेः इदं गीतं उदितं स्वतः प्रेम्णा स्फुरी
भूतं शृणु॥ कीदृशं॥ उदारं महत्त्वमयत्वात्॥ अथवा॥ उदारं चतीरमणीयं॥ श्रीराधाकृष्णकेलिनिरूपण
त्वात्॥ पुनः कीदृशं॥ सुखदं सकलानंदपूर्णत्वात्॥ पुनः की॰॥ शुभदं॥ अथवा॥ शुभं ददाति यः श्रीकृष्णस्त
स्त्वदं॥ भवसारं भवे संसारे सारभूतं॥ यद्वा॥ भवो मनो भवः कामस्तस्य सारं॥ शृंगाररसपूर्णं॥ यद्वा॥ भवत्यस्मा
दिति विग्रहे भवः श्रीकृष्णस्तस्य सारं॥ सारभूतं सुरतविस्तारकं॥ हे धृतदशविधरूप॥ धृतानि दशविधानि
दशप्रकाराणि मीनवंशादिशरीराणि येन तादृश जय जय॥ ११॥ ॥

एवं तन्नदवतारस्तुतौ स्तुतिं कृत्वा संप्रत्यवतारिणं कृष्णं प्रार्थयते ॥ श्रीजयदेवेत्यादि ॥ हे केशव धृतानि दशविधानि रूपाणि येन तादृश त्वं जय ॥ किंच खंडानंदसुखेश्च ते इति केशवस्तादृशस्यापि दशविधमत्स्यादिरूपाणं गीकृत्वापि तादृशैः कृत्यैरपि स्वभक्तकार्यसाधनेन तादृशो महिम्नः उत्कर्षेण तव जननेममहतीरुचिर्जाता ॥ अतो भक्तसुखसंपादनेन जय मम चेदमिति इदं जयदेवकवेः उदितं भाषितं श्रृणु ॥ कीदृशं ॥ सुखदं श्रोत्रमनःसंतोषप्रदं ॥ पुनः कीदृशं ॥ शुभदं मंगलप्रदं ॥ तत्र हेतुः ॥ भवसारं ॥ जन्मरहस्यवर्णनीयत्वेन यस्य तादृशं ॥ अथवा च भवे सारं श्रेष्ठं ॥ परमपुरुषार्थसाधनत्वेन जन्मसाफल्यकरत्वात् ॥ अत एव उदारं परमार्थप्रदं ॥ अथवा ॥ उदारं महत् ॥ झटिति परार्थोप्यकमिति वा ॥ कृष्णकीर्तनत्वात्प्रियजनकथा ॥ वि

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ॥ पौलस्त्यं जयते
हलं कलयते कारुण्यमातन्वते म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ १२ ॥ ॥ब॥ ॥

तत्वाद्येतानि विशेषणानि ॥ उक्तं भाषितमुदितमिति ॥ सारो जन्मनि वसुधिरां शोभ्याप्ये च नीरे च धने च संवरे त्यव सतार मुदीरयंति इति विश्वः ॥ ११ ॥ एवं दशावतारानुक्त्वा संप्रति वर्णनीयं प्रणतिमंत्र अखिलनायकशिरोरत्न श्रीकृष्णाख्यं प्रणमति ॥ वेदानित्यादि ॥ कृषिर्भूवाचकः शब्दो नश्च निर्वृत्तिवाचकः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति सर्वाश्रयः ॥ अखिलपरिप्रणामिहाशक्तिमांश्च कृष्ण इति स्वानन्यमाधुर्येण प्रियजनाकर्षणाच्च कृष्ण इति तद्रूपा चेति कृष्णस्तस्मै निरवधिपरमानंदघनरूपाय स्वप्रियजनैः

पूर्वकथितं लीलासमूहं श्रीकृष्णचंद्रविषयं प्रथयन् प्रणमति ॥ वेदानित्यादिना ॥ श्रीकृष्णाय दशाकृतिकृते तुभ्यं नमः इत्यन्वयः ॥ एवंविधाद्दशविधाद्दशप्रकारा मीनवंधारि वलिलाकृतिकरोति तस्मै दशाकृतिकृते ॥ कृष्णायेति ॥ कृणायिन राकृतिपरब्रह्मणे वा ॥ उक्तं च ॥ कृषिर्भूवाचकः शब्दो नश्च निर्वृत्तिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति ॥ किंभूताय ॥ वेदान्नवा छापनशास्त्रोक्तवंधारिकामप्रकारानुद्धरते लोकेषु विस्तारयते ॥ अन्यथा वा त्स्यायनशास्त्रं निःफलमेवात्र स्यात् ॥ पुनः की० ॥ जगद्रूकवतिसमूहं निवहते विगतसंतापं कुर्वते ॥ पुनः की० ॥ नवनीतिभूः कामस्तस्य गोलः समूहः उद्बिभ्रते धारयते ॥ रासे व्रजमंडलं वा ॥ रासलीला प्रतिबंधकत्वसमीपमागतं शंखचूडाख्यं दैत्यं दारयते विदारयते ॥ अनेन रसैकप्राधान्यमुक्तं ॥ पुनः की० ॥ बलिं त्रिवलिं छलयते व्रजयुवतीनां कामजनितनखक्षतादिप्रदानेन वंचयते ॥ पुनः की० क्षत्रक्षयं कुर्वते ॥ क्षत्रशब्देनात्र क्षत्रसहचरितो वीररसो लक्ष्यते ॥ तस्य क्षत्रस्य क्षयं विनाशं कुर्वते ॥ एतेन सुरते शूरत्वं ध्वन्यते ॥ पुनः की० ॥ पौलस्त्यं जयते पुल महत्वे धातुः ॥ पुलनं पुलः महत्वं तस्य समूहः पौलं ॥ तस्य समूह इत्यण पौलस्त्यायतं संहतं भवत्यस्मिन्निति पौलस्त्यो ब्रह्मानंदः स्यद्वेत्राद्व संघातयोरिति धातुस्तमपि जयते अन्यत् कुर्वते हलं कलयते ॥ हल विलेखने धातुः हलनं हलः विलेखनं नखक्षतादि तत्कुर्वते ॥ कारुण्यमातन्वते ॥ सद्भक्तेषु कृपां विस्तारयते ॥ म्लेच्छ मव्यक्तभाषणं ॥ म्लेछ अव्यक्ते धातुः ॥ अव्यक्तानुस्वाससीत्कारान्मूर्छयते ॥ मूर्छा मोहसमुच्छाययोः इति धातुः ॥ १२ ॥ ॥ब॥ ॥ श्रीकृष्णराधिकाइनमः ॥

गी॰ टी॰ रममाणाय तुभ्यं सुंदराय शृंगाररससर्वस्वभूताय तुभ्यं नमः॥ तथा च श्रुतिः॥ ॥अक्षरात्परतः पर इति प
१७ रास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति च॥ अक्षरादपि चोत्तम इति भगवद्गीतायां॥
नराकृति परब्रह्म सच्चिदानंदविग्रह इति च॥ आनंदचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपत
या कलाभिः॥ गोलोक एव निवसत्यखिलात्मभूतो गोविंदमादिपुरुषं तमहं भजामि॥ ब्रह्मसंहितायां॥ व
क्ष्यति च॥ शृंगारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडतीत्युक्तेनापि॥ साक्षान्मन्मथमन्मथ इति॥ न
नु मीनाद्यवतारवानीश्वरः केशवः के जये शेते एवोदरादीनि यथोपदिष्टानि यथास्थितान्येव सुरिति के
शवः आदिनारायणः॥ उक्तं च॥ एतन्नानावताराणां निधानं बीजमव्ययमिति तस्य स्मृतिः कृते वेदानी
गोपकिशोरं वनविहारिणं किं स्तौषीत्यत आह॥ दशाकृतिकृते तुभ्यमिति मीनादिदशरूपधारिणे तु
भ्यं च नमः॥ अयमर्थः॥ तत्र दशावतारवानीश्वरो नारायण एव सर्वेषां शास्त्रकं ब्रह्मणः॥ नारायणोंऽग
मिति श्रीभागवते॥ अक्रूराय वै कंसदर्शने च नटो नाथमिवेति शुकोक्तिश्च॥ एते चांशकलाः पुंसः कृ
ष्णस्तु भगवान् स्वयमिति प्रथमस्कंधेऽवतारनिर्णये॥ ब्रह्मसंहितायां च॥ विष्णुर्महान् स इह यस्य क
लाविशेष इति॥ अतः परमेश्वरं त्वामेव स्तौमीति॥ इत्थं निश्चित्य उक्तावतारकर्मभिः संक्षेपेण पुनरा १७
ह॥ किं लक्षणाय॥ मीनरूपेण वेदोद्धारं कुर्वते॥ पुनः कीदृशाय॥ जगंति भुवनानि कच्छपरूपेण वह
ते धारयते॥ भूगोलं दंष्ट्राग्रे गोलं वाराहरूपेण उद्बिभ्रते॥ ऊर्द्ध्वं प्रापयते॥ दैत्यं हिरण्यकशिपुं दारयते

नृसिंहरूपेण विदारयते॥ बलिं सैंद्रं वामनरूपेण छलयते वंचयते क्षत्रक्षयं दुष्टानां क्षत्रियाणां नाशं पर
शुरामेण कुर्वते॥ पौलस्त्यं रावणं श्रीरामरूपेण जयते॥ हलं दुष्टनिग्रहाय आयुधत्वेन कलयते बल
भद्ररूपेण धारयते॥ कारुण्यं कृपां आतन्वते बुद्धरूपेण विस्तारयते॥ म्लेच्छान् कल्किरूपेण मूर्छयते इ
त्यर्थः॥ एवं तत्तदवतारकर्मकर्तृत्वेन भगवतः पूर्णत्वं अखिलशक्तिमत्त्वं च प्रतिपादितं॥ आकृतिः
कथिता रूपे सामान्यवपुषोरपीति विश्वः॥ १२॥ ॥एवं भगवत्तत्तदवतारचरितैस्तान्नायकगुणाननुवर्ण्ये
दानीं समस्तनायकचूडामणेः पुरुषोत्तमस्य प्रथमपद्योरहः केलय इत्यनेन संक्षेपतः क्रीडास्त्वपित्रा
संप्रति सखे युक्ता स्वाधीनभर्तृकाबरणेन भगवतस्तस्य लोकोत्तरधीरललितशृंगारित्वादिगुणान्वर्ण्य
न्नेव संगजातरमण्याचरति॥ स्मितेत्यादिना॥ किंच॥ सर्वपूर्णशक्तिमत्त्वेप्यत्रानंदविलासरसमय्याः
शक्तेरेवोद्रिक्तत्वमन्यत्रान्यासां क्वचिद् ज्ञापितत्वाद्वर्णायितासामप्यहं॥ ॥तत्रैव क्रमः॥ ॥धीरोद्धता
वामनपरशुरामादयः॥॥ तल्लक्षणं॥ मात्सर्यदर्पभूयिष्ठश्छद्माहंकारवान् बली॥ चंडो विकत्थमानश्च
धीरोद्धत उदाहृतः॥ धीरोदात्तः स विज्ञेयो रामो दाशरथिर्यथेति॥ शांतो विनीतो धीरश्चेति धीरः शांतः॥
मीनबुद्धादिः॥ विदग्धो नवतारुण्यः परिहासविशारदः॥ निश्चिंतो धीरललितः स्यात्प्रायः प्रेयसीवशः॥
शृंगारी नायकस्त्वन्यः पंचमः कथ्यते यथा॥ विलासवान् नाम धीरः सुभगः स्थितैरवाग्युवा॥ गतिः सधैर्या
दृष्टिश्च विलासः सस्मितं वच इति संगीतराने॥ इत्यादिवर्णनीयगुणवान् नायकः॥ श्रीराधाप्रियः तद्

तेबर्णयति॥गीतस्यास्य गूर्जरीरागः मठ्यताल॥तयोर्लक्षणं॥श्यामासुकेशीमलयद्रुमाणां मृदु
ध्वसत्सध्वबतल्पजाता॥श्रुतेः सुराणां दधतीविभागे तंत्रीमुखादक्षिणगूर्जरीयमिति॥गुरुलघु द्वयंप्र
अनंग तालः सकथ्यते॥मंगलो मंगकोते योरमेवाद्भुतसंज्ञके इति॥अद्भुतकेलिप्रकटनादद्भुतत्वमि
तेति॥ ॥श्रितकमलेति॥ध्रुवपदं॥गीतार्थस्तु॥इदेवदीव्यतीति देवस्तत्संबोधनं॥श्रीराधयासहवि
लासयुक्तेतिवा॥हरेस्वसौंदर्यादिनाखिलभुवनजनयुवतीचित्तचोरजयजय॥एवंविधयाक्रीडया
निजभक्तानूमतिआविर्भवआविर्भव॥अथवाजयजयेतिउदयार्थैः आशीर्वादोसदेवर्येविहवान्उदयेस्तु
तवास्त्येवतथारसिकानक्रेलुकसंदेवदन्यतएव॥तथैवभ्रमस्पदगोचरोपिभवभवेतिभ्रमसमेवाशीर्वादो

श्रितकमलाकुचमंडलधृतकुंडलए॥ कलितललितवनमालजयजयदेवहरे॥ ॥१॥ ॥ ॥

ननुतादृशोन्योपीतिभावः॥अयमभिप्रायः॥सर्वपदेषुध्रुवपदस्यतातव्यः॥अथवायस्मिन्यस्मि
न्पदेयन्निरूपंतथैवअभिप्रायोध्रुवपदस्येतिहेतोरेवप्रतिपदंध्रुवपदस्यनिरूपणं॥तत्रतत्रतत्र
तत्तत्पदानुसारेणज्ञातव्यमिति॥आदरेद्विरुक्तिः॥इदंचध्रुवपदं॥अथपदानि॥श्रितमाश्रितंकम १८
लायाःकामयतइतिसाकमला॥लाआदानेइतियद्वा॥कमलाश्रीवरस्त्रीयोरितिविश्वकोषात्॥वरस्त्री
तेनापिकमलाश्रीराधेवतस्याःकुचमंडलंस्तनरूपमेवदुर्गंकामनयाद्वियेनतादृश॥अनेनसंकलना

यिकाचैर्यंनध्वक्षणंवहूनां॥येधृतकुंडलःधृतेमकराकृतिकुंडलेकर्णाभरणेयेनतादृशः॥अथवा॥तदा
श्रयाधृतेतस्याएवकर्णयोःकर्णाभरणेयेन॥अथवापुष्पादिनातत्कर्णभूषणार्थंनिर्मायोपहारीकृतंकुंडले
येनतादृश॥पुनःकीदृश॥कलितललितवनमालकलिताधृतालललितामनोहराचवनमालाचरणपर्यंत
वलंबीनीमालायेनतादृश॥एतद्विशेषणद्वयेननव्यत्वमुक्तं॥वनमंनसिकाननेइत्यभिधानात्॥पत्रमा
लावा॥आपादभ्रमितांमालांवनमालेतितांविदुरितिस्मृतः॥अथवा॥कलिताधृताललितामनोहराव
नमालापत्रमालावाप्रियायाःकंठेयेनतादृश॥अथवाकलिताऽवगाहिताप्रियामंडनार्थंवनमालाचंप
कादिवनश्रेणीयेनतादृश॥अथवा॥कलिताधृताललितामनोहराप्रियायाःमंडनस्पर्शोत्थसात्विक
भुजैः॥रोमोद्गमसवाष्पायस्वेदांबुबनतागतंइति॥अथवा॥धृताःसंभोगश्रमजजलश्रेणीयेनतादृशः॥
व्यभिचारीभावोयं॥प्रियामंडनार्थंकलितावकुविधनिर्मितावनमालायेनेतिवा॥एतिव्याख्यानैः कृत्स्ना
त्वःकलाविद्विलासीत्यादिगुणाअकथिताः॥स्यान्मंडलंद्वादशः॥राजकेदेशेचविवेचकदेवकेपिच॥
कुष्ठभ्रान्तेस्युपसर्पकेचभुजंगभेदेश्वतिमंडलःस्यादितिविश्वः॥२॥ ॥दिनमणीत्यादिना॥दिनमणिः
सूर्यस्तस्यमंडलोविंबस्ततोऽपिश्रेष्ठः कौस्तुभाख्यःमंडनमलंकारोयस्यतादृश॥दिनमणिवन्मंडनंय
स्येतिवा॥अनेनधनाढ्यइतिनायकगुणःकथितः॥भवखंडनेति॥व्रजराजकुलस्यजन्मनादेवादीनांभ

वंजन्मखंडयसितिरस्करोषीतितथाभूत॥देवा अपिगोकुले जन्म वांछंतीतिभावः॥अथवा नवो रुद्रस्तंगां धर्वविद्यया खंडयसि पराजयं प्रापयसीति तात्पर्यं॥उक्तंच॥विविधगोपचरणेषु विदग्धौ वेणुवाद्यजनुधा निजशिक्षाः॥तवसुतः सतियदाधरबिंबे दत्तवेणुरनयत्स्वरजातीः॥२॥स्वयुनसस्तदुपधार्यसुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः॥कवयआनतकंधरचित्ताः कश्मलंययुरनिश्चिततत्त्वाइति॥प्रियजनानां विरहदुःखादीनांजनवविदारणीतिवा॥एतेनकुलीनः कृपालुविवेकी॥मुनिनेति॥मुनिर्हि त्रिमोनिं तत्र कोजनोगोपीजनस्तस्यमानसंचित्तंतदेवमानसंसरोवरंसरोवरविशेषस्तत्रहंसोमरालः॥सोऽन्याप्य

दिनमणिमंडलमंडन भवखंडन ए॥ मुनिजनमानसहंस जय जयदेव हरे॥२॥

मरलीजयामानादिनावामोनपुरुषायाः श्रीराधायाश्चित्तानिमायावगाहे स्वासक्ताः नन्यगतातत्रैवकृतनिश्चितिमरालेत्यर्थः॥अथवा॥हेमुनिजननेतिपृथक्पदंवा॥मननशीलोमुनिः सचासौजनश्चतस्याः प्रियायाः सौंदर्यादिगुणगणेनसज्जावेत्यर्थः॥हेमानसहंस॥त्यक्तान्यसमस्तहृदिकृतनिवास॥सुनीत्यारम्यैकपदंवा॥मुनिश्चासौजनश्चसचासौमानसहंसश्चेतिद्वंद्वपरंपरितंरूपकमलंकारः॥तदाहुः॥नियतारोपणोपायःस्यादारोपःपरस्ययः॥तत्परंपरितंश्लिष्टेवाचकेभेदभाजिचेति॥मानसंसरसिस्थानइति॥हंसोविहंगमोपिस्याच्चपरमात्मनियोगिनीतिच॥२॥ ॥श्रीराधावल्लभसत्यखे॥

कालियेति॥कालियनाम्नोविषधरस्यगंजनंतिरस्कारक॥अनेनचतुःषष्टिकलाकुशलत्वंदर्शितं॥जनान्मधुरवचनादिनारंजयसीतिजनरंजनेति॥अनेनशुभवचनत्वंकथितं॥अथवासर्वजनंश्रीराधानुकूल्पनानुरक्तं करोषीतिनामेवरणादिनामंडयसीतिवा॥यदुकुलेति॥यदुकुलमेवनलिनंपद्मंतस्यदिनेशःसूर्यतत्प्रकाशकत्वात्॥यादवानांहिताथायेधतोगोवर्द्धनोमयेतिवचनात्॥यदुकुलमित्तिगोपकुलमेव॥आशीविषोविषधरश्चक्रीव्यालःसरीसृपइत्यमरः॥वापुंसिपद्मंनलिनमरविंदंमहोत्पलमितिच॥रंजनेरागजननेरंजनंरक्तचंदनेचेतिविश्वः॥३॥ ॥मधुमुरेति॥मधुमुरनरकाणांवि

कालियविषधरगंजन जनरंजन ए॥ यदुकुलनलिनदिनेश जय जयदेव हरे॥३॥

नाशकारिन्॥गरुडासनगरुडः पक्षिराजः सएवासनमुपवेशनंयस्यतादृश॥अथवा॥मधुर्मधुराख्यस्तं मुरयतिवेष्टयतिस्वजनार्थमावृत्यरक्षतीतिमधुमुरः॥मुरवेष्टने॥इगुपधेतिकः प्रत्ययः तेनचनरकंनराणामितरसुखंविनाशायतीतित्तुच्छीकरोतीत्यर्थः॥उक्तंच॥इतररागविस्मारणंनृणामिति॥गरुडवद्बंधविशेषश्चासनंयस्येतिवा॥अनेनरतिकौशलंकथितं॥सुरकुलेति॥सुरकुलकेलीनामादिकारण॥देवाहिक्रीडन्तुराइतिप्रसिद्धिस्तेरपि त्वत्तएवशिक्षितेतिभावः॥अनेनविजासित्वंसामर्थ्यंचोपपादितं॥सजातीयगणेगोत्रदेहेपरिणतंकुलमितिच॥४॥ ॥४॥ ॥

अमलेति ॥ अमलंयत्कमलंतस्ययद्दलंपत्रंतत्सदृशेलोचनेयस्यतादृश ॥ अनेनापिनव्यत्वमेवो
क्तं ॥ हेभवमोचनभवोजन्मतस्मान्मयत्नान्मोचयतीतितादृश ॥ भक्तानांनित्यविग्रहप्रदानेनतस्मान्नि
स्तनित्यपरमानंदस्वरूपत्वात्भजनीयत्वमुक्तं ॥ अथवा ॥ भवोरुद्रस्तंविप्ररूपेणवृकासुरान्मोचय
तीतितथा ॥ अथवा ॥ अथवाकमलदललोचनादिसौंदर्येणाकृष्यरुद्रसमाधादियोगभवतान्मोच
यतीति ॥ स्वप्रवर्णंकरोतीत्यर्थः ॥ त्रिभुवनभवननिधान ॥ त्रिभुवनेभवनंगृहं ॥ श्रीवृंदावनाख्यंतद
वनिधानंवासस्थानंमहानिधिरितिवायस्यतादृश ॥ निधानंलाजयेतिधाविनिविश्वः ॥ भवनंनावदेनम

मधुमुरनरकविनाशनगरुडासनए ॥ सुरकुलकेलिनिदानजयजयदेवहरे ॥४॥
अमलकमलदललोचनभवमोचनए ॥ त्रिभुवनभवननिधानजयजयदेवहरे ॥५॥

नीरितिच ॥ पत्रंपलाशंछदनंदलंपर्णंछदःपुमानित्यमरः ॥५॥ जनकसुतेति ॥ हेजनकसुताकृ
तभूषण ॥ व्रजजनानांकंसुखंयस्मात्सजनकोजनेषुप्रधानोवा ॥ जनकइतिश्रीरघुनाथस्तस्यसु
ताश्रीराधातस्याःकृतानिभूषणानिअलंकरणानिमकरपत्रकादीनियेनतादृश ॥ जितानिनिजगुणैः २०
स्वस्मिन्तिरस्कृतानिदूषणानियेनतादृश ॥ अनेनसकलकलाकौशलरूपलावण्यरूपत्वनायक
गुणउक्तः ॥ समरशमितदशकंठसमरेरतिरणेशंकाजिताखंमुखंरतिप्रापितंदशसंख्याताना

यिकानांकंठंयेनतादृश ॥ अनेनरतौसामर्थ्यंकथितं ॥ अथवा ॥ समरेसुतसंग्रामेयत्तुशंतेनदत्तापापि
ताकृताजितारव्यादशावस्थानायिकायाःकंठयेन ॥६॥ ॥ अभिनवेति ॥ अभिनवजलधरसुंदर ॥ अभिनवो
नूतनोयोजलधरःसजलोमेघस्तद्वत्सुंदरमहारसवर्षित्वं ॥ अनेनापिनव्यत्वमेवोक्तं ॥ धृतमंदरं ॥ धृ
तोमंदरःपर्वतविशेषोयेनतादृश ॥ अनेनापिसामर्थ्यमेवोक्तं ॥ अत्रमंदरपदेनगोवर्धनएव ॥ यथा
गोपालस्तवेशंकराचार्येणोक्तं ॥ धृतेकमंदमिति ॥ श्रीमुखचंद्रचकोरश्रीमुखःशोभावान्श्रीराधायाः ॥
मुखमेवचंद्रःआल्हादकारित्वात् ॥ तस्यचकोरतदास्वादसर्वस्व ॥ अत्रतस्याःआननचंद्राधरसुधापान

जनकसुताकृतभूषणजितदूषणए ॥ समरशमितदशकंठजयजयदेवहरे ॥६॥
अभिनवजलधरसुंदरधृतमंदरए ॥ श्रीमुखचंद्रचकोरजयजयदेवहरे ॥७॥ ॥

सोत्कंठत्वभगवतश्चकोरत्वेननिरूपणं ॥ अनेनापिरतिकौशलमेवोक्तं ॥ प्रत्ययोभिनवोनवीनवीनोनूतनो
नवइत्यमरः ॥७॥ ॥ एवंसप्तभिःपदेनायिकगुणाःकथिताः ॥ तदुक्तं ॥ त्यागीकुलीनःकुशलीरतेषुकल्यः
कलाविन्नरुणोधनाढ्यः ॥ नव्यःक्षमीस्थिरहविःसुभगोभिमानीस्त्रीणांमतःश्चनवत्वाइहनायकस्यादिति ॥
॥ शृंगारतिलके ॥ इदानींकविःसर्वनायकोत्कृष्टत्वेनश्रीकृष्णंस्तुत्वाप्रार्थयते ॥ तवचरणेमिति ॥ तवच
रणेवयंप्रणताहेकृष्णइतिभावयचिंतयजानीहीतिप्रणतेषुस्मासुकुशलंकुरुविघ्नराहित्यंकुविरुस्
र्थः ॥८॥

गीत० टी० ॥श्रीजयदेवेति॥ इदं जयदेवकवेर्मंगलं गीतविशेषः मुदं कुरुते॥ कीदृशं॥ उज्वलं दोषरहितं गीतं यस्य॥ तादृशं॥ गीतमिति पाठे स एवार्थः॥ गीतदोषास्तु नरते॥ शंकितं भीतमुद्घृष्टमव्यक्तमनुनासिकं॥ काक-
२१ स्वरं शिरकं पंतथा स्थानविवर्जितं॥ विस्वरं विरसं चैव विश्लिष्टं॥ व्याकुलं तालहीनं च गीतदोषान्विदुर्बुधा
इति॥ प्राकृतगाने एते दोषा न तु भगवज्ञाने तत्तु यथा कथंचिदपि गायंति तित् उज्वलपदेनैव सर्वदोषानि-
रस्ता इत्यर्थः॥ अथवा॥ मंगलं इष्टप्रतिरूपमंगलारवत्स्वालो वेति संगतं॥ ९॥ पुनर्नायिकायाः सौभाग्यो-
द्रेकं निरूपयन्नाशीरूपं मंगलमाचरति॥ पद्मेति॥ मधुसूदनस्योरः हृदयं वो युष्माकं प्रियं वांछितं॥ वितनु-

तव चरणे प्रणता वयमिति भावय ए॥ कुरु कुशलं प्रणतेषु जय जयदेव हरे॥ ८॥
श्रीजयदेवकवेरिदं कुरुते मुदं॥ मंगलमुज्वलगीतं जय जयदेव हरे॥ ९॥ ॥

रय तु पूर्णं करोतु॥ प्रतिक्षणं ददात्वित्यर्थः॥ नित्यविलासासक्तत्वात्॥ तद्विशेषेण विशिष्टस्य दातृत्वसामर्थ्यं
वांछितमपि तत्प्रियाणां तदेव रसानुभावमिति ध्वनितं॥ मधुररसास्वादनलोपतेन मधुसूदनपदोपादानं॥
कीदृशमुरः पद्मा निविशते यस्याः सा पद्मा श्रीरादिर्यो वृत्तत्वात्॥ पद्मगुणयोगाच्च पद्मेति॥ पद्मकोटि- २१
संगंधवती॥ पद्मा सौभाग्यपरिमलख्यापनाच्च सौकुमार्यसौंदर्यादिगुणैरपीति तस्याः पद्मायाः परमप-
त्न्याः श्रीराधायाः पयोधरतटीस्तनप्रांतस्तस्याः परिरंभेणालिंगनेन लग्नं यत्काश्मीरं कुंकुमं तेन मुद्रि-

तं मुद्रांकितविशेषस्तु कुंकुममित्यर्थः॥ इदं मधुसूदनस्य हृदयं ममैवेत्यनन्यस्पृहेति ख्यापनाय निजस्तनतटीलि-
खितकाश्मीरेण मुद्रेव दत्तेति भावः॥ तथा च पयोधरयोस्तटीपरिरंभेण नायिकायाः कामतारख्यापनेन तस्या
दृढ्धीप्रतिपाद्यते॥ पुनः कीदृशं॥ खेलन्क्रीडां कुर्वन्नुच्चनंगः कंदर्पस्तस्मात् खेद आयासः सुरतश्रमः ते-
न यत्स्वेदांबुप्रस्वेदजलं तस्य पयः पूरः प्रवाहो यत्र तादृशं॥ एतेन काश्मीरस्य प्रस्वेदसंबंधेन मुद्रायोग्यत्वं सं-
भोगातिशयत्वं च ध्वनितं॥ कीदृशमिव॥ व्यक्तानुरागमिव॥ व्यक्तः प्रकटीभूतोऽनुरागस्नेहो यत्र तादृशमि-
व॥ तद्विषयकानुरागाधिक्याद्स्यांतरसमावेशाभावात् कुंकुमरागव्याजेन बहिर्निस्सृत एवेति भावः॥ मुद्रासं

पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य॥ व्यक्तानुरागमिव खेलदनंगखेद
स्वेदांबुपूरमनुपूरयतु प्रियं वः॥ ९॥ जाताऽस्येति मुद्रितमिव तारकादित्वादितच्॥ एरोऽञ्जलप्रवाहे स्या-
त्पाणिसंपुटदिवा तयोरिति विश्वः॥ श्रीस्तनाद्यौ पयोधराविति॥ कंदर्पो दर्पकोऽनंग इत्यमरः॥ पद्मिनीलक्षणं
कमलमुकुलमृद्वी फुल्लराजीवगंधिः सुरतपयसि यस्याः सौरभं दिव्यमंगे॥ चकितमृगदृशाभे प्रांतरक्ते च
नेत्रे स्तनयुगलमनर्घश्रीफलश्रीविडंबि॥ तिलकुसुमसमानां बिभ्रती नासिकां च द्विजगुरुसुरपूजा श्रद्दधा-
ना सदैव॥ कुवलयदलकांतिः कापि चांपेयगौरी विकचकमलकोशाकारकामातपत्रा॥ व्रजति मृदुसलीलं
राजहंसीव तन्वी त्रिवलिकलितमध्या हंसवाणी सुवेषा॥ मृदु शुचि लघु भुंक्ते मानिनी गाढलज्जा धवलकुसुम

वासोवञ्चनापरिमिनीस्यादिति॥ तस्माच्च लौकिकगुणानां वर्णनात्राम्यादितेजोक्ताद्वैनेकथ्यंत इतिसिद्धांतः
॥९॥ ॥एतावता ग्रंथेनाभिधेयप्रयोजनकेलिवर्णनोपयुक्तनायकगुणप्रतिपादनपुरस्सराणि मंगलानि

विधायकविः शृंगाररसप्रधानं नगवत्केलिवर्णनं चिकीर्षुस्तत्र प्रथमावसरसंक्षिप्तकेलिं निर्वाह्यविशेषक्री
डामारब्धुमिच्छतोः परमप्रियतमयोः कदापि निमेषमात्रमपि विप्रलंभमनिच्छतोः श्रीराधामोहनयोः संयो
गरसपोषणाय रसयोगादेव विप्रलंभाख्यशृंगाररसाविनेविजाते प्रथमं तावच्छृंगाररससर्वस्वनूतायाः ना
यिकायाः श्रीरिता निवर्णयितुं प्रस्तावयति॥ वसंत इत्यादि॥ तत्र संयोगोत्कर्षप्रति विप्रलंभस्योपादानेः वं

वसंते वासंती॥ कुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुविहितकृष्णानुसरणां॥ अमंदं कंदर्प
ज्वरजनितचिंताकुलतया वलद्बाधां राधां सरसमिदमूचे सहचरी॥ १०॥

कारिका॥ संयोगो विप्रलंभेन
नविना पुष्टिमश्नुते॥ कषायितेहि वस्त्रादौ भूयान्रागोभिजायते इति॥ किंच॥ रसयोगादिति पूर्वोक्तं
तत्र शृंगाररसानुभवमिच्छामीति नित्येच्छाज्ञानचिकीर्षाकृतिमत्वमीश्वरत्वमिति तस्य नगवतः नित्ये छ
येव रसनियामकत्वे नापि नित्यानंदज्ञानक्रिमतत्वस्य नस्वातंत्र्यभंग इति सिद्धांतः॥ उक्तंच॥ ससत्यकाम इ
ति॥ एवं नित्येच्छया कालव्यवधानो निरस्तः॥ श्लोकार्थस्तु॥ कांचित्सहचरी तुल्यव्यसना सखी वसंते सरसं
रसोद्बोधसहितं यथा स्यात्तथेदं राधां इदं वक्ष्यमाणं ऊचे उवाच॥ कास स्यात्वा चेति ललितेतिव कुंत्र ष्टेमुख्या

स्तन्नामान्याह॥ ललिता विशाखा नंदा जयंती विजया नया॥ सुमुखी सुनगा चेति राधासख्यः प्रकीर्तिताः॥
कीदृशी॥ अवयवैरंगैरुपलक्षितं॥ कीदृशैरवयवैः॥ वासंतीकुसुमसुकुमारैः माधवीलतापुष्पवत्को
मलैः ततोपि मृदुलैरित्यर्थः मार्दवं कोमलस्यापि स्पर्शासहिष्णुतोच्यते॥ तद्यथा॥ अजिनवनवमालिका
मयं सारायनवरंवरराधिस्त्रीष्मि॥ नकुसुमपटलं दरापिनशैनदतुनवान्तरतुरेवसब्रणासीदति॥ नशी
स्तानिं नप्राये त्यर्थः॥ पुनः कीदृशी॥ कांतारे महारण्ये भ्रमंती॥ तत्र हेतुगर्भितं विशेषणमाह॥ बहुवि
हितेति॥ बहुवारं वारं विहितं कृतं कृष्णस्यानुसरणमन्वेषणं यया तादृशी॥ तत्र हेतुगर्भं विशेषणमा
ह॥ कंदर्पज्वरेण जनिता या चिंता तत्कृता या व्याकुलता व्याकुलतात या अमंदं अधिकं यथा स्यात्तथा वलद्बा
धां वर्द्धमानपीडां॥ अवयवैरित्यत्र जगन्निस्तापस इति वहिर्विशेषणे तृतीया॥ रहारण्ये दुर्गपथे कांतारः पुं
नपुंसक इति च॥ पीडा बाधा व्यथा दुःखमित्यपि च॥ तथा चाभिलाषचिंता रूपदैन्ये कथिते॥ तल्लक्ष
णं॥ अभिलाषं स्पृहा तत्र कामे सर्वांगसुंदरे॥ दृष्टे श्रुतेथ तत्रापि विस्मयानंदसाध्वसा इति॥ यथा दन्ना
रूपके॥ कथं सवक्ष्ये नः प्राप्स्य किं कुर्याम सिद्धये॥ कथं न वेदसौ वस्य इति चिंता नवेदिति शृंगारतिल
के॥ सुकुमारावयवैः कांतारे भ्रमंती मिलनेनाभिसारे खेदं सौष्ठवं दर्शितं॥ तद्यथा॥ विचित्रकीणदिपि वि
षधराड्ढाति नाजोरजन्यां किं वा नूनमस्त्वद्भिसरणे सा संभाधवास्याः॥ ध्वांतेयांतायदृति निरंतं राधया त्म
प्रकान्त्याचासासाणिः पथि फणिफणारत्नरोधिव्यधायि॥ २॥ यथा वाद्वित्रैः केलिसरोरुहं विचतुरे

धम्मिल्लमध्ये स्वर्णकंकणमौक्तिकमालिकां तदनु चत्यक्त्वापदेः पंचभिः॥ कृष्णप्रेमविवर्णितां तरलतया हृ
रात्रिसारानुरागतत्वं गीनिरुपायमधुनि परंश्रोणीनरंजितं तानि॥ अथवा॥ अमंदं कंदर्पकरजनितचिंता
कुलतया बहुविहितं कृष्णेनानुसरणं यस्यास्ता हरणी॥ अतः कांतारे भ्रमंतीमित्यर्थः॥२०॥ ॥किमूचे
इत्यत आह॥ ललितेत्यादि॥गीतस्यास्य वसंतरागो यतिताल॥ तयोर्लक्षणं॥ शिखंडिबर्हस्थितवद्ध चू
डः पुष्पन्नूपिकं चूतलतांकुरेण॥ भ्रमन्मुदावासमनंगमूर्तिर्मतोमतंगेव वसंतराग इति॥ लघुद्रुतौ ता
लश्चेति॥ ध्रुवपदे॥गीतार्थस्तु सा वाधांराधांमहौषधं वचः सखीवक्ति॥ हे सखि राधे इह अचैव श्रीमद्वृंदाव

ललितलवंगलतापरिशीलनकोमलमलयसमीरे॥ मधुकरनिकरकरंबितकोकिलकूजितकुं
जकुटीरे॥ विहरति हरिरिह सरसवसंते॥ नृत्यति युवतिः जनेन समं सखि विरहिजनस्य दुरंते॥१॥

ने सरसवसंते रसः शृंगारस्तेन सह वर्त्तत इति सरसः शृंगारोद्दीपकत्वात्॥ सरसश्चासौ वसंतश्च सर
सवसंतस्तस्मिन्॥ तादृशे समये हरिः श्रीकृष्णः विहरति क्रीडति॥ कसतिसमं सत्वो तेन साकं वा युवतिज
नेन नृत्यति सति॥ किंभूते वसंते॥ मिलनार्थहेतुगर्भं विशेषणं॥ विरहिजनस्य दुरंते न इति न अपि तु दु
रंते एवेति काकु दुरंते दारुणे॥ दुःखेनांते समो निर्यस्य तादृशे वा निरवधा वित्यर्थः॥ अथवा॥ अतो जीव
नेन समं दुरंते॥ अथवा हरिरिह सरसवसंते बहुप्रेम्णा निस्तुनेन दूपाक्षन्मादिते युवतिजनेनापांग

नागरो नृत्यति स त्वपि त्वया सह नृत्यसि खुल्लाभिः समं न विहरति॥ केचित्तु हरिरिह सरसवसंते युवतिज
नेन समं विहरति नृत्यति चेति व्याकुर्वंति तत्तु राधाभिसारायेसख्या अत्र स्पृहोत्वकथनान्न संगच्छते॥ न तु
प्रथमानुरागः स्यात् सोपि न वर्त्तते॥ पूर्वक्रीडावर्णनात्॥ वक्ष्यति च॥ रासे हरिमिह विहितविलासं॥
स्मरति मनो मम कृतपरिहासमिति॥ अतोत्र कृतं व्याख्यानमेव सिद्धं प्रकृतिमनुसरामः॥ ताभिः समं न
विहरतीत्यत्र हेतुः॥ विरहिजनस्य त्वद्विरहितस्य कृष्णस्य क्षणमपि जनस्य दुरंते॥ ताश्च वसंतश्च त्वां विनानंत
स्य विलासो त्वा हे प्रदातवे तीत्यर्थः॥ अत एव तामेव कामयतीति भावः॥ विहरतीत्यनेनापि श्रीराधान्वेष
णरूपो विहार उच्यते॥ मिलनसंकोचपरिहाराय सामान्ययुवतीनां संगम इत्युक्तम्॥ तथा च यदि त्वं प्रि
यतमं तमनुसरिष्यसि॥ तदायं वसंतस्तस्य तव पि दुरंतो न विष्यतीति ध्वनितं॥ सम्यं सहेत्य मरः॥ ध्रुवप
दमिदं॥ अत्र द्वादशलक्षणाभितानि स्पष्टार्थाहृती सखी एव॥ तदुक्तं॥ प्रकृतिकुशला दक्षा गूढमंत्रा हृद
प्रिया॥ स्वतंत्रा विधवा दासी दूत्यश्चेति ता सखी॥ माला कारादि नारी च कार्यहृतीह सिद्धये॥ तस्याः कृष्णा
नि॥ यथा॥ कालचिंतीत्यमानिता सुवेषा हृष्टमित्रता॥ धृष्टा नेत्रदृशा सुखी श्रीजा वद्व्रताचापल्य वर्जिता श्रु
ड्राप्यनुद्विग्ना प्रशस्या द्वादशैवेत्ति॥ किंच॥ विलासिनो श्चासां अमर्षतात्यायते तथा अनुरूपाविमौ
तिष्ठाकलष्पानुरूपकृत॥ निसृष्टार्थेति सा ज्ञेया कौतूहलसमन्वितेति॥ तथा च समविं शतिदूतीकर्माणि
॥यथा॥ प्रोत्साहनं॥ अर्थसंदर्शनं॥२॥ गुणकथनं॥३॥ विस्मरणं॥४॥ तदनुरागाख्यापनं॥५॥ कलानि

वेदनं ॥६॥ शौर्यप्रकटनं ॥७॥ वक्रमित्रता ॥८॥ सुवेषता ९ दुःखसहिष्णुता ॥१०॥ मधुरवाग्वादिता ॥११॥
गूढमंत्रिता ॥१२॥ सौख्यावगतिः १३ स्वच्छंदानुवर्त्तिता १४ उपायज्ञता ॥१५॥ कालज्ञानवेदिता ॥१६॥ देशा
विवेकता ॥१७॥ स्वनाशता १८ सर्वकर्मकुशलता १९ दोषाच्छादनं २० गुणनिरूपणं ॥२१॥ सौंदर्यसंग्र
२२ पिशुनवाक्यराहित्यं २३ मृदुभाषणं २४ अर्थप्रदानकथनं २५ विवेचितसंज्ञायनं ॥२६॥ परतत्त्वज्ञा
नं चेति ॥२७॥ तत्र कालज्ञता प्रोत्साहनार्थं इत्यनि दिगुणान् प्रदर्शयिंतावसंतस्य सरसतामाह ॥ ललिता
मनोहरया लवंगलतातस्याः परिशीलनेन परितः शीलनमालिंगनं तेन कोमलोम्र्दुलोमलयसमी
रोमलयाचलसंबंधीवायुर्यत्र तादृशे ॥ एतेन वायोस्त्रैविध्यमुक्तं ॥ लवंगलतानामिकायोगात् ॥ समी
रस्योद्दीपनता कथिता ॥ अन्योद्दीपनविभावानाह ॥ पुनः कीदृशे वसंते ॥ मधुकरनिकरेण
भ्रमरसमूहेन करंबिता मिश्रिता ये कोकिलाः तैः कूजितः मधुरशब्दयुक्तः कृतः कुंजकुटीरो लताकु
टीयत्र तादृशे ॥ शीलमालिंगनेसमे इति विश्वः प्रकाशः समीरमारुतमरुज्जगत्प्राणसमीरणा इत्यम
रः ॥ मधुव्रतो मधुकरो मधुलिन्मधुपालिन इति च ॥ स्तोमौघनिकरव्रातवारसंघातसंचया इत्यपि ॥ मि २४
श्रिते करंबित इति शाश्वतः ॥ अल्पकुटी कुटीरः स्यादित्यपि ॥१॥ वसंतस्य दुरंततामाह ॥ उन्मदेत्यादि
उन्मद उद्दीपमदनीयत्र उक्तौ मदमदनौ यस्मिन्निति वा ॥ तादृशो मनोरथो येषां तादृशा ये पथिकानां
वधूजनास्तैः जनितो विलापो यत्र तादृशे ॥ पुनः कीदृशे ॥ अलिकुलैः भ्रमरसमूहैः संकुलो व्याप्तो यः

कुसुमसमूहस्तेन निराकुलो निःशेषाकुलो व्याकुलो वकुलकलापः केसरसमूहो यत्र तादृशे ॥ अथ
वा ॥ तादृशाः वकुल एव कलापो भूषणं यस्य ॥ कलापो भरन्यारतूणीरयो ॥ संकुलेवाप्यवद्धार्थेविस्पष्टा
र्थे वचस्यपीति विश्वः ॥ केसरे बकुलं इत्यमरः ॥ कलापो भूषणे बर्हे तूणीरे संहतावपीति च ॥२॥ मृगम
देति ॥ पुनः कीदृशे ॥ मृगमदस्य कस्तूरिकायाः यः सौरभरभसः सौरभवेगस्तस्य वशंवदा आयत्तावाद्दिनी न
वदलमालाः नूतनपत्रपंक्तिर्येषां तादृशास्तमालायत्र तादृशे ॥ पुनः कीदृशे ॥ युवजनानां तरुणजना
नां हृदयं विदारयंतीति युवजनहृदयविदारणास्तादृशा ये मनसिजस्य कामस्य नखास्तेषामिव रुचि दृशि

मृगमदसौरभरभसवशंवदनवदलमालतमाले ॥ युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले
उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ॥ अलिकुलसंकुलकुसुमसमूहनिराकुलब ॥३॥
कुलकलापे ॥३॥

श्रियेषां तादृशा ये किंशुकाः पलाशकुसुमानि तेषां जालं समूहो यत्र तादृशे ॥ किंशुक
जालानि पलाशकलिका इति वा ॥ अत्र पलाशकोरकस्य वक्रत्वेनारक्तत्वेन च हृदयविदारणादुधिराक्त
मनसिजनखस्य सादृश्यं नखसौंदर्यं च कथितं ॥ मृगनाभिर्मृगमदः कस्तूरी चेत्यमरः ॥ रभसो वेगहर्षयो
रित्यमरः ॥३॥ ॥ मदनमहीति ॥ मदन एव महीपतिस्तस्य यः कनकदंडः सुवर्णयष्टिः तच्छत्रदंडस्तस्येव रु
चिर्यस्य तादृशस्य केसरस्य नागकेसरपुष्पस्य विकाशः प्रकाशो यत्र तादृशे ॥ अत्र कनकदंडशब्देन क

नकदंडयुक्तंछत्रमितिवामहीपतिनाऽस्माहवयन्ति॥ अथवा॥ विरहिणांदंडनार्थंदंडइव॥ पुनः कीदृशे॥ मि
लिताःशिलीमुखाः भ्रमराएवशिलीमुखाबाणायस्मिन् तादृशंयत्पाटलिपटलंपाटलपुष्पसमूहस्तेन कृत
स्मरतूणीरस्यकंदर्पतूणीरस्यविलाससच्छविर्यत्रतादृशेअत्रपरममर्मव्यथाजनकत्वेनभ्रमराणांबा
णसाम्यं॥ चांपेयः केसरः कांचनाह्वयइत्यमरः॥ अलिबाणेशिलीमुखाविति च॥ समूहेपटलंनान्येत्य
पि॥ तूणोपासंगतूणीरनिषंगा इत्यपि॥ ४॥ विगलितेति॥ विगलितंविशेषेणगलितंलज्जितंलज्जायस्य

मदनमहीपतिकनकदंडरुचिकेसरकुसुमविकाशे॥ मिलितशिलीमुखपाटलिपटलकृतस्मरतू
णविलासे॥ ४॥ विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे॥ विरहितिकृंतनकुंतमु
खाकृतिकेतकिदंतुरिताशे॥ ५॥
तादृशस्यजगतः प्राणिगणस्यविलोकनेनदर्शनेनतरुणकरुणे
: नवीनकरुणदृक्षैः पुष्पविकाशव्याजेनकृतोहासोयत्र तादृशे॥ अत्रहास्यरसश्वेतत्वात् पुष्पविकाश
साम्यं॥ यदाहभरतः॥ श्वेतोहासः प्रकीर्तितः इति॥ अथच॥ तरुणकरुणेरित्यनेनवृंदावनवृक्षादीनांबिस
कारुण्यमेवप्रतिपाद्यते॥ नगवत्प्रियत्वात्॥ अथवा॥ विगलितलज्जितानांजगतांवियोगिजनानांदर्श
नेनतरुणैरधरिवियोगिभिः करुणंकरुणरससहितंयथास्यादेवंकृतोहासोयत्रतादृशे॥ हाविरहिणो
वराकाः कष्टंप्राप्नुवंतिकरुणाः लज्जांहित्वाविलपंतीतिचहासस्तेषामितिनावः॥ वाखारसानलिज्ञा २५

एवदृक्षाः परमचैतन्येपिकृतसंवरणाः॥ यतस्तरुणेत्युक्तं॥ अथवाविगलितंविनिः कोकिलादिभिः पक्षिग
णैः शब्दायमानैःगलितंअविस्वजितंअतएवलज्जितंगच्छतीतिजगत्॥ पथिककुलम्॥ विनिःगलि
तंचतत्लज्जितंचततजगच्चेतिसमासः॥ तस्यावलोकनेनतरुणैः संयोगिभिः कारुण्येनकृतोहासो
यत्रतादृशे॥ पुनःकीदृशे॥ विरहिणांवियोगिनांकृंतनायविदारणायकुंतमुखाकृतिकुंताग्रधवि
शेषस्तस्यमुखंअग्रभागस्तस्यइवआकृतिर्यस्यतादृशंयत्केतकंतेनदंतुरिताव्याप्ताविषमीकृतावा
आशादिशोयस्मिन् तादृशे॥ कचित्केतकदंतुरिताशाइतिपाठः तदायाकारोकस्तोकचिदित्यत्रकु
चिद्गृहणस्यलज्जातुरोधार्थत्वात् कृतकस्तेनकेतकीशब्देनसमर्थनीयः॥ लज्जितेत्यत्रनपुंसकेभावे
क्तः कृतिच्छेदनेइतिकृत्तोनुवंधोप्यस्तीतिकेचित्॥ तस्यपुट्प्रत्ययांतस्यनिकृंतनमितिप्रयोगःसा
धुः॥ करुणास्तुरसेवृक्षेकृपायांकरुणामतेइतिविश्वः॥ प्रासस्तुकुंतइत्यमरः॥ निश्चेत्रतेतथाव्यामे
दंतुरंकथ्यतेबुधैरितिधरणिः॥ आशातस्मादिशोरितिविश्वः॥ ५॥ माधविकेति॥ पुनःकीदृशे॥ माध
विकायाः वासंत्याः परिमलेनसौरभेणललितेमनोहरे॥ श्लेषेणमाधवस्यैवंमाधविकानायिकातस्याः
परिमलेनकोतविमर्दसौरभेणललितेमनोज्ञे॥ उक्तं॥ आलिंग्यैवप्रियंयातिकामनिर्जितचेतसा॥ स्फु
रतिप्रयुक्तिरचनामाधवीनायिकासेति॥ माधवशब्देनवसंतएवनायकः॥ कृतसंगमायतांत्वरयति
विनावोढकथनेनचेतिध्वनितं॥ पुनःकीदृशे॥ नवमालिकयानवमालिकपुष्पैः अतिसुगंधेअति

न्नामेनसौरनयुक्ते॥ पुनः कीदृशे॥ मुनिमनसामपिमोहनकारिणिमोहनजनकेऽन्येषांकिंवक्तव्यमित्य
पिशब्दार्थः॥ तथाचमानेमुनिदृशानांमानिनीनांमोहकारिणीतिध्वनितं॥ पुनः कीदृशे॥ तरुणानांविला
सियुवजनानांमकारणबंधौ॥ स्वाभाविकमित्रेपरमानंदप्रदइत्यर्थः॥ नवमालिकजातीतिपाठेन
वमालिकंनवमालिककुसुमंचजातिश्चेतिउभाभ्यामित्यर्थः॥ विमर्देऽपिपरिमलोगंधेजनमनोहरइत्य
मरः॥ ६॥ स्फुरदतीति॥ पुनः कीदृशेवसंते॥ स्फुरंतीकंपमानाऽत्रोन्नमानावायाअतिमुक्तलतावासंती

माधविकापरिमललतितेनवमालिकजातिसुगंधौ॥ मुनिमनसामपिमोहनकारिणितरुणाका
रणबंधौ॥ ६॥ स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते॥ वृंदावनविपिनेपरि
सरपरिगतयमुनाजलपूते॥ ७॥

तनातस्याः परिरंभणेन आलिंगनेनमुकुलितः पुलकितः मु
कुलितंमुकुलंतदेवपुलकोरोमांचस्तद्युक्तश्चूतआम्रोयत्रतादृशे॥ अत्रकांतस्यसंगरसेनसात्विको
द्रेकात्कंपमानायालतानायिकायाः परिरंभणेनचूतनायकस्यापिरोमोद्गमेनाचेतनयोरपिकामोन्मे
षकथनेनः॥ तेनवसंतस्यातिदुरंतत्वंकथितं॥ तथाचातिमुक्तपदेनातिशयमुक्तानामपिपरिरंभणेऽ
नुरागमितिध्वनितंअतिमुक्तायाःकस्याश्चिद्भगवन्माधुर्यनिरालंबस्यायास्तदुपासनार्थंवृंदावनेल २६
ताऽऽरूपत्वमितिवा॥ तदाअतिमुक्ताचासौलताचेतिसमासः॥ अनेनातिमुक्तैःवैकुंठवासिभिरपिवृं

दावनेलतात्वंस्पृहणीयमित्यस्यमाधुर्यमत्रनिरूपितं॥ उक्तंच॥ आसामहोचरणरेणुजुषामहंस्यांवृंदाव
नेकिमपिगुल्मलतौषधीनां॥ एतावतावसंतस्यसरसतांदुरंततांचोक्त्वासंप्रतिक्रीडायाःस्थानविशेषमाह
वृंदावनेत्यादि॥ वृंदावननाम्निविपिनेहरिर्विहरतीत्यन्वयः॥ कीदृशेविपिने॥ परिसरेसमीपप्रदेशेपरि
तः सर्वतोगतेनव्याप्तेनयमुनायाजलेनपूतेपवित्रे॥ परिसरपरिगतंचतत्यमुनाजलंचतेनपूतंयत्रत
स्मिन्निति वा॥ पावनस्ययमुनाजलस्याप्यधिकपावनत्वेनकिंवक्तव्यंतस्यावनत्वमित्यर्थः॥ तथाच॥ रसो
यः परमाधारः सच्चिदानंदलक्षणः॥ ब्रह्मेतिउपनिषद्गीतंसएवयमुनाऽस्वयमितिवचनात्॥ एवंत
न्महिम्नोपलक्षितायास्तस्याः पावनत्वेनातिमुक्तैः स्पृहणीयत्वंतस्यसिद्धमितिदर्शितं॥ पावनत्वमत्र
भगवद्रसविशेषानुभवानुच्यते॥ ननुपापमात्रक्षयादि॥ वृंदमवतीतिवृंदावनं॥ चंपकादिवृंदंगोपीवृं
दंवा॥ तन्मभगवत्केलिसुखसंपादनात्॥ अतिमुक्तः पांडुकस्यासंतीमाधवीलतेत्यमरः॥ पर्यंतभूपरिस
रइति॥ ७॥ ॥ संप्रतिगीतार्थमुपसंहरन्स्वभणनेरुत्कर्षमाह॥ श्रीजयदेवेत्यादि॥ श्रीजयदेवकवेरिदं
भणितंउदयतिरजते॥ अयनिजयपदितात्परस्मैपदं॥ तत्रहेतुः हरिचरणयोःस्मृतिस्मरणं तेनसा
रंश्रेष्ठं॥ अथवा॥ हरिचरणस्मृतिरेवसारोयत्रतादृशं॥ पुनः कीदृशं॥ सरसंशृंगाररसप्रधानवसंतसम
यसंबंधिनोवनस्यवर्णनंयत्रतादृशं॥ अतएवानुगतमदनविकारं॥ अनुगतः संबद्धोऽनुसृतःमद
नस्यविकारोयत्रतादृशं॥ अथवामदनः श्रीकृष्णस्तस्यविकारःभावोद्रेकः राधांप्रतिसख्याः वर्णनेना

नुगतो यस्मिन्नमी रितेतादृशं॥ मदनसंबंधिविकारोनुगतः श्रोतृहृदियस्मात्तदिति वा॥ सरसवसंतसम यवनवर्णनमिमस्यविशेषणंवा॥ अनुगतमदनविकारमिति वा॥ ८॥ ॥इहहिअस्मिन्नेववसंतेधंगंवाहो वायुश्चेतोदहति॥ अथविरहिणां॥ किंकुर्वन्॥ काननानिवनानि वासयन्॥ सुरभीकुर्वन्॥ कैः दरईष द्विदलिताविकसितायामल्लीवल्लीमालतीतस्याःसकाशात्तत्रचंचंतः उद्गच्छंतः येपरागाः पुष्परेणवस्तएव प्रकटिताः पटवासाः पिष्टातकास्तैः॥ कीदृशोगंधवाहः॥ केतकीगंधबंधुः॥ केतकीसौरभचारी॥ पुनः कीदृ

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारं॥ सरसवसंतसमयवनवर्णनमनुगतमदन विकारम्॥ ८॥ ॥दरविदलितमल्लीवल्लिचंचत्परागप्रकटितपटवासैर्वासयन्काननानि॥ इहहि दहति चेतः केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः॥ ८॥

शः प्रसरतः॥ प्रतिदिशंसं

चरतो ऽसम —णप्राणवत्प्राणसदृशः॥ अथवाप्रसरताअसमबाणेनमाणबान् शक्तिसंपन्नोयोगं धवाह इत्येकमेवपदं॥ अथवा॥ किंभूतंचेतः प्रसरतः अर्थात्मनोरथंप्रति॥ असमबाणप्राणवत्॥ का मस्यजीवितमिव॥ ईषदर्थेदराव्ययमितिविश्वः॥ परागः पुष्परजसीतिच॥ पीष्टातः पटवासकइत्यमरः॥ गंधवाहानिलाशुगाइतिच॥ ८॥ ॥अद्युत्संगेत्यादि॥ श्रीखंडशैलानिलोमलयपर्वतसंबंधीपवनः इच्छा चलेईशस्यमहादेवस्यअचलंपर्वतंहिमाचलंअनुसरति॥ कस्मादिव॥ नदिहिमाद्रिंकिमितिव्रजती २१

त्यतआह प्रालेयेत्यादि॥ प्रालेयंतुषारस्तस्यप्लवनमवगाहनंतस्येच्छयाअत्रसर्पैः कवलितोक्षीणस्यपव नस्यतद्विषसंपर्कादधिकंविरहिणांसंतापकरत्वंध्वनितं॥ बरुकतस्कंदक्षिणवायोः शीतजलात्सुखकर त्वाच्चविरहिणांदुःसहपरिणामेनसर्पविसनूहिमाप्लवनमितसाक्षोत्वाः॥ नकेवलमिदमेवदुःसहंसेवंतेअप रमपीत्याह॥ किंचेति॥ पिकानांकोकिलानांकुहूः कुहूरितिगिरः कुहूः कुहूरित्येवंरूपाः शोबाजन्मीलं प्रकटीभवंति॥ कीदृशाः कलोत्तालाः कालाः अव्यक्तमधुराः॥ उत्तालाउद्भटाः॥ कस्मात्॥ स्निग्धयोरसा

अद्युत्संगवसद्भुजंगकवलक्लेशादिवेशाचलं प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः। किंचस्नि ग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलंति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः॥ ९॥

ला: आम्रवृक्षाः तेषांयेमौलयअग्रभागास्तत्रयानिमुकुलानितानिआलोक्यवीक्ष्ययोहर्षस्तस्यउदयः आनंदस्त स्माविनविल्लस्मात्॥ अत्रकचिदद्युत्संगेतिपाठः॥ तदाअद्यवसंतइत्यर्थः तुषारस्कहिनंहिमंप्रालेयंमिहि काचेत्यमरः उत्तालोहेमकुंडेस्यादुत्कटेचोत्कटेचंडउत्करे॥ श्रेष्ठेपिविकरालेपिस्यादुत्तालः प्लवंगमइतिवि श्वः ९ संप्रतिवसंतदिवसानामपिदुरंतत्वमाह उन्मीलदित्यादि॥ वसंतसंबंधिनोवासरादिवसाः पथिकैः कथंकथमपिमहताकष्टेननीयंतेसमाप्यंते॥ कीदृशावासराः उद्गीर्णः प्रकटीकृतः कर्णज्वरः श्रीत्रसं तापोयेषुतादृशाः कैः॥ उन्मीलंतिप्रकटीभवंतियानिमधूनिगंधाश्चतेषुलुब्धालोभाभ्रमरास्तैः

व्याधूता कंपिता ये चूतांकुरास्तैः॥ तदुक्तं॥ वसंते पंचमं वदति कोकिल इति॥ उद्दीपनविभावोद्दीप्तिः
॥केन प्रकारेण नीयंत इत्यत आह॥ ध्यानेनेत्यादि॥ ध्यानेन स्वप्रियाचिंतनेन यद्वा ध्यानं तत्परता तेन क्षणं
प्राप्तो यः प्राणसमाया जीविततुल्यायाः कांतायाः समागमस्तेन पीरसाः स्वादुत्पन्नो येनोल्लासोत्साहास्तैः
पथि कृविशेषणं वा॥ कीदृशैः ध्यानावधानेन क्षणं प्राप्तो यः प्राणसमायाः समागमस्तस्मिन्नुल्लासो ये
षां तादृशैरिति॥ अनेन श्रीकृष्णस्यापि प्रियाध्यानं निकषेण वसंतवारनिवहि इति ध्वनितं॥ काकलीतु क
लेस्सूक्ष्मे ध्वनावित्यमरः॥ कोलाहलः कलकलः इति च॥ १०॥ ॥एवमुद्दीपनविभावाद्दीप्तिः संप्रत्य

उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्व
राः॥ नीयंते पथिकैः कथंकथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥ १०

नुभावं दर्शयति॥ अनेकनारीपरिरंभसंभ्रममित्यादि॥ असौ सखी राधिकां पुनराह॥ पुनः कथितव
ती॥ किं कुर्वती॥ आपारात् दूरे समक्षं प्रत्यक्षं मुरारिमुपदर्शयंती॥ कीदृशं॥ अनेकनारीणां परिरंभ
संभ्रमेण आलिंगनादरेण स्फुरन् यो मनोहारी विलासस्तस्यानंगविकारस्तेन लालसा औत्सुक्यं यथा वि २८
धायां यस्य तादृशं॥ अथवा अनेकनारीणां परिरंभसंभ्रमेण स्फुरन् चित्तान्तरेण वधूयः श्रीराधाया
मनोहारी हरेः॥ चित्तापहारी विलासः हावादिलक्षणस्तस्मिन् लालसा यस्य॥ परिरंभसंभ्रमः अन्योन्य

सख्यालिंगनलक्षणनियोगस्तेन स्मारितः श्रीराधाविलासेन नत्सखी उत्तालसंप्रार्थनमिति वा॥ अथवा
॥मुरारिमारात् कृष्ण एव कामस्तस्मादनेकनारीणां परिरंभसंभ्रमेण स्फुरन्नाविर्भवन् यो मनोहारी विला
सस्तेन लालसमौत्सुक्यभावविकारं दर्शयंती तथा॥ अनेन तस्मीसरणपनाशां नावक्रिया निरूपणेन ना
यकगुणाधिकं दर्शितं॥ वक्ष्यति चाग्रे॥ पीनपयोधरेत्यादिना॥ ११॥ ध्रुवपदं॥ रामकरीरागेण गीयते
यतिताले॥ रागलक्षणं॥ स्वर्णप्रभानानास्वरभूषणा च नीलं निचोलं सुतनौ वहंती॥ कांते पदे यांतमधि

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं मुरारिमारादुपदर्शयंत्यसौ सखी समक्षं
पुनराह राधिकां॥ १२॥ चंदनचर्चितनीलकलेवरपीतवसनवनमाली॥ केलिचलन्मणिकुंडलमंडि
तगंडयुगस्मितशाली॥ हरिरिह मुग्धवधूनिकरे॥ विलासिनि विलसति केलिपरे॥ ध्रुवपदं॥

नेपि मानोन्नता रामकरी प्रतिष्ठेति॥ २॥ताललक्षणं प्रागुक्तं॥ गीतार्थस्तु॥ हे विलासिनि विलासशीले
॥इह हरिदावने मुग्धवधूनिकरे सुंदरवधूनिचये हरिर्विलसति क्रीडां करोति॥ कीदृशे वधूनिकरे॥ केलि
परे क्रीडापरायणे॥ अत्र मुग्धपदेन हावाद्यनभिज्ञत्वं॥ केलिपर इत्यनेन सामान्यक्रीडापरत्वं च तासां ध्व
न्यते॥ इति विशेषः॥ विलासो हावविशेषस्तल्लक्षणं॥ यानस्थानासनादीनां नेत्रवक्त्रादिकर्मणां॥ उत्प

गीत०टी० धृतेक्रीडांकृतवानिति॥ एतत् ध्रुवपदं॥ अथ पदानि॥ कीदृशो हरिः चंदनेन चर्चिते अंगुलिमिनीलकले
२९ वरे श्यामशरीरे पीतवसनं पीतवस्त्रं वनमाला च यस्य तादृशः पुनः कीदृशः॥ केलिषु चलंती कंपमाने ये
मणिमुक्ते कुंडले ताभ्यां मंडितमलंकृतं गंडयुगं कपोलयुग्मं यस्य॥ पुनः कीदृशः स्मितेन ईषद्धसितेन शो
भीशोभमानः॥ स्मितलक्षणं तु स्मरते॥ ईषद्विकसितैर्गंडैः कटाक्षैः सौष्ठवान्वितैः॥ अलक्षितद्विजं धीरमु
त्तमानां स्मितं भवेदिति॥ तथा च श्वेतचंदनपीतांबरविविधपुष्पमालया स्मितेन च श्यामशरीरो चित्रवे
षेण तच्चित्तप्रलोभनाय शोभातिशयत्वं कथितमिति भावः॥१॥ ॥मुग्धानां चेष्टितमाह॥ पीनेत्यादि॥

पीनपयोधरभारभरेण हरिं परिरभ्य सरागं॥ गोपवधूरनुगायति काचिदुदंचितपंचमरागं॥२॥

काचिद्गोपवधूः पीनपयोधरभारभरेण मांसलस्तनगौरवातिशयेन सरागं सानुरागं यथास्यात्तथा हरिं परिर
भ्यालिंग्य उदंचित ऊर्ध्वं अंचितः पंचमाख्यो रागो यत्र एवं यथा स्यात्तथानुगायति॥ अनुपश्चाद्धरेर्गानानंत
रं गायति॥ उदंचितपंचमरागो यथा स्यात्तथेति वा॥ अत्र पीनपयोधरेत्यादिना सौंदर्यमिति प्रतिपादितं॥ मुग्ध
त्वं च तस्य परिरंभे नत्रोद्यमवित्वे नैव स्वयमेव प्रथमं परिरंभणात्॥ अन्योन्यकृतपरिरंभे हि शृंगारः पुष्टो २९
भवति॥ तदुक्तं रसरूपके॥ रम्यदेशकलाकालवेषभोगादिसेवनैः॥ प्रमोदात्मरतिः सैव यूनोरन्योन्य
रक्तयोः॥ अपरकम्पातिष्टततद्दोहितो जन्मसदेवाश्च भुवनत्रयपुष्करक्रमीनास्मानुपावर्तंते॥ विकयाम

डा इति ब्रह्मगंधर्वचित्रतन्मागायनूदेवाः सदेवानुगायतउपावर्तंते तस्मात्प्रयंतं स्त्रियः कामयते कामुका
एतं स्त्रियो भवंतीति॥ श्रीराधायाश्चितस्यात्र गौरवसूचनाय काचिदित्युक्तं॥ पंचमो रागभेदः स्यात्पंचाना
मपि पूरणे पंचमश्चतुरंगद्वीपंचमी पीगवोऽस्त्रियामिति विश्वः॥२॥ ॥कापीत्यादि॥ कापि मुग्धवधूः मधु
सूदनस्य वदनसरोजं मुखपद्मं अधिकं यथा स्यात्तथा ध्यायति चिंतयति॥ कीदृशं॥ विलासेन लोलयोश्च
चलयोर्विलोचनयोर्यत्खेलनं तेन जनितमुत्पादितः मनोजः कामो येन अथवा स्त्रियामेव नं॥ अधिकमित्य
पि मुखस्य विशेषणं वा॥ तदा पुनः कीदृशं मुखपद्मं॥ अधिकं॥ अतुल्यलावण्यास्पदमित्यर्थः॥ सौगंध्या

कापि विलासविलोलविलोचनखेलनजनितमनोजं ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरो
जं॥३॥ कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले॥ चारु चुचुंब नितंबवती दयितं पुलकैर
नुकूले॥४॥

दिगुणख्यापनाय मधुररसास्पदेनापि कामोद्दीपकत्वात्तापहारकत्वाच्च वदनस्य स
रोजोपमा॥ मधुसूदनस्य पदेन तस्यामनुरागस्याधिक्यं ध्वनितं॥ तथा च॥ प्रसक्तस्य ध्यानादकोत्रा
लेन मुग्धवधूरित्युक्तं॥३॥ कापि कपोलतलेत्यादि॥ कापि नितंबवती दयितं प्रियं कपोलतले चारु मनो
हरं यथा स्यात्तथा चुचुंब चुंबनं कृतवती॥ किंलक्षणा॥ किमपि कार्यं जल्पितुं मंत्रयितुं श्रुतिमूले कर्णमू
ले मिलिता संलग्ना॥ कीदृशे॥ पुलकैः रोमांचैः अनुकूले प्रियाभिलाषसूचके॥ औत्सुक्येन सहसा कोत

मुखचुंबनं सखीजनहास्यकरं भवतीति व्याजेन चातुर्यं प्रकाशयति द्वारशमिति भावः॥ अत्रापि स्वयमेव प्रथ
मं चुंबनेन तस्या अधीरत्वं ध्वनितं॥ नितंबवतीत्यनेन सौंदर्याधिक्यं च कथितं॥ अथवा॥ कापि नितंबव
ती सुंदरी परमविदग्धा नवसखीकृतिमूलेन स्या॥ किमर्थं॥ किमपि तव संगमवाप्तुं जिपितुं कथनार्थ
मित्यर्थः॥ तदा किं कृतवतीत्यत आह॥ दयितं भुजकेरकुंजे कपोलतले चारु चुचुंब॥ तव कथाश्रव
णोदितसात्विकविकारेणात्यनुगतत्वस्य च के कपोलतले अत एव चारु यथास्यात्तथा चुचुंब॥ अ
नुमादनं कृतवती॥ अयं भावः॥ यदा तव वार्ताश्रवणेनापि एतादृशी भवति तदा किं वक्तव्यं तव संग

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले॥ मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले॥५

मानुरागस्य नीमिलनमेव कार्यं॥७॥ केलीत्यादि॥ काचिद्गोपी अमुं श्रीकृष्णं केलिकलाकुतुकेन दुकूले
पट्टपल्लवविषये विचकर्ष आकृष्टवती॥ दुकूले गृहीत्वा अमुं विचकर्षेति केचित् योजयंति कीदृशं॥ मंजु
लो मनोहरो वंजुलो वेतसो यत्र तादृशो यः कुंजस्तत्र गतं॥ तव सखीविक्रया तासां वंचनाय प्राप्तं॥ कुत्र
विचकर्ष॥ यमुनाजलकूले॥ यमुनाया जलयुक्ते रोधसि॥ तवागमनाशयातिलीयवंजुलकुंजस्थं श्री
कृष्णं यमुनाकूलं प्रति क्रीडार्थं आकृष्टवतीत्यर्थः॥ अत्राप्यन्यातुरकस्य वस्त्राकर्षणादधीरत्वं व्यंग्यं॥
अथवा॥ केलिकलाकुतुकेन तव विलासोत्सुकेन तासां वंचनं कर्तुं यमुनाजलकूले तटे यो वंजुलकुं

जः कुंजकुंजस्तत्र गतं अमुं काचित्करेण दुकूले विचकर्षेत्यन्वयः॥ अथवा॥ अन्यायास्तव प्रियांचलाक
र्षणे नाकृष्टमेति दर्शयितुमाह॥ काचित्तव सखी त्वां प्रत्यानेतुमेव दुकूले विचकर्ष एवमेव साहसं अन्याया
नोत्सृष्ट एवेति भावः॥ केन मिषेण केलिकलाकुतुकेन॥ खेलनलीलामिषेण॥ अन्यास्तु वंचयित्वा त्वां
प्रत्यानयनार्थमेवेति भावः॥ अत एव एकांतं मा मंत वसखी ह हा इत्यर्थः॥ अतो मा खिन्ना भव एकांते तथा
आनीयस्त्वं चलेद इत्यर्थः॥ मनोज्ञं मंजुलमिति च॥ वंजुलो वकुलो ख्यातो वंजुलो वेतसो मत इति धरणिः॥ कुल
लक्षौमेस्तलांशुके पि॥ ५॥ करतलेत्यादि॥ ननु गोपीभिः सह क्रीडां कुर्वतः कृष्णस्य कुत्र मय्यनुरागः॥

॥ करतलतालतरलवलयावलिकलितकलस्वनवंशे॥ रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे
॥६॥

कथं तथा प्रजापंकरोषीत्यत आह॥ स्वयमेव त्र्येण॥ काचित्कवतिर्वरांगना राधाभिधाना हरिणा कृष्णे
न प्रशशंसे स्तुता॥ कीदृशी॥ रासरसे॥ रसमयो रासः सचासौ रसश्च तस्मिन् रासरसे॥ बहुनर्तकीनृत्त
कीनां नृत्यविशेषो रासस्तस्मिन् यो रसः संगीतशीलनचमत्कारविशेषस्तत्र वा॥ सहनृत्यपरा॥ कृष्णेन स
ह तुल्यं नृत्यवंती॥ कीदृशे रासरसे॥ करतलयोस्तालेन परस्परं वादेन तरला चंचला या वलयावलिः कं
कणपंक्तिस्तया कलितो मिश्रितः कलस्वनः अव्यक्तमधुरनादः॥ अयमभिप्रायः॥ श्रीराधां विना स्वयुव
तिगणे रासोत्सुके सति श्रीकृष्णः हर्षदृत्यप्रस्तावेन श्रीराधिकास्नेहेन अखिलगोपीगणं निवर्त्तयतीति॥ ॥

अथवा रासरसोनुरागो रतिसहन्त्यपरा युवतिः हरिणा प्रशशंसे॥ कस्मिन् करतलतालतरलवल
यावलिकलितकलस्वनवंशे॥ संप्रति तत्करतालमिलिते वेणुकलध्वनौ केपि संकेतेन तवस्कृतं करोत्ये
वतालिनिलिस्यते॥ अनत्लासां मौग्ध्यमितिभावः॥ अथवा हरिणा तन्मनोहारिण्या अन्ययुवतिः यौवनोद्दामा
स्कप्रशशंसे स्कतामुखेनैव सा केवलं स्कतानतुमनसा मनस्कत्वयैव हरितमिति गौरवमिति भावः॥ अथ
वा हरिस्तेनेत्यर्थः॥ यौवनोन्मदेन अन्यमस्त्वं तयानसात एव अतः हरिणासहन्त्यपराएव केवलं न
विदग्धासापीति तत्प्येव उत्कर्षादिति भावः॥ अथवा हरिणा तव मनोहारिण्या युवतिः॥ नित्ययौवनरू
पात्वमेव प्रशशंसे प्रकर्षेण स्तूयसे नान्या इत्यर्थः यतः हरिणासहन अन्यात्वमेव अन्या इति भावः॥ इम
मेदेक रास्फाले तालं तु हरितालक इति विश्वः॥ तरलश्चंचले खड्गे हारमध्यमणावपीति च॥ वंशो वेण
कुलेवर्गे पृष्ठस्यावयवेपि च॥ रासरसस्क रासे स्यादिति च॥ रासस्कगोडुहां क्रीडेति हारावली॥ इ॥॥
श्लिष्यतीत्यादि॥ कामपि रामां क्रीडाशीलां श्लिष्यति आलिंगति॥ कामपि चुंबति॥ कामपि मधुरवच
नादिना रमयति क्रीडयति॥ सकृष्णः स्मितेन ईषद्धसितेन चानुयथा स्यात्तथा परां गोपीपश्यति॥ एवं
तास्वविस्मृतासु दाक्षिण्येनालिंगनादिकं दत्त्वा रोषेणगच्छंती अपरां वामां मनोहरस्वनावां तत्सखी ३१
अनुगच्छति॥ अनुनयार्थमनुगतिं करोति॥ अथवा॥ एवं सस्मितावलोकादिमात्रेण तासां वंचनं कृ
त्वा वामां तामनुगच्छति॥ अनुनयार्थमितिस रतीत्यर्थः॥ अतएव तस्यानुरागः॥ अतः संगमार्थं विलंबमा

कृथा इतिभावः॥ अथवा तासां कृत्येन तानिनिर्दत्वा अतः स्वकृत्येन तानि दृन्नयतीति तासां कृत्यं उत्का श्री
कृष्णकृत्यमाह॥ श्लिष्यतीति श्रीकृष्णः कामपि आलिंगनकामामेव श्लिष्यति श्लेषमात्रमेव करोति न
तु स्वयं तथा कामः अत एव एकं एकं तदभिलाषरूपं एव कथितं॥ स्वकामश्चेत्स्वकृत्यं एकस्यामेव कु
र्यात् पश्चादन्यत्र प्रवर्त्तेत तत्र अतः भिन्नाभिन्नाकामनाना ताः अतः भिन्नंभिन्नमेव तासां कामं करोतीत्यर्थः॥ चुं
बनकामामेव कामपि चुंबति॥ अवलोकनकामुकां पश्यति॥ सस्मितचारुपरां हास्यकामुकां प्रति सस्मि
तं मंदमंदं हसति॥ अनुगमनकामुकां वामां च क्रतया गच्छंतीं प्रति अनुगच्छति॥ एवं एवं तत्तन्मनोरथं
पूरयित्वा ताभिर्विचरिता मां परमरमणीनां त्वामेव रमयति पूर्णकामां करोति॥ तासां कृत्यं स्वकृत्यं इमणा
र्थमिति भावः॥ अथवा॥ ताएकैककर्तृकस्मान सर्वकर्तृकयोश्रा इति एकैकं कृपापात्रेण कर्तृत्वं
हरणार्थमेव स्यात् इति॥ इति कृत्वा त्वादेव अनुगच्छति ताभिः सहचरितुमेत्येवेत्यर्थः॥ सुदत्रीरम
णी रामेत्यमरः॥७॥ श्रीजयदेवेत्यादि॥ श्रीजयदेवकवेः॥ इदं सर्वस्वरूपं गीतं प्रस्तानि श्रीराधामोहन
योर्विविधे प्रेमलक्षणानि परममंगलानि वितनोतु विस्तारयतु॥ कीदृशं॥ अद्भुतकेशवस्य केलि
रहस्यं क्रीडाकौशलं यत्र तादृशं॥ राधारता कृष्णस्याप्यनेकविलासवतीनामनुरंजकता अद्भुतत्वं केशा
वपदेन सौंदर्यं च कथितं॥ पुनः कीदृशं॥ विपिनविनोदकलया वनविहारकौशलेन वजितं संयुक्तं॥ पु
नः॥ कीदृशं॥ प्रशास्य॥ तयोस्त्वापरमयशः प्रदं॥ वृंदावनविपिने ललितमिति पाठे॥ तदा इदं ललि

तं गीतं॥ शृंगारश्चेष्टितं वा॥ वृंदावने अद्भुतं केशवकेलिरहस्यं॥ अत्रापि सारिकाएव नायिका॥ धृष्टदक्षि
णानुकूलशठाख्यनायकः॥ तत्रापि रमयति रामां सरागमित्यनेन धृष्टः॥ तद्यथा॥ अभिव्यक्तान्यतरुणीभो
गलक्ष्मापि निर्भयः॥ मिथ्यावचनदक्षश्च धृष्टोयं खलु कथ्यते॥ दक्षिणस्य कथितः प्राक्॥ शठस्य य
था॥ प्रियं वक्ति पुरोन्यत्र विप्रियं कुरुते भृशं॥ निगूढमपराधं च शठोयं कथ्यते बुधैः॥ वामामनुग
च्छतीत्यनुकूलश्च कथितः॥ तल्लक्षणं वक्ष्यते ये॥ श्रीराधयामनुकूलोयं सदा धीरोदात्तानुकूलतः

श्लिष्यति कामपि चुंबति कामपि कामपि रमयति रामां पश्यति सस्मितचारुतरामपरामनुगच्छति वामां
॥७॥ श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यं॥ विपिनविनोदकलावलितं वितनोतु शुभानि यशस्यं॥८॥

प्पस्मात्र संवृरते॥ तद्यथा॥ कुवलयदलाः संकेतस्थादगंचलकोपलैः मनसिजकला
नाटीप्रस्तावनामभिनत्ततां॥ नकिलचरते राधाया रंगसंग विधायिना व्रतविलसिते शैथिल्यस्य प्रदाप
द्यविद्विषः॥ यद्यपि धीरललितानुकूलोयं नायकः॥ तथापि सर्वे नायकगुणाः श्रीराधारसपोषणाय
तत्र तत्र भावैः श्रीकृष्णेन संभज्यंते॥८॥ ॥ननु सकलकलानिधेः श्रीकृष्णस्य कथं हावाद्यनभिज्ञाभि
र्गोपीभिः सह केलिकृतवानित्यत आह॥ विश्वेषामित्यादि॥ हे सखि वृंदावनविपिने राधेमधौवसं
ते मुग्धो मनोहरो हरिः क्रीडति॥ किं कुर्वन्॥ विश्वेषां गोपीजनानां तद्दारा सर्वेषां प्राणिनां वा तदीयं ३२

विश्वं व्रजं तन्निमित्तवस्थानां सर्वेषां वा अनुरंजनेन आनंदं जनयन्॥ पुनः किं कुर्वन्॥ इंदीवराणां नील
मुत्पलानां या श्रेणी पंक्तिस्तद्वत् श्यामलैर्नीलैः कोमलैः सुकुमारैरंगैरवयवैः अनंगस्य कामस्योत्स
वं उपनयन् प्रस्थापयन्॥ स्थावयवांग्रान्न्तरवयवैस्तस्यापि सांगीकरणान्॥ सौकुमार्यं च कोमलस्या
पि स्पर्शासहतोच्यते॥ तदुदाहृतिः प्राक्तैव॥ अंगैरिति सौंदर्यं कथितं॥ तदुक्तं॥ अंगप्रत्यंगकानां यः
सन्निवेशो यथोचितं॥ सुश्लिष्टसंधिबंधः स्यात्तत्सौंदर्यमुदीर्यते इति॥ कीदृशो हरिः॥ अभितः सर्वतः

विश्वेषामनुरंजनेन जनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं॥ स्वच्छं
दं व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः शृंगारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति॥१२॥

बाह्यैरवयवैरंतस्थैश्च तत्सादृश्यतः प्रत्यंगं अंगं अंगं प्रति स्वच्छंदं यथा स्यादेवं व्रजसुंदरीभिरालिंगितः॥
कइव॥ मूर्तिमान् शरीरी शृंगार इव शृंगाररस इव॥ तथा च शृंगाररसस्य श्यामलत्वात्॥ श्रीकृष्णसादृश्यं
॥ तदुक्तं भरते॥ श्यामो भवति शृंगारः सितो हास्यः प्रकीर्तित इति॥ यथा मुग्धो मनोहरः शृंगारो रसो म
धौ वसंते क्रीडति सर्वत्र विलसति॥ किं कुर्वन्॥ अनुरंजनेन यूनोः परस्परानुरागजननेन विश्वेषां
व्रजस्थप्राणिनां आनंदं जनयन्॥ पुनः किं कुर्वन्॥ अंगैः शृंगाररसस्यांगभूतैः कटाक्षादिभिरनुभा
वैः रोमांचादिभिः सात्विकभावैः शंकासूयादिभिः संचारिभावैश्च अनंगोत्सवं उपनयन्॥ न केवलमे

नैर्विभावैरपीत्याह ॥ इंदीवरेत्यादि ॥ इंदीवरश्रेणीभिः नीलोत्पलपंक्तिभिः श्यामलैर्गाढांधकारनील
निचोलतमालनवनादिभिः कोमलैर्मृदुभिरंगस्वादिभिः ॥ अत्र हेतुगर्भविशेषणमाह स्वच्छंदमित्यादि ॥ स्व
च्छंदं यथास्यात्तथैवं व्रजसुंदरीभिः अंगमंगं प्रतिश्लिष्टालिंगितः आश्लिष्टः ॥ शृंगाररसस्यांगानां विभावादी
नां मध्ये कयाचित्तांबूलस्रक्चंदनाद्युद्दीपनविभावरूपं कयाचित्सस्मितकटाक्षाद्यनुभावरूपं
कयाचिच्छंकास्मृत्यादिसंचारिभावरूपं कयाचिद्रोमांचस्वेदादिसात्त्विकभावरूपं शृंगाररसस्यांग
माश्रितमिति भावः ॥ विभावादीनामंगत्वं प्रतिपादयति ॥ विभावैरनुभावैश्च भावैः संचारिसात्त्विकैः ॥ आ
नीतो बोधितः स्फीतो हृद्यः शृंगार इष्यत इति ॥ विभावसामान्यलक्षणं तु रसरत्नदीपिकायां ॥ भावयंति
विशेषेण ये रसान्ये मनोहरान् ॥ ते विभावाः स्मृताः ख्याता आलंबनविशारदैः ॥ तत्र शृंगारविभावान्
रतेनोक्ताः ॥ ऋतुमाल्यालंकारैः ॥ प्रियजनगांधर्वकाव्यसेवाभिः ॥ उपवनगमनविहारैः ॥ शृंगाररसः
समुद्भव इति ॥ अनुभावसामान्यलक्षणं ॥ क्रियंते ये रसाः सम्यक् लीलानुभवगोचराः ॥ ते त्वनुभावाः
कथ्यंते नाट्यशास्त्रविशारदैः ॥ तत्र शृंगारानुभावाः ॥ नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमो
दैश्च मधुरैश्चांगविकारैस्तस्याभिनयः प्रयोक्तव्यः ॥ व्यभिचारिसामान्यलक्षणं दशरूपके ॥ विशेषादा ३३
भिमुख्येन चरंतो व्यभिचारिणः ॥ शृंगारतिलके ॥ शंकासूया तथा ग्लानिर्व्याधिश्चिंता धृतिः स्मृतिः ॥ औ
त्सुक्यं विस्मयो हर्षो व्रीडोन्मादौ तथैव च ॥ विषादो जडता निद्रावहित्था चापजा मतिः इति भावाः प्रयो

क्तव्याः शृंगारे व्यभिचारिण इति ॥ सात्त्विका भावाः ॥ शृंगारतिलके ॥ स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ
वेपथुः ॥ वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृता इति ॥ एतेषामवांतरलक्षणानि ग्रंथगौरवभयान्न
लिख्यंते ॥ अत्र सकलकलाभिज्ञः स्यादपि व्रजसुंदरीभिः सह तत्तदनुसारेण क्रीडतः कृष्णस्य न दक्षत्वहानिः
तासां तथैवानुरंजनात् ॥ अत एव विश्वेषामनुरंजनेन त्वनेन विश्वानुरंजकत्वं गोपीद्वारा कृष्णस्योक्तं ॥ ते
न च तासु साधारणप्रेमकथनेन तस्यापराधोत्कर्षः कथित इति भावः ॥ अथवा ॥ हे सखि तवाऽनुरंजनेन श्री
त्युत्पादनेन विश्वेषां समस्तानां सखीजनानां आनंदं जनयन् क्रीडतीत्यर्थः ॥ स्त्रीसंयोगेनाभिन्नस्यान
कर्तव्येति भावः ॥ ध्यातं श्यामालिंगितत्वात् ॥ तस्य तु तदालिंगने प्रीतिरिति भावः ॥ अन्यत्समानं ॥ शृंगारः
सुरते नाट्ये रसे च गजमंडने इति विश्वः ॥ विश्वं समस्तं निखिलमिति च ॥ इंदीवरं तु नीलेस्मिन्नित्यमरः ॥ काल
श्यामलमेचका इति च ॥ मूर्त्तिः काठिन्यकाययोरिति च ॥ इंदीवरं तु नीलेस्मिन्नित्यमरः ॥ कालश्यामलमे
चका इति च ॥ मूर्त्तिः काठिन्यकाययोरिति च ॥ पुंसः स्त्रियां स्त्रियाः पुंसि संभोगं प्रति या स्पृहा ॥ शृंगारस्स
इति प्रोक्तो रतिक्रीडादिकारणमिति ॥ तथा च व्रजसुंदरीभिरभितः प्रत्यंगमालिंगित इत्यनेनाभितः सर्व
तः प्रत्यंगं याश्चालिंगितवतीस्तदंगमाधुर्यातिरेकात् सास्य कंसमथननिवृत्तेवेति भावः ॥ उक्तं च ॥ साक्षान्म
न्मथमन्मथः ॥ काचित्कराम्बुजेनोरसि गृहीत्वा नलिनामुद्रेत्यादि ॥ स्वच्छंदमिति च यथेष्टविलासास्पदत्वं
तस्य कथितं ॥ १२ ॥ ॥ इदानीं सर्गांते कविराशिषं प्रयुंक्ते ॥ रमोत्सवेति ॥ हरिः श्रीकृष्णो वो युष्मान् पातु

रक्षतु॥ किंभूतो हरिः॥ स्मितेन मंदहसितेनैवान्यनारीणां मनोहर्त्तुं शीलमस्यास तथा॥ पुनः किंभूतः॥ राधयात्युद्भटं प्रकटमेव यथा स्यात्तथा चुंबितः॥ किं कृत्वा आभीरवामभ्रुवां गोपसुभ्रुवामभ्यर्णे समीपेउरो वक्षः निर्भरं गाढं यथा नवत्येवं परिरभ्यालिंग्य॥ किंभूतानां गोपांगनानां॥ रासे रासक्रीडायां उल्लासभरेण हर्षातिशयेन विभ्रमभृतां विलासवतीनां॥ विभ्रमभृतत्वमुपपादयति॥ ननु न वस्तुतास्तु विभ्रमः॥ प्रत्युत युवतिगणोपरूपं स्यात्तया कथं चुंबितस्तत्राह॥ प्रेमांधया प्रेम्णा हर्षातिशयेनांधया

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवामभ्यर्णे परिरभ्य निर्भरमुरः प्रेमांधया राधया॥ साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिव्याजादुद्भटचुंबितस्मितमनोहारी हरिः पातु वः॥१३॥॥

श्रीकृष्णं विनान्यन्न पश्यतीति तया॥ लज्जा जनकस्य द्वितीयस्याद्यनिदेवनिर्भरमालिंग्य चुंबनं कृतवतीति भावः॥ तत्रापि न केवलं यास्यतया एवं कृतवती॥ किंतु मवातुर्यमित्याह॥ त्वद्वदनं त्वन्मुखं सुधामयममृतमयं साधु शोभनमिति व्याकृत्य कामीतस्तुति व्याजात् गानप्रशंसाछलेन॥ यद्गीतममृतमयं तत्तद्वदनं सुधानिधानमिति साधु युक्तमेतदिति॥ चातुरीमारचय्य चुंबनं कृतवतीति भावः॥ एवं ३४
द्वयोस्समागमः कविनाशीर्वादितया उक्त इति वाक्यार्थः॥१३॥ ॥छ॥ ॥ ॥

॥इति श्रीगीतगोविंदे टीकायां सामोदद्दामोदरो नाम प्रथमः सर्गः॥ ॥श्रीराधामोहनयोरामोदेन मकरंदेन प्रेमरसेन युक्तः प्रथमानुरागीय रस॥ दामोदरपदेन यथा यशोदया वात्सल्यरसेन बद्धस्तथा श्रीराधयामानरसेन वशीयत्वस सामोदद्दामोदरो नाम सर्गोस्याः प्रसिद्ध इत्यर्थः॥ ॥एवं सर्गेस्मिन्नेवं चिंतानुरूपां दशां चनिरूप्येदानीं स्मरणानुरूपां दशां वर्णयिष्यति॥ तदत्र श्लोकं च वक्ष्यते॥ तत्र द्वचनैः सख्या प्रेरितापि राधासमक्षमन्याभिः सह मानं कृत्वं इत्युक्तं सहमाना कचित्कुंजांतरं गता सखीमाह विहरतीत्यादि॥ श्रीराधाराध्यते श्रीकृष्णेन इष्टतया सा सखी सहचरी लज्जितारब्धो रहोपि गोप्यमपि वक्ष्यमाणमुवाच उक्तवती॥ कीदृशी सा॥ ईर्ष्या

॥इति श्रीगीतगोविंदे सामोददामोदरो नाम प्रथमः सर्गः समाप्तः॥१॥ विहरति वने राधा साधारणप्रणये हरौ विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः क्वचिदपि लताकुंजे गुंजन्मधुव्रतमंडलीमुखरशिखरे लीना दीनाप्युवाच रहः सखीं॥१४॥

यां हे तु माह॥ विगलिते त्यादि॥ विगलितनिजोत्कर्षात् विगलितो गतो निजः स्वीय उत्कर्षो हि मे बास्यातिप्रणोयिनीत्येवं रूपस्तस्मात्॥ अन्यस्त्री सोनिजातिरेकापगमादित्यर्थः॥ कसति॥ हरौ अन्याभिस्सचिन्तचोरे कस्मिंव नेविहरतिसति॥ कीदृशे हरौ साधारणी राधा धामन्यगोपांगनासमानः प्रणयः प्रेमा यस्य तादृशे॥ असाधारणप्रणय इति वा॥ अतुलितप्रेमवतीत्यर्थः॥ अतीदीना दुःखिता॥ पुनः कीदृशी॥ क्वचिदपि लताकुंजे लतासि

रतिनिबिडेकुंजे लीनाहं त्रपतयैव स्थिता॥ कीदृशे कुंजे॥ गुंजंतः शब्दायमानाः ये मधुव्रता भ्रमरास्तेषां
मंडलीपुंजं किसलयाग्रुखरंवा चालं शिखरमग्रमागोयस्य तादृशे॥ अत्र कुंजे नैव लता छादितस्य हयासोल
नायद्मितिनिबिडत्व सूचनाय॥ प्रणयः प्रेम्णा विश्रंभ इति विश्वः॥ ईर्ष्यामाकुः समानेसुमानदानादम
र्षणं॥ तथा च भ्रमराणां शब्देनाधिकभावोद्रेकः कथित इति भावः॥ ईर्ष्याविप्रलंभे स्पतेनव्यभिचारिणा वा
नां प्रवेशः कथितः॥२४॥ ॥किमुवाचेत्याह॥ संचरेत्यादि॥ ध्रुवपदं॥ गीतस्यास्य गुर्जरीरागः॥ ताल
स्तु प्रतिमंठकः॥ रागलक्षणं प्राक्कथितं॥ तालक्षणं तु॥ तारश्चाप्यपरश्चैव विचारः कंदसंज्ञकः

॥ संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं॥ वलिततरगंचलचंचलमौलिकपोलविलोल
वतंसं॥१॥ रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासं॥ ॥ध्रु॥ ॥श्री॥ ॥

चत्वारः कथिता ह्येते प्रतिमंठविचक्षणैः॥ विरामांतद्रुतद्वंद्वं गुरुश्चैकस्ततः परं सुरंगताले ज्ञातव्यस्तार
स्तु प्रतिमंठकः॥ गुरुरेकोनचेद्यत्र सन्निपातः स कथ्यते॥ अपरः प्रतिमंठो सौ विद्वद्भिस्तैनगीयते लघु
द्वयं विरामांतं ताले कंदुकसंज्ञके॥ विचारो गीयते तेन चिलंब स्वल्पो भवेत्॥ द्रुतमेकं न चेद्यत्र सता
लः खंडसंज्ञितः॥ द्रुतं लघं नगातव्यः कंदश्च प्रतिमंठकः॥ सुरंगः सन्निपातः कंदुकः खंड इति प्रतिमंठ
श्चतुर्विधः॥ श्रीराधायाः सुहृद्रंगवर्णितात् सुरंगोयं प्रतिमंठकः॥ अपरे ऽप्येवं धेधुस्तेयाः॥ गीतार्थ

स्तु॥ हे सखि मम मनो हरिं चित्तहृन्निचौरं कृष्णं स्मरति स्मृतिगोचरं करोति॥ स्मृत्वानुभूतविषयत्वात्॥ कीदृ
शं॥ इह वने रासक्रीडायां विहितविलासं॥ विहितः कृतो विलासो मया सह क्रीडा येन तादृशं॥ पुनः कीदृशं
कृतपरिहासो नर्मकेली येनासितथातं॥ अथवा॥ अन्यगोपांगनानां कृतपरिहासं यथास्यात्तथा मया
सह विहितः विविधविभ्रमो येन तादृशं॥ हरिं चित्तचौरं इह जनाकुंजे लीनायाश्च पि मम मनः स्म
रति॥ अथवा॥ विहितः कृतो विलासः विभ्रमो येनातिरसावहानुरागेण मत्तः कारित इत्यर्थः॥ तदु
क्तं॥ स्वाधीनस्यापि सेवायां कांतस्यानिनंदना॥ विभ्रमो वामतो ह्येका तु सादित्याख्याति कश्चन॥ तद्यथा
॥ त्वं गोविंद मयाप्सि किं नु कबरीबंधार्थमभ्यर्थितो केशेनाजम बद्ध एव चिकुरस्तोमे मुदं दोग्धि मे॥
वक्त्रस्यापि न मार्जनं कुरु घनं चंद्रं विभर्मि रोचते नैवोत्तंसय माजतीमभिनवशिरः खेदं न रेणास्पृति॥ इति र
सामृतसिंधौ॥ स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा॥ हेला लीलेत्यमी भावाः क्रियाः शृंगारभाव
जा इत्यमरः॥ तथा च स्मरतीत्यनेनामत्संमाननाय घूर्णितो हगंचलौ यां गीयत्तएवं यथास्यात्तथा च
चलो दोलायमानो मौलिः शेखरो यस्य कपोलयोर्विलोलौ चंचलौ वतंसौ कर्णाभरणे च यस्य तादृशं
॥ अनेन शिरः कंपहेलं विनेवशेषरकुंडलचालनेन वादकवैचित्री कथिता॥ तथा चाधरसुधाप
दोपादानात्प्रदानन च इष्यानंदकरत्वं द्योतितं॥ पुष्पमुत्तंसावतंसो द्वौ कर्णपूरेश्च शेखरे इति वतं
सश्च वतंसः॥ वष्टि भागुरिरल्लोप इत्यस्याकारलोपः॥२॥ ॥ध्रु॥ ॥

ननुआसंगादिनासविलासंस्मायतीमित्यतआह॥चंद्रकेत्यादि॥चंद्रकेनविचित्रवर्णचिह्नितेनाग्रभागे
नचारूणांमनोहराणांमयूरशिखंडकानांमयूरपिच्छानांमंडलेनसमूहेनवलयितावेष्टिताःकेशाये
नतादृशं॥तथाचात्रमयूरादिदत्तेनैनापितस्यैवस्मारणंलवनातीतिध्वनितं॥पुनःकीदृशंप्रचुरैर्बहु
लैःपुरंदरधनुर्भिरनुरंजितंचित्रितंनीपीमेदुरःसांद्रःस्निग्धोमुदिरोमेघस्तद्वत्शोभनोवेषआकृति
र्यस्यतादृशं॥अत्रनानामणिखचितहारमुकुटकेयूरादीनामिंद्रधनुर्भिःसाम्यंश्रीकृष्णस्यमेघ
साम्यंबोध्यं॥इयंचाद्भुतोपमा॥प्रचुरपुरंदरधनुरनुरंजितस्यमेघस्याप्रसिद्धेः॥अथवा॥केशा

चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं॥प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं॥२॥

नांकृष्णस्यवामेघसाम्यं॥शिखंडकानांधनुर्भिःसाम्यंवनमालाविकृतयोवा॥समौचंद्रकमेचकावि
त्यमरः॥बर्हिकिंतसमंवर्णमेप्रचकंतुवर्तेवुधइतिविश्वः॥मुदितोजलदःप्रोक्तोमुदिरोहर्षसंमतइ
त्यनेकार्थः॥वेषोवेश्यागृहेप्रोक्तोनेपथ्येगृहमात्रकइत्यपि॥२॥ ॥गोपेत्यादि॥गोपकदंबस्याभीर
समूहस्यायानितंबवत्यःप्रशस्तनितंबयुक्ताललितयःप्रियस्तासांमुखचुंबनेनलंभितःप्रापितःलोभोयेनतं॥
अथवा॥गोपकदंबनितंबवतीनांमध्येममुखचुंबनेनलंभितःलोभोयेनतं॥लंबितेतिपाठेलंबितो
लंबीकृतःविस्तारितइत्यर्थः॥गोपकदंबनितंबवतीभिर्मुखचुंबनेनलंभितःप्रापितोलोभोयस्यतमिति

वा॥तस्यप्रणयीमय्येवस्थानाविकल्पानिर्विलोकारेणाकारितइतिभावः॥पुनःकीदृशं॥बंधुजीवपुष्प
वन्मधुरोमनोहरोऽधरपल्लवःपल्लवाकृतिरधरोयस्यतं॥अथवा॥बंधुजीवयतीतिबंधुजीवःप्रिय
जनस्यजीवनंअमृतनिधानत्वात्॥एवासौमधुरोऽधरपल्लवोयस्यतं॥मधुरपदेनसरसतापल्लव
पदेनसुकुमारतारुणताचकथिता॥उल्लसितेनविकसितेनस्मितेनस्मितेनशोभायस्यतं॥अनेनेंदी
वरेबंधुकीकुसुमत्वंकुंदोदयउपमीयते॥तथाचबंधुकादिभिःसएवस्मायतेइतिभावः॥रक्तकस्तुबंधुको
बंधुजीवकइत्यमरः॥सरसोपिमधुरःप्रोक्तोमधुरोथमनोहरइत्यमरः॥३॥विपुलेति॥विपुलोविस्ती

गोपकदंबनितंबवतीमुखचुंबनलंभितलोभं॥बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं॥३॥

र्णःपुलकोरोमांचोयत्रतादृशाभ्यांभुजपल्लवाभ्यांपल्लववत्कमलाभ्यांवाहुभ्यांवलयितंवेष्टितंव
ल्लवयुवतीनामाभीरकांतानांसहस्रंयेनतादृशं॥अत्रवलयितमित्यनेनापिचचतयातासांवेष्ट
नमात्रं॥सरहस्यालिंगनादिकंतस्यतुमय्येवेतिध्वनितं॥पुनःकीदृशं॥करयोश्चरणयोरुरसिचयानि
मणिमयानिभूषणानिअलंकरणानितेषांकिरणैर्विभिन्नंनाशितंतमिस्रंतमोयेनतं॥अथवाकरादि
भुवनभूषाणिमणिगणानाभूषयंतियेकिरणाश्चांगंकृतंयस्मैरिति॥अंधकारोस्त्रियांध्वांतंतमि
स्रंतिमिरंतमइत्यमरः॥अथवाविपुलःपुलकोयासांतास्ताश्चभुजपल्लवेनवलयितावेष्टितायाएवंभू

नायावद्धन्नवयुवतयस्ताभिः सह समकालमेव रमयन्नीति सहस्रमिति॥ तथा वात्स्यायनीसूत्रे॥ सहस्र
वनीति सहस्रमिति॥ एवंविधं कामुवतीनस्मरतीति भावः॥ करचरणोरसि मणिगणभूषणकिरणैर्वि
भिन्नं तं विशेषणानि द्वेशेये नस्तेविनिंदः सपत्निरूपाः शात्रवोत्रनायस्मान्नं॥ तद्भूषणैर्व्यतितां मां दृ
ष्टास पत्नीनांपरानवोः नवदित्यर्थः॥ उस्रमिति पाठांतरेण उस्रशब्दः किरणवाचीततः उस्रप्रकाशा
मानमित्यर्थः केचिद्देवं व्याकुर्वंति॥४॥ जलदेति॥ पुनः कीदृशं॥ जलदपटलेमजलमेव सम्यहेन जनः
संनतमानस्येंदोः खंडस्यापि विनिंदकस्तच्छो नातिशायी चंदनतिलको ललाटे यस्य तं॥ क्वचिज्जलदपट
विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रं॥ करचरणोरसि मणिगणभूषणकिरणविभि
न्नतमिस्रं॥४॥
लचलदिंदुविनिंदकचंदनबिंदुललाटमितिपाठः॥ तदाजलदपटलेवलसंचरयइं
दुखंडस्तस्य विशेषेण निंदकस्तिरस्कारकश्चंदनबिंदुमंडलाकृतितिलको ललाटे यस्य तं॥ पुनः की
दृशं॥ पीनौ मांसलौ कठिनौ यौ पयोधरौ स्तनौ तयोः परस्परपर्यंतभागस्य मर्दनेन निर्दयं हृदयकपाटं क
पाटवद्दलीणं हृदयं यस्य तादृशं॥ पयोधरशब्देन दृढमर्दनेन श्रमजलधारणं भवति॥ नतु दुग्धधार ३९
णं॥ रसाभावात्तत्र घटते इति भावः॥५॥ मणिमयेति पुनः कीदृशं॥ मणिमये मणिप्रचुरे मकरवन्म
नोहरे ये कुंडले ताभ्यां मंडितौ गंडौ यस्य तं॥ अथवा॥ मणिमयमकरमनोहरकुंडले मंडिते याभ्यां तादृ

शौ कपोलौ यस्य तं॥ तदुक्तं भूषणान्भूषणांगमिति॥ किंच॥ विभूषणं विभूषयंत्यादोनन भूषमित्युच्यतइ
ति भूषणभावरूपमविकथितं मुक्ताफलेषु छायायास्तरलत्वमिवांतरा प्रतिभाति यदंगेषु लावण्यं तदि
होच्यते॥ तद्यथा॥ शृणु सखी तव करे विलयिन्यमुत्र नीचैर्विरचय मुखचंद्रमोहराद्भिवर्णं॥ इयमुरसि
मुरारेरस्ति नान्या मृगाक्षी मकरकतमुकुराने बिंबिता मित्वमेवेति रसाभ्रतसिंधो॥ अतएव तदुदारं सुंद
रमित्यर्थः॥ तथाच एतादृशं सुंदरवरं कथं न स्मरामीति भावः॥ औदार्यं विनयं प्राहुः सर्वविश्लाघ्यते बुधा

॥ जलदपटलचलदिंदुविनिंदकचंदनतिलकललाटं॥ पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं
॥५॥ मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं॥ पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवा
रं॥६॥
इति विनयगुणयुक्तं वा॥ अथवा॥ मणिमयमकरमनोहरकुंडलाभ्यां मंडितौ अलंकृतौ मम क
पोलौ येन तं॥ अतएव तदुदारं औदार्यगुणयुक्तं॥ रहसि मया निलपितं सर्वं न तत्क्षणमेव स्फुरितवानिति
॥ स कथं न स्मर्यत इति ध्वनितं॥ पुनः कीदृशं॥ पीतं वसनं वस्त्रं यस्य तादृशं॥ पुनः कीदृशं॥ औदार्येविपा
दकं विशेषणमाह॥ अनुगतेत्यादि॥ अनुगताश्चाश्रिताये मुनिवराद्यसुरवरांतास्त एव परिवाराः प
रिजना यस्य तं॥ अथवा॥ अनुगतानां आश्रितानां मुनिवराद्यसुरांतानां परिवारः प्रकर्षो यस्मात्तं॥
परिवारः परिकरे परिकीर्त्या प्रहर्षयोरिति विश्वः॥ इवंतेवरपदस्य मुन्यादिपदैः प्रत्येकमभिसंबंधः

॥ तथाचैतैरप्यधिगतस्वस्वाभिमतफलैः सततं सेव्यत इति तस्यैव ऐश्वर्यमात्मेवेति भावः ॥ तत्र मुनि
वराः शुकनारदादयः मनुजवराः परीक्षिदादयः ॥ सुरवरा ब्रह्मरुद्रादयः ॥ असुरवराः प्रह्लादादयः ॥
अथवा ॥ अनुगता ये मुनिमनुजसुरासुराः तेऽपि वरः श्रेष्ठो गीयते लक्ष्मीर्गोपीजनो वा परिवारो यस्य
तं ॥ अथवा ॥ अथवा अनुगतं अनुसृतः माधुर्यवैरेण कर्षणात् मुन्यादीनां वरः परिवारः श्रेष्ठः परि
ग्रहो येन तमिति ॥ उक्तं च ॥ आरुंधानमरुंधती हृदयमप्यार्द्रस्मिता द्वाक्षियेति ॥ कांस्तीत् दुरापेति च ॥
मप्यनुगतो मुन्यादीनां परिग्रहो यस्मात्तमिति वा ॥ दानमस्तु यपत्निश्च तथा च प्रियभाषणं ॥ स्वजनेऽपि
परे चापि तदीदार्यमिति स्मृतमिति नायकौदार्यगुणलक्षणं ॥ ह ॥ विन्ना देति ॥ पुनः कीदृशं ॥ विन्ना
विन्नादकदंबतले मिलितं कलिकलुषभयं शमयंतं ॥ मामपि किमपि तरंगदनंगदृशा मनसा रमयंतं
॥७॥
दृप्तनिर्मलस्य कदंबस्य तले मिलितं संलग्नं ॥ मत्संकेती कृतकदंबतले मदपेक्षया अंतरा वग
त्वा कांचिन्मामपश्यन्त्विति ॥ मया सह नर्मार्थिवान्निलीय स्थितं ॥ पुनः कीदृशं ॥ कलिः प्रणयकलहस्त ३८
स्माद्यत्कलुषं चित्ते कलुषं जेष्ठदुःखं के नैसमागतायं नागतः प्रायश्चोऽन्यनारीसक्तो भविष्यतीति ॥ अतः
परं यद्यास्पतितदा मयाऽमेनसंभावणीयमित्येवं रूपं एकाकिनी कथमत्र तिष्ठामीति च भयं ॥ अथवाम
न्नानाय श्रयं एतद्भयं कदंबमूलादुपेत्य बाहुक्रियैः शमयंतं ॥ पुनः कीदृशं ॥ किंमप्यनिर्वचनीयंय
थास्यां रंगत्तरंगइवाचरत् ॥ वारंवारमुच्छलतं नगः कामो यत्र एतादृक् याद्दृक्तया दृशा दृष्ट्याम
नसा च अपिरमयंतं ॥ यद्वा ॥ मत्कंमिधो विद्यास्मिन्नुत्तरंगदनंगमेव पत्रूपनीति तरंगदनंगदृक्तादृशेन म
नसा मामपि रमयंतमित्यर्थः मम पीत्यपि शब्देन सो दुःखान्नाम्न्यहमपि तस्य कस्याचिद्धोकोत्तरप्रणय
स्यपात्रमासमिति ध्वनितं ॥ यद्वा ॥ वक्रोन्मायथा चंद्रावल्यादिप्रभृतयः प्रियास्तथाहमपि इति ईर्ष्यो
क्तिः ॥ अथवा ॥ स्वयमपि रमयन्नू मामपि रमयंतं इति चन्यामं अहमेव विशिष्टा कृता ॥ अथवा ॥ अमा
सां किमपि किंचिंदपि तरंगअनंगदृशा अवलोकनमात्रेण रमयंतं न तु मां कृतात् व्रजपुरवनितानां वर्धयि
तृ काम देवमिति नागवतवचनात् अन्यासु काममेव वर्धयितिन तु रमयतीत्यर्थः ॥ मनसा आमं तरेण तु
मामेव रमयंतं क्रीडयंतमित्यपि शब्दोऽवधारणार्थोऽचितः सर्वान्मोमय्येव प्रेमाधिक्यं दर्शितमिति ॥ यत्र
कदंबतले यां मिलितमा प्रमत्तत्र स्वयं क्रीडन्न किमपि अनिर्वचनीयां प्रेमसुरतमयतया कथितुं अशक्यां
क्रीडां प्रति मामपि रमयंते क्रीडयंतं ॥ एवंभूतं कृष्णमेमेमनः स्मरतीति भावः ॥ कलिस्मात्कजदेशरेग
लिरंति पुगे युधाति विम्ब ॥ कलुषं श्याविजेन सोरितिच ॥ ७ ॥ ॥ श्रीजयदेवेति ॥ श्रीजयदेवकवेरिदं भ
णितं पुण्यवतां श्रीकृष्णचरणस्मरणजनकपुण्यविशिष्टानां हरिचरणस्मरणं प्रति श्रीराधाकथित
रसक्रीडाद्याचरणं तत्स्मरणं प्रति संप्रतिदृदानामपि अनुरूपं योग्यं ॥ तादृशमा व विशेषेण स्वाद
नीयमिति भावः ॥ कीदृशं ॥ अति सुंदरं मोहनं गोपवधूमोदकारि मधुरिपोः ॥ अनेन सुंदरमोहनरू

यं अधरामृतपानेनेवेति॥ श्रीराधाया एवं गौरवं सूचितमिति॥ कृष्णस्य रूपं वर्णनीयत्वेन तत्र तादृशं॥ अ
थवा॥ श्रिया राधयाऽऽदौ उक्तं पश्चाज्जयदेवेन तन्मुखात् भणितं पवित्रं हरेश्चरित्रं पुण्यवतां हृदि राध
नपुण्यवज्जनानां कानुरूपं श्रवणकीर्तनादि॥ कीदृशं अतिसुंदरं प्रेमास्पदं मोहनं आसक्तिप्रदं मधुरिपोः
श्रीराधया अधरामृतहरणे रिपोः अधरामृतहरणशीलस्य श्रीकृष्णस्य रूपं यत्र तं॥ प्रतिसंप्रतिदिने
दिनं प्रति क्षणं क्षणं प्रति वा अनुरूपं श्रवणादियोग्यं इदमेव पुण्यपुंजेषु पुण्यवतां स्मरणीयं नान्यदिति
भावः॥ मधुवंशसंतेः श्रीराधावियोगेन परिश्रयस्थितस्य॥ पुनः कीदृशं॥ भणितं हरिचरणस्मरणं हर

श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं॥ हरिचरणस्मरणं प्रतिसंप्रतिपुण्यवतामनुरूपं॥ ॥८॥

तिसंकटदुःखं स्मरणविघ्नं वा हरि श्रीकृष्णतस्य चरणयोः स्मरणं॥८॥ ननु कृष्णस्त्वां विना अन्यगो
पीभिः सह विहरति त्वं किमिति स्मरतीत्यत आह गणयतीत्यादि॥ मम मनः कृष्णे पुनरपि काममति
लाषं करोमि॥ कीदृशे कृष्णे युवतीषु वल्लवीषु गोपवधूषु बलेनैव रममाणात् आयस्यतादृशे॥ अतएव मां ३९
विना विहारिणि वारं वारं विहरणशीले॥ कीदृशं मनः॥ वामं प्रतिकूलं॥ वामत्वे हेत्वंतरमप्याह॥ गणय
तीत्यादि॥ तस्य गुणानां सौंदर्यादीनां ग्रामं समूहं गणयति परिसंख्याति॥ आमं क्रोधं भ्रमादपि नेहते ने
च्छति॥ दोषं मदिधप्रणयनन्यवधीरणादिकं हरेर्नो विमुंचति॥ तत्र हेतुमाह॥ परितोषं संतोषं वहति॥

अत्र विभावनाविशेषोक्त्यलंकारौ॥ निजानुसरणरूपानुरागहेतुं विनाप्यनुरागप्रकाशनात्॥ अन्यां
गनासक्तिरूपवैराग्याकथनाच्च तथा च काव्यप्रकाशव्याख्येयकारिका॥ क्रियायाः प्रतिषेधेपि फलव्यक्ति
विभावना॥ विशेषोक्तिरखंडेषु कारणेषु फलावचः॥ एषा च काव्यप्रकाशकृता व्याख्याता॥ हेतुरूपक्रि
याप्रतिषेधेपि फलप्रकाशनं विभावना॥ मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिरिति॥
ग्रामः स्वरे संवसथे वृंदे शब्दादिपूर्वके इति विश्वः॥ आमः क्रोधे रवौ रोगे मावितिच॥ वामं सव्ये प्रतीपेति॥ का
मस्मरे निजाये चेत्यपि॥ अथ वा मम मनः कृष्णे रसमयमेवैकामं करोति॥ तत्र हेतुः॥ बलात्कारेणापि
पि॥ अतएव युवतिषु मां विना विहारिणि न विहरतीति तथा ब्रूते किं चेति॥ मम हेतुगुणेन प्रग्रामं ग

णयति गुणग्रामं आमं भ्रमादपि नेहते वहति च परितोषं दोषं विमुंचति हृदि रतः॥ युवतिषु वल्लवस्त्रीषु कृष्णे
विहारिणि मां विना पुनरपि मनो वामं कामं करोति करोमि किं॥१५॥

णयति॥ अनीत्यामं भ्रमादपीत्यादि॥ दोषमन्ययुवतिषु दाक्षिण्यरूपं॥ वामं सुंदरमित्यर्थः॥१५ नरिवंस
पद्ययाद्यपद्या विमुक्ता राधा कुंजांतगता सखीवालापव्याजेन कृष्णमेवांतध्यातिवतीदानीमुत्कृष्टकृष्ण
दर्शनलालसा सखीं प्रति स्वोत्कंठामाह इति वर्तते इति॥ गीतस्यास्य मालवरागः॥ एकतालीतालः॥ अथोत्कंठि
तानाम नायिका वर्णनीया॥ लक्षणं तु॥ उद्दाममन्मथमहाज्वरवेपमाना रोमांचकंटकितमंगकमुद्व

हंती॥ संवेदवेपथुवनोत्कलिकाकुलांगीमुत्कंठितां वदति तां नरतः कवी इति॥ अन्यच्च॥ उक्तानवति
सायस्याः संकेतं नागतप्रियः॥ तस्यानागमने हेतुं चिंतयंत्याकुलायथा॥ किंरुद्धः प्रियया कयाचिदथवा
सख्या नयोद्वेजितः किंवा कारणगौरवं किंमपि यन्नाद्यागतो वल्लभः॥ इत्यालोच्य मृगीदृशा करतले संस्था
प्य वक्त्रांबुजं दीर्घं निःश्वसितं चिरं च रुदितं मुक्ताश्च पुष्पस्रजः॥ हे सखि मां कृष्णं प्राप्नोस हायिके मया
उत्कंठितया सह केशिमथनं केशिनामानं राक्षसं मथ्नातीति तं रादितवान्॥ श्रीकृष्णं प्राप्नोस हायिके
मयाउत्कंठितया सह केशिमथनं केशिनामानं राक्षसं मं रमय क्रीडया कृष्णस्य निर्दयोऽहं तु तं वि

निहतनिकुंजगृहं गतया निशि रहसि निलीय वसंतं॥ चकितविलोकितसकलदिशा रतिरभस
वशेन हसंतं॥ सखि हे केशिमथनमुदारं॥ रमयमया सह मदनमनोरथभावितया सविकारं॥१॥

ना प्रियेऽतोऽहमेव त्वां वदामीत्येतदर्थं केशिमथनपदोपादानं॥ ननु निर्दयः कथं रतिमाचरिष्यतीत
त्राह उदारमिति॥ उदारं दानं ददाति हे किं करिष्यामीति शंकारहितं॥ तथा च दातृत्वस्वभावेन मह्यमपि रामः
रमणं दास्यतीति तेन सह मां रमयेति भावः॥ ननु यदि मिलिष्यति स्वायमानं संस्मृत्य वंचनं चतुरापत्य ४०
पमानमेव कुर्यात्तदा का गतिस्तत्राह मदनमनोरथेति॥ मदनेन कामेन मनोरथः कांतपरिरंभणादि
लक्षणो यस्मिंस्तादृशो भावोऽभिप्रायः ममसंजातोऽस्यास्मदस्य संजातं तेनारकादिस्वइतस्त्र्यस्य यः॥ तथाच

ममतद्दर्शनेन धैर्यमिव न स्वास्थ्यमिति कवं चनशंकापीति भावः॥ ननु मदनमनोरथभावितमेव कथं ज्ञातमत
त्राह सविकारमिति॥ सविकारं यथा स्यात्तथेत्यर्थः विकारः कुचोदरादिप्रकटनं तत्सहितं यथा स्यात्तथैव
॥ तदुक्तं रसिकसर्वस्वे॥ नाभीमूलकुचोदरप्रकटनं व्याजेन यद्द्योतितं मा कांक्षं मुहुरीक्षणं स्खलितता
नीवीनिर्बंधस्य च॥ केनास्त्रं सनसंयमोन्नकमितुमित्रादि संदर्शनैः सोत्कण्पादिगुणप्रशास्ति कथने सत्वा
नुरागेंगितमिति॥ तथा च चेष्टये वमन्ये तोषन्निमा कलयेति भावः॥ तदुक्तं वैशिकशास्त्रे॥ स्निग्धं दृष्टि
पथं विभूषितवपुः करास्यकंडूयनं केशानां च मुहुर्मुहुर्विविवरणं निःश्वस्य चालोकनं॥ नाभेर्दर्शनम
य तोवकुचि धंवालस्य चालिंगनं कुर्वीरिन्नवशाः स्त्रियस्स्मदनादृह्यन्निस्रूपं नरमिति॥ ननु त्वया स
ह कदाचिदपि तेन क्रीडापि न कृताऽतस्त्वां कथं रमयामि तत्राह निभृतेति॥ अस्यामष्टपद्यां च तुर्द
शोधात्मानं विभ्रिष्य च तुर्द्धा क्रीडाकर्तृत्वेन रूपं विभिनष्टि॥ अत्र दक्षिणनायकः श्रीकृष्णः॥ तदुं
क्रीडांतरं वर्णयति प्रथमेति॥ प्रथमसमागमेन लज्जितयाऽव्रीडितया पटुचाटुशतैरनुकूलं वैलक्ष्या
पनोदनचतुरं॥ संस्तवशतैरनुनयकारकमिति वा॥ वैलक्ष्यापनोदनचातुरी॥ मुग्धामनुनयते
षमृदुयायेन सांत्वयन्॥ नातिनीतिकरेण वैनिर्विधैवल्लिनीयकेऽत्यदा॥ सरतिसरसस्तीरादेषा
त्रमक्रमराबलीसुमुखी द्विमुखीपङ्क्ते मन्ये तवास्यापि पास्यया इति निगदिते किंचिज्ज्ञात्वा विवक्षितकंध
रावदनकमले वा ज्ञानत्र्याचिरं परिचुंबिता॥ अन्यच्च॥ प्रथममिह हिरासः पुष्पहगादिभिः स्यातस्व

दुमधुरवचोभिर्येनिर्येत्सन्निधाने करतलमथ गात्रे नामये छद्मस्वरस्याछुरितमुदरदृष्टे मंदमास्त्रिष्ट
दधादिति ॥३॥ लज्जातु पश्चाल्लाविनी ॥ तदुक्तं श्लिष्टः कंठे किमिति न मयामूढया प्राणनाथ श्चुंबत्यस्मि
न्वदनविरतिः किंकृता किं न दृष्टः । नोक्तः कस्मादिति नववधूचेष्टितं चिंतयंती पश्चात्तापं वहति तरुणी
प्रेम्णि जाते रसज्ञेति नरतीके ॥ तथा चैवंभूतां मामालक्ष्य वैलक्ष्यापनोदकं वचः कथयतीति भावः
॥ चतुर्थक्रीडामाह मृदुमधुरेति ॥ मृदुनीसूक्ष्मे अल्पेवा ॥ मधुरिम नोहरे स्मितभाषिते ईषद्धसितज
ल्पिते यस्यास्तथा ॥ अथवा मृदुस्मितभाषिते ईषद्धसितजल्पिते यस्यास्तया ॥ अथवा मृदुकोमलं म
धुरं मनोहरं स्मितं मंदहसितं यस्मिंस्तथाभूतं भाषितं जल्पितं यस्यास्तया ॥ शिथिलीकृतं दृढबंधत्वं

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं ॥ मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदु
कूलं ॥२॥

श्लथीकृतं जघनदुकूलं जघनस्थितपटवस्त्रं येन तं ॥ तथा च स्ववचनचातुर्यप्राथमिक
समागमलज्जायामपहृतायामीषद्धसितभाषिता मामालक्ष्य मम सुरतेच्छामनुमाय मे कंचुकं गारति
लकेत्यागी कुलीनः कृतज्ञोरतेषु कल्पः कला वित्तरुणो धनाढ्यः नम्रः क्षमी स्थिररुचिः सुभगो नि
मानी स्त्रीणां मतस्तु नवचाइह नायकः स्यादिति नायकत्वं ॥ योगौरवं नयं प्रेम सद्भाव दृढं यो यिति ॥
न मुंच त्यन्य चित्तौ पि स्त्रियो सौ दक्षिणो यथेति दक्षिणत्वं ॥ निद्रिरात्रौ निद्रितं निश्चलं वनतरमित्यर्थः ॥

एवंभूतं पल्लिकुंजगृहं लताम्मंडपरूपं गृहं नंदकृतया प्राप्तया ॥ रहसि एकांते निलीयति रोहिता न्तयवसं
तेति छंनं अत्रेत्थं भूतलक्षणे तृतीया ॥ तथा च रात्रौ संकेतिले जनागृहं गतां मामालक्ष्य निलायनरू
पं कामोद्दीपनक्रीडां करोतीति भावः ॥ न च केवलं निलायनः क्रीडामेव कृतवान् किंतु भावांतरं कृ
तवत्सामपि भावांतरमपि कृतवानित्याह चकितेति ॥ चकितेन चमत्कृत्या वचकितया सचमत्कृत्येति
वा विलोकिता निरीक्षिता सकला दिशो यया तया ॥ रतिरसभरेण रतौ सुरते रसो वेगस्तस्माद्विव
शस्य वशीनायत्तया ॥ रसेनेति पाठे रसेनानुरागेनेत्यर्थः हसंतं हासं कुर्वंतं तथा च ॥ चकितविलो
कितसकलदिशं मामालक्ष्य कुंजांतर्गतमपि नेताद्ब्रजमंद्राक्षीरिति सुरतोत्सवसंभ्रमेण हास्यं
करोतीति भावः ॥ निरंतरं हृदयं कांतमिति धरणिः निलीयेति लिडाम्बेषणे निपूर्वः क्ताप्रत्यये ल्यप्
॥ रसो वेग उत्साह इत्यमः ॥१॥ जघनदुकूलमपि शिथिलीकृतवान्मया च तदानज्ञातमिति भावः
॥ तदुक्तं नरतेनः ॥ कांते तल्पमुपागते विगलिता नीवी स्वयं बंधनात्वासो विश्लथमेखला गुणधृतं किं
चिन्नितंबे स्थितं ॥ एतावत्सखि वेद्मि केवलमहं तस्यांगसंगे पुनः कौ सौ कास्मि रतं च कीदृगमितिस्व
ल्पापि मेनस्मृतिरिति ॥ किंच ॥ एवं पूर्वानुभवः कथितः अतः परं प्रार्थनातं मया सह रमयेति तत्राह
हे सखि मम कार्यसाधिके ॥ केशिमथनं एवं क्रीडायां मम केशोन्माथिता हस्तांगुलिकं गिकयाये
नेतं ॥ अतः उदारं सर्वरसप्रदं तं मया तस्यानुकूलतया सङ्संयोज्य रमय रमणं कारणं कारयमया

कृत्वा तयोः समागमं करिष्यतीत्यर्थः॥ एवं सविकारं सुखचुंबनस्तनालिंगनवक्षस्तालिंगनादिनिर्यथासा
त्तथा मदनमनोरथभावितया तेनैव काममनोरथेनाविर्भावः कारितो यस्यास्तया॥ इदानीमपि तत्स्म
रणेनैव तथा त्वं जातमेव त्वत्तोरमयेति भावः॥२॥ किसलयेति॥ पुनः कीदृग्रूपा मया॥ किसलयशय
नेन वपल्लवशय्यायां निवेशितया॥ कीदृशं कृष्णं॥ चिरं बहुकालं व्याप्य ममैव उरसि शयानं॥ सुप्तं॥ ए
तेनालिंगनविशेषोक्तः॥ तदुक्तं पंचसायके॥ नायोपरिष्टाद्यथ तल्पमध्ये संलीयते यन्मिथुनं शा
रीरे॥ कामाभिमानात्कृतहर्षचेष्टितं तत्क्षीरनीरं त्विदं प्रदिष्टमिति॥ पुनः कीदृग्रूपा मया॥ कृतप
रिरंभणचुंबनया तादृग्रूपा॥ एतच्च जघनोपश्लेषरूपालिंगनाभिप्रायेण तदुक्तं॥ जघनकलितकांतश्रोणि

किसलयशयननिवेशितया चिरमुरसि ममैव शयानं॥ कृतपरिरंभणचुंबनया परिरभ्य कृताधरपानं
॥३॥

रंगोपरिष्टाद्व्रजति यदि ह नारी स्वस्तकेशोत्तरीया॥ करजरदनकृत्यं चुंबनं वा विधिज्ञः कुलपति जघ
नोपश्लेषमेनं मुनीन्द्र इति॥ चुंबनमपि पंचसायके यथा॥ उक्तेन कांतस्य मुखे हि युग्मं निपीड्यति श्ले
षमेनं मुनीन्द्र इति॥ चुंबनमपि पंचसायके यथा॥ कांचित्तला भुजाग्रे॥ चुंबोत्सवं नृत्यति सद्रना ५२
रीणां कंसमोहं मुनिभिः पुराणैरिति॥ कीदृशं॥ परिरभ्यालिंग्य कृतमदीयाधरपानं येन तं॥ अनेन
जालाटिकमालिंगनमुक्तं॥ तदुक्तं पंचसायके॥ अन्योन्यसंसक्तमुखं कपोलं नेत्रं ललाटं हृदयं च

बाहुं॥ सानंदनावश्यममीलिताक्षं जालाटिकं तत्त्वविदो वदंतीति॥ यथावा॥ संकेततल्पे च सुखोपविष्टं
गाढं पतिः श्लिष्यति सापि कांतं अन्योन्यगात्रे विशतीव रागात् दृढं तदाश्लेषमलज्जाभिधानमिति॥ पद्म
वासो किसलयमित्यमरः॥३॥ अलसेति॥ पुनः कीदृग्रूपा मया॥ अलसे मंथरे च ते निमीलिते च दृशौ
लोचने यस्यास्तया॥ एतेनांगिकः कामविकारः कथितः॥ यत्र भ्रूनिमारस्य पादपर्यंतिकाः क्रियाः॥ अं
गेन विहिता यस्मात्तस्मादांगिकमुच्यते इति भाविकालक्षणे॥ तदंगसंगमरसानंदे मुकुलादृष्टिश्च कथि
ता तदुक्तं संगीतरत्नाकरे॥ स्फुरत्संश्लिष्टपक्ष्माग्रा सुखविश्रांततारका॥ मुकुलादृष्टिरानंदे द्रष्टयोः स्य

अलसनिमीलितलोचनया पुलकावलिललितकपोलं श्रमजलसिक्तकलेवरया वरमदनमदादतिलो
लं॥४॥

त्सुगंधयोरिति॥ अथवा॥ अलसे च आलस्ययुक्ते न एव तु निमीलिते मुद्रिते लोचने यया अत्र निमीलि
तेनाधरपानादवधृष्टारब्धं चुंबनमुक्तं॥ तदुक्तं पंचसायके॥ हस्तेन नेत्रे परिमील्य भर्तुः संमीलिताक्षी
वदने स्वजिह्वां॥ निक्षिप्य च क्रीडति यत्र लोलास्वांतरसज्ञैरवधृष्टसंज्ञमिति॥ कीदृशं कृष्णं॥ पुलका
वल्या रोमांचपंक्त्या ललितौ मनोहरौ कपोलौ यस्य तं॥ अनेन सात्त्विकविकारः कथितः॥ तदुक्तं भरते
न॥ रणे च संगते चैव प्रियास्यालोकने तथा॥ हेतुत्रयं समासाद्य सात्त्विकः संप्रवर्तत इति॥ पुनः कीदृ
ग्रूपा मया॥ श्रमजलेन सुरतायासजनितश्रमवारिणा स्वेदेन सकलसक्लिन्नमार्द्रं वा कलेवरमंगं यया

 स्यास्तया॥ भ्रमजलन्नाकच्जकलेवरयेति पाठे॥ भ्रमजलन्नाकुजानि स्वेदविंदवः कलेवरे यस्यास्तया॥ क
 चित्तु भ्रमजलसिक्तेत्यपि पाठः॥ कीदृशं रुदन्तं वरउत्कृष्टो यो मदनः कृतीमदोहदस्तेनातिशयेन जोचं
चंचलं॥ वरः प्रचुरो यो मदनस्तेन यो मदः मत्तता तया तिलोलमिति वा॥ प्रचुरस्मरे हृष्यो वरिश्वति विश्वः स्म
मजलेत्यादिना निराकुलप्रगल्भेयं नायिकाचोक्ता॥ यथा॥ धन्यास्ताः सखि योषितः प्रियतमे सर्वांगसंल
ग्नेपियाः प्रायस्त्वं प्रथयंति मोहनविधावालंव्य धैर्यं महत्॥ अस्माकं तु तरीयपाणिकमलेष्वामोचयत्यं
शुकं कोयं का वयमत्र किंतु सुरते नैव स्मृतिर्जायते॥ ६॥ कोकिलेति॥ पुनः कीदृशं पामरया॥ कोकिल
कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं॥ श्लथकुसुमाकुलकुंतलया नखलिखितघनस्तन
भारं॥ ५॥
स्य कलो व्यक्तो मधुरो रवः शब्दस्तद्वत्कूजितं शब्दितं यस्यास्तया॥ अथवा॥ कलरवः पारा
वतपयस्विन्स्तदा कोकिलकलरवयोः कूजितमिव कूजितं यस्यास्तया॥ अनेन कूजितालंबं वात्यतरमुक्तं
तदुक्तं पंचसायके॥ पिककेकिशिखिकलहंससमायपक्षिनुजानां स्वनितमनुकरोति हि अंगनामनव्यथार्ता मुखद
शनविवनतित्क्षीढावदंति स्तनितमितसमासा चित्रसंभोगकाले॥ यथा वा रसिकसर्वस्वे॥ दासूह
म जावकंयूरकपोतहंसपारावतादिरुतानि धुनितं रतारंभे॥ तन्मिश्रनिःश्वसितसीत्कृतहाननादैः संयो ४३
जयेन्मदनबंधुवनमेषु नाथदेः॥ तत्रोक्तं॥ कोनितपा कथ्यमपि प्रथितं मया क्षपा चाल्पमुदितमनोनत्वारस्तेषु

॥ तत्कूजितं मृदुवदद्भिरनेकवारं शिक्षायिते गृहकपोतनतिर्यथा स्यात्॥ ननु वात्स्यायनादिशास्त्रे त्य एव क
म उक्तः॥ तदुक्तं॥ आश्लेषं प्रथमं क्रियात्तु द्वितीयं चुंबनं तथा तृतीयं नखदानं च दंष्ट्रादानं चतुर्थकं॥ पंचमं
क्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा॥ सप्तमं कंठशब्दश्च बंधनं चाष्टमं रतं॥ मिसन्नकंठशब्दस्य सप्तमरतस्यात्रेव
श्यमाण नखदानादिना श्रीकृष्णस्य रसिकतातंगः स्यादिसत आह जितेत्यादि॥ कीदृशं कृष्णं॥ जितो वशी
कृतः कामशास्त्रविचारो येन तं॥ तत्र कामशास्त्रविचारः प्रदर्श्यते॥ तद्यथा॥ चतुर्दशविधा नायस्त्रीया
सेव्या परा न तु॥ परकीयामपि नजत्वामामेव कामयेत्॥ परापि वात्नामधावप्रौढा दृष्टा च तु विधा॥ काजा
वल्लकरा स्त्रिष्टामधा स्त्रिष्टा रतिप्रदा॥ प्रौढावत्नक्षयकारीष्टा पुंस्त्वविनाशिनी॥ एवं चतुर्दशविधानां
देवादिसत्वानां मध्ये गांधर्वसत्वानां मध्ये रममाणस्क जितकामशास्त्रविकारः इत्युक्तं॥ गांधर्वसत्वा
या लक्षणं॥ उद्यानकाननरता गीतवाद्यरता तथा॥ हरिनकाचसुस्नाता गांधर्वासा प्रकीर्तिता॥
तत्सेवनं यथा॥ स्नात्वा सुगंधदव्यैस्तु संगीतध्वनिपूर्वकं॥ मत्स्यालिंगनदानेन गांधर्वी कामयेद्बुधः
ति॥ अथवा॥ मनसिजतंत्रं तंत्र विचारं॥ बंधादिकौशलं॥ आनंदावाप्तेः स्थितिरिति वा॥ अथवा जि
तोऽवतातो मनसिजतंत्राणां कामरायणानां मन्यविलासिनां विचारः सिद्धांतो येन तं॥ तदुक्तं॥ सा
क्षान्मन्मथमन्मथः॥ कामिनां दर्शयिनूदैन्यमिति॥ जितोऽभिभूतः विलासिनः मनसिजतंत्रस्य विचारो
येन तमिति वा॥ अयं भावः॥ चतुःषष्टिकलाकुशलस्यापि परमरसिकनायकस्य पुरुषोत्तमस्यास्या

तुङ्गजोन्नमानापिकासन्निधौ रसमग्नतया क्रमस्मरणान्नावात्रदोषः न च रसहानिः॥ तदुक्तं॥ रतिच
क्रमवत्त्रस्मिन्नैव शास्त्रं न च क्रम इति॥ पुनः कीदृशा मया॥ श्लथाः केशग्रहणचुंबनादिदानेन शिथिलाः
कुसुमैराकुलाः व्याप्ताश्च कुंतलाः केशाः कलापाय स्यास्तया॥ अथवा॥ श्लथकुसुमैराकुलाः कुंतलाय
स्यास्तया॥ कीदृशं॥ नखैर्विलिखितौ कितोद्व नौ निविडस्तनभारौ येन तं॥ अत्र लिखितपदोपादानात्पंक
जपत्राख्यं नखदानमुक्तं तदुक्तं पंचसायके॥ अत्य द्भुमे कस्फुरितोर्द्ध रेखं प्राकुःस्तनं पंकजपत्रसंज्ञं॥
दोर्मूलवक्षःस्तनना त्रिसंधावस्योपयोगं मनुते महेन्द्र इति॥ तच्चं प्रधानत्वाद्भावे यो रितिविरुद्धः॥ चिकुर॰
कुंतलो वालः कचः केशाः शिरोरुहहस्तमरः॥ ५॥ एतावत्पर्यंतं पंचपद्यालिंगनादिसप्तविधं बाह्यरत
चरणरणितमणिनूपुरया परिपूरितसुरतवितानं॥ मुखरविसृंखलमेखलया सकचग्रहचुंबनदानं॥ ॥६॥
मुक्तं संप्रति बंधाख्यमष्टमं रतमाह॥ चरणे सादि॥ चरणयोः रणितो नूतद्वायमानो मणिखचितो
नूपुरो यस्यास्तया॥ नायककृतबंधविशेषोदृत्तिः॥ यस्मात्तच्चरणयोः रणितो नूतद्वायमानोऽकृतोम ४५
णिनूपुरो यये त्यर्थः॥ एतच्च भ्रामरकं नाम विपरीतरतत्रिप्रायेणोक्तं॥ तदुक्तं रतिरहस्ये॥ चक्रवत्
भ्रमति कुंचितांघ्रिका भ्रामरकं नृजद्वनेसमुल्लितेइति॥ कीदृशं॥ परिपूरितः सवितः संपूर्णतां नीतः
सुरतः वितानोरतिविस्तारो येन तं॥ अनेन नायककृतकावंधाः कथिताः पश्चात्तरैः भ्रामरकबंधश्रांते

विदित्वा किन्नात्नयस्राय नष्ठितां मांस्वयमपि रमयिष्यतीति भावः॥ पुनः कीदृशा मया॥ प्रवंधुरवराव्द्रायमाना
पश्चाद्विष्टं खस्ता त्रुटितगुणमेखला कांचीयस्यास्तया॥ अनेन प्रेंखोलितनामकं विपरीतरतमुक्तं॥ तदुक्तं
वात्स्यायनीये पुरुषायितप्रकरणे॥ स्वजघनमेवदोलायमानं सर्वत्र भ्रामयेदिति प्रेंखोलितमिति॥ तत्र स
वर्त्रिशद्वंधमनोरमाकारेण यारवात्तः॥ मध्यान्हू वपिद्धिमनागेद्भ्रिणोन्नरनागेचेति॥ रतिरहस्येपि॥ सर्व
तः कटितटं भ्रमयदिप्रेंखश्र्वमिदमुक्तमूलितमिति॥ अत्रापि सर्वत्र शब्दार्थः सएव॥ कीदृशं॥ सकच
ग्रहं केशग्रहणसहितं चुंबनदानं यस्मात्तं केशग्रहणपूर्वकं चुंबनं विपरीतरतमेवोक्तं॥ तदुक्तं॥ शृंगारे चुं
बनं कार्यं पुंसालिंगनपूर्वकं॥ विपरीतग्रहे नाप्यासि कचग्रहचुंबनमिति॥ मेखलास्वरूपं धेस्मात्कांचीन्त्री
लनितंबयोरितिविश्वः॥ मेखलाकुसुदेकांचांवचसां क्रमबंधने इति॥ ७॥ रतिसुखेति॥ पुनः कीदृशा
मया॥ रतिसुखसमये सुरतसुखप्राप्तिकाले लीकोत्तरानुभवकाल्पंप्राप्तोयः संभोगः शृंगाराख्यो रसस्तेन ला
लसया मंथरया॥ कीदृशं कृष्णं॥ हरखिन्नमुकुलितेनयनसरोजे नेत्रकमले यस्य तं॥ अनेन द्वयोरानंदाव
स्थियुगपदेवसूचिता॥ तदुक्तं रतिरहस्ये॥ मूर्छनामीलनंचाक्षणोश्च्युतिकालस्य लक्षणं॥ सर्वमेतत्परि
णायसाधयन्त्नस्वयं च तइति॥ पुनः कथं भूतया॥ निःसहा असमर्था॥ अत एव किन्नालतया यनेनिपति
ता तत्तु व ना यस्यास्तया॥ अनेन सुरतांतसमयउक्तः॥ अंगस्वेदः शैथिल्यं च केशाव स्त्रादिसंहृतिः॥ जाति
च्युति सुखेना यविरामेच्छा च जायते इति तन्तरतः॥ तथा च विपरीतरतांते कोकः॥ स्वेच्छयामिलितंवदने

पवायोषिदाचरति सुरूपा पिर्तं आदितो वदति मेव यं चितं नृपतस्य करुणं च चेष्टते इति॥ तद्यथा॥ अतिप्र
यत्नेन रतांते तत्क्षणे नत त्यादवरो पिनासा आलंब्यत स्यैव करं करेणयोषाः कृतानंदमलिंदये तिरसार्ण
वसुधाकरे॥ कीदृशं मधुसूदनं॥ मधुररसास्वादलंपटं॥ अत्र मधुसूदन शब्दो भ्रमरपर्यायः॥ तदेव विशेष
णस्य द्योतयति॥ कीदृशं मधुसूदनं उदितमनोजं॥ उदितस्तत्कालं मुदित मुक्ताहारकांचीगुणास्वस्थानसे
द्वेदनसंजातपयोधरश्रोणिपरिसरस्पर्शादिना सलज्जितस्मितराधापांगविलोकनादिना च पुनराविर्भू
तो मनोजः कामो यस्य तं॥ तदुक्तं वात्स्यायने॥ अवसाने पि च प्रीतिरुपचारैरुपस्कृता॥ सविस्रंभकथा
थायोगे रतिं जनयते परामिति अनेन द्वयोर्माधुर्यतरः कथितः॥ अथवा॥ हृदक्षरश्रुति हसोरिति॥ न
यारेश्चुटिरिति॥ मधुमाधुर्यं क्षरतीति मधुसूदनः स चासौ मुदितमनोजश्च॥ मुदितो माधुर्यनिराश्लेषारस
सको रागेनानंदितो मनोजः कामो येनेति तमित्यर्थः॥ केचित्तु सामर्थ्यद्योतनाय मधुनामानं दैत्यं सूदि
तवानीति मधुसूदन इति व्याकुर्वंति ॥७॥ श्रीजयदेवेति॥ इदं श्रीजयदेवकविना भणितं वर्णितं यदुत्कं
ठितया गोपवध्वा राधिकायाः कथितं वचनं तत्सुखं वितनोतु विस्तारयतु॥ परतां श्रेष्ठ एवतामिति श्रो
षः कीदृशं॥ अतिशायेन मधुरिपोः श्रीराधाधरामृतचुंबनेदंतैः खंडनतयास्वादनेरिपुरिव रिपुः त ४५
स्य श्रीकृष्णस्य निधुवनं सुरतक्रीडां शालियतालयेवं नृपंसलीलामिति लीला शृंगारजा क्रियातत्सहित
मित्यर्थः॥ सजीलं यथास्यादिति वा॥ अयोधनं निधुवनं सुरतं च रतेसममिसमरः कथितमित्यत्र

नावेक्तः॥ अथवा॥ वासलीलायां उक्तं वितगोपवधू इति उक्तं गानिस्यवां छायुक्तस्य गोपस्य नंदनंदनस्य श्रीकृ
ष्णस्येव वधूः श्रीराधा तस्याः वध्वायाः श्रीराधायाः कथितं स्वरहस्यं सखी प्रतीति शेषः॥ ननु श्रीजयदेवेन भणितं
प्रियास्वकीया पत्नी तस्य हि तेन जयदेवेन पवित्रं इदं प्रत्यक्षेनि सवत्र मानरूपं बाचितनोतु रसिके सुप्रसरतु
इत्याशीर्वादः प्रेमव शाच्च तस्यैव उक्तमित्यर्थः॥ कुतः यतः सुखस्वरूपमेवेदमित्यर्थः॥ अतः इदमेव परेषं
रा हृदि विस्तरतु इति भावः॥ इदमेव कथं सुखस्वरूपं अत एव मए व उक्तं गायुक्तो य स्यां तस्याः श्रीराधायाः प

रति सुखसमयरसालसयादेशे रमुकुलितनयनसरोजं॥ निः सहनिपतिततनुलतया मधुसूदनेन मुदि
तमनोजं ॥७॥ श्रीजयदेवभणितमिदमतिशायमधुरिपुनिधुवनशीलं॥ सुखमुत्कंठितगोपवधूकथितं
वितनोतु सलीलं॥८॥ ॥६॥
रमवधायाः कथितं॥ अतएवस्यानुनवरसरूपमिति भावः॥ यतः अतिशायंच
तिशेते सर्वोपरि अतिशायेन विराजते इति अतिशायं अतिशाय सुखरूपमित्यर्थः॥ पुनः कीदृशं इदं चरि
तं॥ मधुरिपुः मधुरिति अधः कृतो रिपुर्वैरी निनवियोगलक्षणो यत्र तत॥ यथा अधुच धरीकृतोरातदंतरा
ये॥ स्वनृपो रिपुर्येन तत्॥ पुनः कीदृशं सलीलं तयो विशेषणं सांउक्तापास्वालानक्तक्तं॥ अथवा अधुः
श्चोष्ठपुटे स्पृशा नुयादित्यर्थः॥ अथाद्भिसिकानामिति भावः॥ यतः निधुवनशीलं अंतलीलायां तु गोपा
गुप्तरूपः श्रीकृष्णः सनिधुवनं तिधानस्थानं॥ इदमेव परमनिधानवनं श्रीराधामोहनयोर्निधानवा

गीत॰टी॰ रिकात्रपंचकं॥ नक्षत्राणां वा परमनिधिरुत्पन्नि वनं छत्रं तच्छीलं तद्रूपं॥ अथवा॥ रसिकजनैरिदमेव वितनोतु वि
४६ स्तारयतु परमफलरूपत्वात्प्राप्नोतीत्यर्थः॥ ७॥ इदानीं अस्तुकं गेयास सख्या नायमानां गोपीगोपीगणवृतं कृ
ष्णं दृष्ट्वा पराहृत्य सखीमाह॥ हस्तेत्यादिना॥ सखि अहं गोविंदं कानने पश्यामि हृष्यामि च पश्यामीति वर्तमा
नसामीप्याद् भूतमानता॥ कीदृशं॥ व्रजसुंदरीगणवृतं॥ गोपवधूवृंदेन परिवृतं तं नतु सपत्नीभिः परिवृतं दृ
ष्ट्वा कथं तेहर्षितेत्यत आह॥ मामिति॥ मां उद्वीक्ष्य दृष्ट्वा विलज्जितं अन्यवधूभिः परिवृतोहमनया दृष्ट इति हे
तोः लज्जासहितं पुनः स्मितं तदेव सुधा अमृतत्वादतिस्पृहणीयत्वाच्च मनोविजेतीति हर्षविचित एवेति भावः॥ पु

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलं॥ मामुद्वी
क्ष्य विलज्जितस्मितसुधामुग्धाननं कानने गोविंदं व्रजसुंदरीगणवृतं पश्यामि हृष्यामि च॥ १६॥ ॥

नः कीदृशं अनृजुः कुटिला भ्रूवल्लिर्भ्रूलता यासामेतादृश्यो या बल्लव्यो गोपवध्वस्तासां वृंदं मुत्सार्य अप
सारयती सेवत्री यं दृगंतवीक्षितं नेत्रांतेनावलोकितं यस्य तं मय्यागतायां निजयादृगंतचेष्टया अन्यो पीर
पसारयंतमित्यर्थः॥ पुनः कीदृशं॥ हस्तात्स्रस्तो मदृष्ट्वा निंनसा धसवन्नणस्खलितो विलासवंशः क्रीडावेणु ४६
यस्य तं॥ पुनः कीदृशं॥ अतिशयेन स्वेदैः प्रस्वेदैरार्द्रं गंडस्थलं यस्य तं सवत्रिमादीर्घत्वस्य संबंधः॥ अन
नुजुभ्रूवल्लिमद्बल्लवीत्यनेन नासां सौंदर्यमुक्तं॥ अथवा॥ अनृजुः कुटिला मदाधिका दर्शनेन वक्राधूभ्रू

लता यासां तासां वृंदमपसारयती सेवं तं दृगंतवीक्षितं यस्य॥ अथवा॥ अनृजुभ्रूवल्लिमत्कटाक्षावलोकि
तेनमपि यस्य अन एव बल्लवीवृंदमपसारयतीत्यर्थः॥ अत्रानृजुभ्रूवल्लीति प्रियादर्शनेन भ्रूनर्तनं कथितं॥
नत्सौंदर्यमपि॥ अथवा॥ अनृजुभ्रूवल्लिमद्बल्लवीवृंदं तद्भावोद्बोधकत्वेन तत् अधिकं साभिविलासरणाभ्री
लेकटाक्षवीक्षितं यस्य तद्भावविस्तारकमित्यर्थः॥ तासामेवाभिसारिकमिति वा॥ अथवा अनृजुभ्रूवल्लिम
दबल्लवीवृंदेन मत्प्रणयदर्शनेनोत्सारितुं धंमसरणाभ्रीलं दृगंतवीक्षितं कटाक्षेक्षणं यस्य॥ एवं सकलगुणासं
पन्ननायिकामुकुटमणेः दर्शनादेव कृष्णे सांगाररसोत्पत्तिर्दर्शिता॥ तत्र राधामोहनावालंबनविभावनौ॥
अनुकूलप्रतिकूलनायकवशा कान्तिखंडिता रतिस्थायीभावः॥ वनाकुंज उद्दीपनविभावाः॥ स्मितकटाक्षा
द्यनुभावाः स्मितसुधामुग्धाननमिति॥ दृगंतवीक्षितमिति दर्शिताः॥ स्वेदकंपादयः सात्त्विकाः अतिस्वेदार्द्र
मुद्रिक्तत्वं तेषां दर्शितं॥ हस्तस्रस्तविलासवंशमिति वेपथुनामा द्वितीयः सात्त्विकः साध्वसादिति व्यभिचारिभा
वः॥ लज्जानयादिकाश्च व्यभिचारिणः इति महाकविना श्रीवृंदावने स्वयाः परमविदग्धायाव कृत्वेन संगीर
ससम्राट् शृंगार एव लिखितः॥ अलमतिविस्तरेण॥ अनुकूलश्चात्र नायकः॥ तदुक्तं अतिरक्ततया नार्यास्त्य
क्तान्यजनास्पृहः॥ सीतायां रामवत्सोयमनुकूलः प्रकीर्तितः॥ राधायामेव कृष्णस्य प्रसिद्धानुकूलता॥ त
दालोके कदाप्यनान्यासंगः स्मृतिं व्रजेदिति॥ तथाचाह॥ वैदग्धीनिकुरंबचुंबितधियः सौंदर्यसारोज्वलाः का
मिन्यः कति नाथ व पर्तं दीव्यंति गोष्ठांतरे॥ राधे पुण्यवती त्रिखाम लिरसिद्गामोह रिस्त्वां विना प्रेंखंतीन प
रासुयदकरिपोर्द्दृष्टित्रदक्षिमयेति॥ वंकरिपोः पदस्यार्थः बकं तद्विदीर्णयंतयोः रिपुः हंता ब्राते ना

स्वादकत्वस्यश्रीकृष्णस्येत्यर्थः॥ प्रेयोनामायमलंकारश्चतदुक्तंदंडिना॥ प्रीतिप्रकाशनंयत्तत्प्रेय इत्यभिधीय
तइति॥२७॥ पुनर्विशिनष्टि॥ दुरालोकइति॥ हे सखि प्रियसंयोगेन दुःखनिवारिके स्तोकोऽल्पः स्तबकोगु
च्छोयस्या एतादृशीयानवकाऽतिनवाऽशोकलतिकाऽनुकंप्याःशोककरणस्वास्याविकाशाःउक्तोधोदुरालो
कोदुःखेनाऽवलोकितुंशक्याः॥ नवकंकेत्यत्राकएवइतिदुःखः॥ रलतिकेत्यत्रानुकंपायांकः॥ महत्वपालि
तानएवानुकंप्याशोकलतिकादुरालोकेतिभावः॥ किमपरं॥ कासारः सरसीतत्संबंधियदुपवनंतत्संबंधी
यः पवनोवायुः सोपिव्यथयतिदुःखंददाति॥ कासारइत्यनेनवायोः शैत्यंकथितं॥ उपवनसंबंधित्वेनच

दुरालोकस्तोकस्तवकनवकाशोकलतिकाविकाशः कासारोपवनपवनोपिव्यथयति॥ अपिभ्रा
म्यद्भृंगीरणितरमणीयानमुकुलप्रसूतिश्चूतानांसखिशिखरिणीयंसुखयति॥२७॥ ॥८॥ ॥

सौगंध्यंमांद्यंच ध्वनितं॥ यतोवृक्षैरुपहतगतित्वेनमंदएववायुर्वतीति॥ अथवा॥ स्तोके त्यादिवायोरेव
विशेषणं॥ तदास्तोकस्तवकनव काशोकलतिकांविकाशयतीत्येवंभूतःपवनोव्यथयतीत्यन्वयः॥ निमुख
मागच्छन् पवनोऽचलादिनानिवार्यतामित्यतआह॥ दुरालोकः॥ अतीद्रियइत्यर्थः॥ तथाचाकस्मादेवापत
न्नरक्षपतइतिभावः॥ अपिशब्देनतद्विकाशितानशोकलतिकापिव्यथयतीतिध्वनितं॥ अपिचेयंशिखरिणी
गोवर्द्धनोपरिविन्यस्तमानाचूतानामाम्राणांमुकुलप्रसूतिःकुसुमोद्गमोपिनसुखयति॥ विकाशदशा
यांतुकोवेदकिंकरिष्यतीत्यपिनाध्वनितं॥ अथवा॥ कीदृशीमुकुलप्रसूतिःशिखरिणीप्रशस्ताऽग्रता

गवतीत्यर्थः॥ शिखरिणीतिप्रशंसायामिनिः॥ अथवा॥ शिखरिणीमल्लिकानसुखयतीत्यर्थः॥ कीदृशी॥ भ्रा
म्यंतीनांभृंगीनांभ्रमरांगनानांरणितेर्गुंजितैःरमणीया॥ भृंगांगनानांभ्रमणंनायकान्वेषणार्थमितिध्वनितं॥
शिखरिणीनामकंछंदश्चित्यपिसूचितं॥ स्तोकोल्पेचातकेइतिविश्वः॥ स्याद्गुच्छकस्तु स्तबकइत्यमरः॥ स्तत
ज्योतिष्मतीवृक्षत्रारवाः वल्लिप्रियंगुष्वितिविश्वः॥ कासारः सरसीसरइत्यमरः॥ स्त्रीरत्नेमल्लिकायांचप्रोक्ता
शिखरिणीबुधैरितिविश्वः॥२७॥ ॥साकूतेति॥ केशवोहरिर्वोयुष्माकंक्लेशंहरतु॥ किंलक्षणः॥ गमिसाकांक्ष
॥श्रीराधायांप्राप्ताभिलाषः॥ अन्यासुगोपीषुतदृशानितुगमितानिरस्ताकोप्यायस्यसइतिवा॥ किंकुर्वन्
॥ निभृतंयथास्यात्तथानिरीक्ष्य॥ निभृतंरहस्यंभावप्रकाशनमितियावन्निरीक्ष्येतिवा॥ अतःहृदयेचिरंचि

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजामूलार्द्धहस्तस्तनं॥ गो
पीनांनिभृतंनिरीक्ष्यगमिताकांक्षश्चिरंचिंतयन्नंतर्मुग्धमनोहरंहरतुवःक्लेशंनवःकेशवः॥२८॥ ॥इतिश्री
गीतगोविंदेक्लेशकेशवोनामद्वितीयःसर्गः॥२॥ ॥

तयन्॥ किंनिरीक्ष्येत्यपेक्षायामाह॥ साकूतस्मितंसाभि
प्रायमीषद्धसितंपुनःकिंआकुलाकुलगलद्धम्मिल्लं॥ आकुलाकुलोत्यंतास्वस्थोगलन्नुत्मुक्तोनवद्ध
म्मिल्लःकेशपाशस्य॥ कामोद्रेकाडीमोक्रमादिहेतना॥ पुनःकिं॥ उल्लासितभ्रूवल्लीकंउत्क्षिप्तभ्रूवल्लीकं
॥ अलीकदर्शितभुजामूलार्द्धहस्तस्तनं॥ अलीकेनछलेनदर्शिताःभुजामूलार्द्धहस्तस्तनाःयत्रकर्मणितत्
अत्रार्द्धशब्दोहस्तस्तनाभ्यामभिसंबध्यते॥ हस्तौचस्तनौचेतिद्वंद्वसमासः॥ जंभणादिव्याजेनभुजामूलार्द्धहस्त

स्तनप्रकरणमिति भावः॥ किंचार्द्धलिंगनमप्यत्र ज्ञेयं॥ तदुक्तं॥ वामबाहुः शिरो यत्र वामस्तनोत्रतिः॥
सालसम्भूविलासं च तदुक्तं तदर्द्धलिंगनमिति ज्ञेयं॥ तदुक्तमिति॥ कामामित्युक्तमाह॥ गोपीनां॥ किं भूतं त
त्रुष्णयं॥ मुग्धमनोहरमिति॥ मुग्धानां मनो हरतीति तथा॥ किं लक्षणो हरिः॥ नवस्तरुणः॥ तरुणं दृष्ट्वा
स्त्रीणां कामविकारो भवितायतइति॥ अथवा॥ नवः श्रीराधां दृष्ट्वा ऽन्यादृशाख्यमानः॥ अत्यद्भुतगुणप्रकट
नात्॥ अथवा॥ नवः नूयते नायकगुणैः स्तूयत इति॥ अथवा॥ नवः नित्यनूतनः नित्यानुभूयमानस्यानु
भूत इति मनीतिः॥ तद्यथा॥ कुलवरतनुधर्मग्रावबृंदानि भिंदन् सुमुखि निशितदीर्घापांगटंकछटाभिः॥
युगपदयमपूर्वः कः पुरो विश्वकर्मा मरकतमणिलक्षैः गोष्ठकक्षां चिनोति॥ निभृतं भावप्रकाशनमिति
व्याख्याने सानुकूलस्मिते त्यादिचतुर्णामपि पदानां भावविशेषणत्वं॥ मुग्धमनोहरमिति च क्रियाविशेषणं
॥ चिरं चिंतयन् श्रीराधामिति यावत्॥१८॥ ॥ इति श्रीगीतगोविंदे क्लेशकेशवो नाम द्वितीयः सर्गः॥ ॥
प्रियजनानां क्लेशापहारी केशवो यत्र तादृशः॥ राधादर्शनाल्हादेन गतक्लेशः इति वा॥ अत्र केशवपदे
न इति सूचितं प्रियायाः केशानुकर्षणं च यतेइत्यनुपायामंकं गिकामासंतन्यते विलायंतेइति केशवप
दोपादाने सर्गद्वयेन श्रीराधायाः श्रीराधायाः श्रीकृष्णविषयिणी मुत्कंठा मुक्ता संप्रति कृष्णस्य पितस्यामा
ह॥ कंसारिरपीत्यादि॥ कंसारिरपि कृष्णोपि व्रजसुंदरीस्तत्याज॥ त्यागे हेतुमाह राधामिति॥ राधां हृदये
आधाय रोप्य॥ सौंदर्यवितावक्तारपि तस्या ज्ञेति कृष्णस्य राधायामनुरागातिशयो ध्वनितः॥ तल्लक्षणं प्रा क्
षितं॥ किंच॥ संगमोपाय रचितारम्भव्यवसायतः॥ संकल्पेच्छा समुद्भूतिरभिलाषोत्र विक्रिया॥ प्रेव ५८

णनिर्गमौत्सुक्य मीलदृष्टिपथगामिनो॥ रागप्रकाशन पराश्लेषः स्यात्प्रसाधनं॥ व्याजोक्तय श्चविजनेर
स्थितिरत्याद्यो मताइति॥ स्वकार्यस्य सवस्विप्यवस्थासु प्रवेशो ज्ञेयः॥ प्रथमकारणत्वात् प्रेम्णो माधुर्यनि
रसंपादकत्वाच्चेति॥ कीदृशीं राधां संसारः अन्यगोपीषु समसंसरणं अनुसरणं तस्य संसरणस्य अनुस
रणस्य श्रीकृष्णस्य गोपीषु यावासना इच्छा तस्याः वंधाय वंधनाय शृंखला वंधनरूपायां हृदयेपि आधा
य आसमंतात् धृत्वा धात्वा पि सा वासना ना सुन प्रसरति प्रात्यान प्रसरतीति किं वाच्यमित्यर्थः॥ अथवा
सम्यक् सारः संसारः आनंदचिन्मयो मधुराख्यरसः भगवदाश्रयत्वात् तद्विषयिणीया वासना नित्यसं
॥ ॥ कंसारिरपि संसारवासनाबद्धशृंखलां॥ राधामाधाय हृदये तत्याज व्रजसुंदरीः॥१९॥
स्कार स्तस्मिन् वंधाय शृंखला मिव निगडरूपामिवेत्यर्थः॥ उक्तंच॥ आनंदचिन्मय रसप्रतिभाविताभि
स्ताभिर्य एव निजरूपतया कलाभिः॥ गोलोक एव निवसत्यखिलात्मभूत गोविंदमादिपुरुषं तमहं भजामि
॥ इति ब्रह्मसंहितायां॥ अथवा॥ सर्वत्र भावेनानिसरणं श्रीराधायामिति संसारस्तद्विषयिणी या वासना
निरंतरा हृदये इति तस्या वंधाय स्ववशीकरणाय शृंखलामिव॥ तथा च कं सुखं सारयति विस्तारयतीति कं
स इति॥ शृंखलापुंस्कृतावस्त्ववं धेपि निगडे चेति विश्वः अथवा॥ गोपीगणवृते श्रीकृष्णे दृष्ट्वा श्रीराधायाः

दुःखं जातं तन्निवारणाय कंसारिपदोपादानं कंसकमनेकमनं दुःखं श्रीराधायाः तस्य अरिः निवर्त्तकः श्री
कृष्णः श्रीराधां हृदये आधाय अग्रासमं ताङ्ग्भावेन आभ्यंतरे धृत्वा व्रजसुंदरीः तेन सह व्रजनजनशीलाः परसेंदर्यो
पितसान श्रीराधासुखार्थमेव त्यक्तवानित्यर्थः॥ कथं तु तां श्रीराधां संसारवासनाबद्धश्रृंखलां श्रीकृष्णस्य
अन्याभिः सह संसरणरूपा अनुसरणरूपा वासना मनसः इच्छा तयैव च अपराधी जातः श्रीकृष्णस्तस्य वंधाय
वध्वारक्षणाय श्रृंखलां निगडरूपां स्मरणमात्रेणैव तन्निवारिकां अर्गलामित्यर्थः॥१९॥ पुनः किं कृतवां
स्तत्राह॥ इतस्तत इत्यादि॥ समाधवः कलिंदनन्दिन्या यमुनायास्तटं तकुंजेतीरप्रांतवत्तापिहितोदस्टहे

इतस्ततस्तामनुसृत्य राधिकामनंगवाणव्रणखिन्नमानसः॥ कृतानुतापः स कलिंदनंदिनीतटांतकुंजेवि
षसाद माधवः॥२०॥
विषसाद विषादं चकारः॥ अत्र माधवपदेन मा लक्ष्मीस्तस्या अपि धवः स्वामी यद्विरह
व्याकुलोऽव तवेति राधायाः सौभाग्याधिक्यं ध्वनितं॥ अथवा याया वंचनरूपायाः धवः पतिः स्वामी अत एव
श्रीराधां दृष्ट्वा अन्या वंचिताः इति वा॥ धवपदोपादानमित्यर्थः अथवा॥ मा लक्ष्मी वैकुंठे यतेरपि मायातिस्या ४९
अपिरूपास्त्वेन धवः स्वामी न तु राधयाः इव तोग्यत्वेन स्वामी इति लक्ष्मीः स कान्त्यादपि राधाया आधिक्य
मेव सूचितम्मिति भावः॥ किं कृत्वा॥ इतस्ततस्तेषु तेषु संकेतस्थानेषु तां अखिलपरिजनसार्गोन स्वहृदि
विनिहितां राधिकां अनुसृत्य अन्विष्य॥ कीदृशः॥ अनंगः कामस्तस्य वाणास्तैय व्रणं कृतं तेन खिन्नं दुःखितं मान

सं यस्य सः॥ पुनः कीदृशः॥ कृतानुतापः पूर्वमिव कथं मया तां तु नीयानीते दानीं तद्विना कथमवस्थातुं शक्या
त इति पश्चात्तापः कृतो येन सः अनंगपदेनानिवार्यत्वं ध्वनितं॥ अनेन श्लोकेन चिंताख्या द्वितीयावस्था कथि
ता तल्लक्षणं कथितं प्राक्॥२०॥ यथाव संतेवासंती त्यादिना राधाया अनुसरणं कथितं॥ तथैवात्र इतस्तत इ
त्यादिना कृष्णस्यानुसरणं दर्शितं॥ इदानीं कृतानुतापः इति यदुक्तं तदेव गीतेन वर्णयति॥ मामियमित्यादि
ना॥ गीतस्यास्य गुर्जरीरागः॥ तालस्तु प्रतिमंठस्यापि लक्षणं कथितं प्राक्॥ गीतार्थस्तु॥ हरिहरिहाकष्टं
साम त्वाणकोरिवद्ध नामख्यातगुणाराधा हतादरतया कृतव कुमानतया कुपितेव गता॥ विस्तं तेनकुपि
तेवे तुक्तं॥ प्रणयकोपेन समग्रयोगाभावात्॥ व्यभिचारी भावोऽयं कोप इति ज्ञेयं इति ध्रुवपदं॥ ननु सा
मामियं चलिता विलोक्य वृतं वधूनिचयेन॥ सापराधतया मयापि न निवारितातिभयेन॥१॥ हरिहरिहतादर
तयागता साकुपितेव॥ ध्रुवपदं॥ कुपितागतेति कथं त्वया ज्ञातमित्यत आह॥ मामियमित्यादि॥ मां वधू
निचयेन गोपवधूसमूहेन वृतं वेष्टितं विलोक्य दृष्ट्वा चलिता प्रस्थिता॥ विलोक्येत्यव्यवहितस्व क्रियाकालप्रत्य
यस्तेन गोपवधूवेष्टितं मां दृष्ट्वा अव्यवहितकाल एव यतश्चलिता ततो ज्ञायते कुपितेति भावः॥ ननु सा गच्छति
त्वया किमिति न निवारितेत्यत आह॥ सापराधतयेति॥ मयापि भयेन पतिस्त्रायातं ज्ञात्वा सा न निवारिता॥
अस्याग्रे कथं वक्तुं शक्यत इति भयहेतुमाह॥ सापराधयेति॥ अपराधो राधां विहाय अन्यगोपीभिः सह क्रीडा

रूपलक्षकत्वया॥ अथवा॥ हरिरिति स्वनामोच्चारणमेव तस्याः सुखहारक इति खेदोक्त्या हरिपदोपादानं॥ किं
क्रिमद्रुतिखेदेन॥ अथवा॥ दुःखभरेण स्वोत्कृष्टस्य नामस्थानं न तु स्वस्य निकृष्टस्य वा॥ अनेन तु स्वस्यैव नामो
च्चारः कृतस्तत्र श्रयमभिप्रायः॥ स्वोत्प्रेक्षयात्यन्तस्य महत्तमेव नाम्नीति स्वनामोच्चार एव कथित इति वा॥ अ
थवा॥ स्वस्य नाममाहात्म्यं स्वयं न जानाति॥ किं तु नक्रेभ्यः श्रुत्वा ज्ञातं पश्चात्तन्महिमानं लोको त्तरं ज्ञात्वा स्व
दुःखावसरे स्वेनैव स्वनामैव तदुच्चरितं दुःखहारकत्वात्॥ हरि हरीति त्वरयादरेणो वोक्तमित्यर्थः॥ हरिरित्य
क्षरद्वयमिति तन्नाम्नः स्तोत्रमपि वर्त्तते विष्णुपुराणादौ इति॥ हरिनामोच्चारमहिमा च श्रीमुखेनैव दर्शि
तः॥ अहो हरिनाम्नापि ममापि दुःखं गच्छतीति किंमुत नक्रानमितिच हतिनूनं हरिहरी॥ तदुच्चार एव कर्त्तव्यः
न तु मिथ्यावाद इत्यपि स्वोच्चारेण अन्यानपि उपदेशाएव कृतो ज्ञातव्य इति महानुभावार्थश्च दर्शित इति
भावः॥ अथवा॥ इष्टवियोगदुःखे सति इष्टस्यैव नाम आयाति॥ तदेव दुःखहारकत्वात् यस्मादिष्टात्स्वो
त्कृष्टाच्च श्रीराधा एव तद्वियोगेन तस्या एव नामाक्षरद्वयं परोक्षतया उच्चरति॥ हा राति हा राति च क्रमे
प्रेमविकलत्वात् गद्गदतया हरि तद्धरीति हृतनस्तया अन्तराकलपदोच्चारे वक्तृतो ज्ञातव्य इति भावः॥१॥
किं करिष्यतीति॥ सा चिरं विरहेण चिरकालीनमद्विरहेण किं करिष्यति विरहतापनूनां त्यर्थं कृमुपायं ५०
करिष्यतीत्यर्थः अनेन स्वविरहमहत्त्वा लामवधार्य तद्दुःखाक्रान्तत्वेन सुहृत्प्रणयी कथितोदर्शितः॥ तद्यथा
॥ यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रियदधीमहि कर्कशेषु॥ तेनाटवीमटसि तद्व्यथते न किं

स्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः इति॥ अथवा॥ चिरं विरहेण तमंमां ज्ञात्वा मामङ्गीकारं किं करिष्यति यथा क
थंचिदपि रोषः॥ किमिति चिन्तके अत्र क्षणस्यापि विश्लेषे वहुकालस्फूर्त्तिः॥ तदुक्तं श्रीभागवते॥ क्षणं युगत्वान
मिव यासां येन विना भवन्॥ इति महाभावस्यानुभावोयं चिरमित्यनेन कथितः॥ अथवा॥ किं वदिष्यति॥ अ
पराधक्षमापनार्थं चरणे निपतितं मां दृष्ट्वा किं कोपेन तिरस्कारकवचनमपि कथयिष्यति॥ अथवा॥ किंम
या सह कदाचिन्माधुर्यवर्षिणा वाणया संहासं किं कथयिष्यति॥ अथवा॥ किं मम सत्कथां वा वदिष्यति॥ दोषान्वा
वदिष्यतीत्यर्थः॥ अथवा॥ मयि चाटुभिर्मिलिते किं कोपादिकं करिष्यति॥ किं परुषं वा वदिष्यति॥ अपि तु को

किं करिष्यति किं वदिष्यति सा चिरं विरहेण॥ किं जनेन धनेन किं मम किं सुखेन गृहेण॥२॥ ॥ ध्रु॥ ॥

पं विहाय प्रसन्ना सती मधुरमेव वदिष्यतीत्यर्थः॥ एवं मानादिप्रकरणेस्मिन् रसे मुनिना हरिवंशे जयदेवेन
चात्रैव श्रीकृष्णस्य रसास्वादलालामयमूर्त्तेर्विकुर्वाचेष्टितं निरूपितं तेन एषु व्याख्यानेषु कल्पनानाशंक
नीया॥ ननु एतावता तस्यामेव कोममाग्रहः॥ अन्यगोपीजनास्तु सन्त्येनेन चित्रव्यावर्त्तनं कर्त्तव्यमित्यत
आह॥ किं जनेनेति तया विना मम जनेन गोपीरूपपरिजनेन किं॥ गोपाङ्गनारूपपरिजनो मे किं चित्कर
इत्यर्थः॥ जनेनाशेषपरिजनेन किमिति वा॥ तद्वियोगेन सर्वजनपरित्यागात्॥ अपि च धनेन किं धने
न पितु॥ श्रीव्रजेश्वरस्याखिलस्वो कान्तिशायिन्या संपत्त्या मम किं न किमपीत्यर्थः॥ तद्वियोगे विविधवि

चार्जकरणं नामपि संतापकत्वेन परित्यागात्॥ अतः सैव मम मन्मथरूपाम हा धनरूपा चेति भावः॥ वक्ष्य
ते चाग्रे॥ त्वमसीत्यादि॥ ननु धनं विना गृहसौख्यं न स्यादिति चेत्तत्राह॥ गृहेण किं तया विना गृहे मम किं प्रयो
जनं न किमपीत्यर्थः॥ तद्वियोगेन वनवासांगीकारात्॥ ननु सुखस्यास्य गृहं तेन विना सुखं न स्यादत आह
॥ मम सुखेन किं तया विनान्यसुखेनापि मम किं प्रयोजनं सैव मम सुखरूपेति भावः॥ अथवा॥ मम सुखेन
त्वत्संबंधिसुखेन किं मम सुखं दुःखानुभवेन सुखप्रदानामपि दुःखप्रदत्वात्॥ तत्सुखेनैव मम सुखमित्य
र्थः॥ किं जनेन धनेन किं मम जीवितेन गृहे रोऽतिपाते मम जीवितेन किं तदुःखासहिष्णुतया मम जीवितम
प्यकिंचित्करमित्यर्थः॥ स्मृताख्या तृतीयावस्थेयं कथिता॥ तदुक्तं रसार्णवसुधाकरे॥ अर्थानामनु
भूतानां देशकालानुवर्तिनां॥ सातत्येन परामर्शो मानसः स्यात्तु स्मृतिः॥ अत्रानुभावा निःश्वासो ध्या
नकृत्यं विहस्तता॥ त्राय्या सनादिविद्वेष इत्याद्याः स्मरकल्पिता इति॥ २॥ एवं तां विना सर्वेषां दुःखरूप
त्वं कथितं॥ इदानीं तद्दुःखाक्रांतस्यापि कुपितायाश्चापि तस्या एवैकचिंतनपरत्वेन प्रेमसौहृदं वर्द्धय
तिचिंतयामिति॥ अहं तदाननं चिंतयामि॥ स्मरामि॥ कीदृशं रोषभरेण कोपातिशयेन कुटिलभ्रूकु ५१
टिलाल्पचित्रिता तादृशं कमिव उपरि भ्रमता संचरता भ्रमरेणाकुलं व्याप्तं शोणपद्ममिव रक्तपद्ममि
व अत्र रोषारुणेन मुखे शोणपद्मसादृश्यं बोध्यं वारंवारं रोषाद्वक्रीभवंत्याश्च भ्रुवो भ्रमरवद्भ्रमरोप
मा बोध्या॥ अनेन गुणकीर्तनाख्या चतुर्थावस्था कथिता॥ तदुक्तं॥ अंगप्रत्यंगलीलाभिवक्तिचेष्टाहसि

तेक्षणैः॥ नतस्य सदृशः कश्चिदित्यादि गुणकीर्तनमिति॥ शोणः कोकनदच्छविरित्यमरः॥ अनेनाव्यभिचा
रिसौंदर्यं दर्शितं कुत्रापि शोणतापदत्वात्॥ किंच माधुर्यं नाम नेत्रैव॥ तदुक्तं माधुर्यं नाम चेष्टानां सर्वावस्थासु
चारुतेति॥ ३॥ अहं वने किं तामनुसरामि किमिति तस्यानुसरणं करोमि॥ इह किं वृथा विलपामि॥ किमि
ति वृथा विलापं करोमि हि हरिसंगतां हृदये संलग्नां तां अनिशं निरंतरं मनोरथशतैरायेन रमयामि क्रीडया
मि॥ वियोगे संयोगस्फूर्तिः मदनावविकाकारोयं॥ अथवा॥ किं शब्दः प्रश्ने॥ अहं तां हृदिसंगतां अनि
शं किं रमयामि किं वने तामनुसरामि वृथा विलपामीत्यर्थः॥ ४॥ तच्चोति॥ हेतत्त्वां मम वियोगेन कृशां

चिंतयामि तदाननं कुटिलभ्रुरोषभरेण॥ शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण॥ ३॥ ताम
हं हृदिसंगतामनिशं भृशं रमयामि॥ किं वनेनुसरामि तामिह किं वृथा विलपामि॥ ४॥ बा॥

गीतवत्कृत्यं अस्यपयामपि दोषाविष्करणेन खिन्नं खेदयुक्तं त्वां कल्पयामि पत्रपमिता नामीत्यर्थः॥ इ
यं चोद्वेगावस्था॥ तदुक्तं शृंगारतिलके॥ यस्मिन्नुरम्यमरम्यं स्यात्नचल्बोधि किंचन॥ विद्वेषः प्राणित
व्येपि सउद्वेगस्मृतो यथेति॥ इयं तु श्रीराधायां युज्यते॥ तथा च मनसः खेदयुक्तत्वात्तन्वीति संबोधनमु
चितमेवेति॥ तन्वंगीत्यादि॥ त्वं कुतोगतासि तदहं नावैमि॥ तेन वनं तेन प्रणत्याऽनुनयामि त्वामित्य
र्थः॥ कचित्तुते नेतिपाठस्तदा नेतुं तेन तव रुक्सानुनयामि त्वामित्यर्थः॥ अथवा॥ नु इति वितर्के तेनेति

लक्षणे वयंतथापर्यमार्गे लक्ष्मीकृत्यगतासितेन तं मार्गं लक्ष्मीकृत्यगतानेऽनुनयामि तवानुनयं करोमीति इ
ति संबंधमात्रविवक्षायां षष्ठी॥ अनेन विज्ञापावस्था कथिता॥ तदुक्तं शृंगारतिलके॥ वं त्वमीति मनोयस्मिन्नूत्य
सौत्सुक्यादितस्ततः॥ वाचः प्रियाश्रयाए वसप्रलापस्मृतोयथेति॥ ५॥ हृत्रूपस इत्यादि॥ हे सुंदरि पुरेव श्वश्मित
मसे त्वमादरं नंग्यासचकितं वा परिरंभणमालिंगनं किंकिमिति न दद्रासि न प्रयच्छसीत्यर्थः॥ ससंभ्रममिति॥
सानीक्षेपिप्रियतमात्मीयस्तेजोऽगमिव यं जनादिष्टोकोऽनुभावविशेषो भणितः तदुक्तं॥ इष्टेपि गर्वमानाभ्यां वि

तत्रिरस्त्रमस्त्वया हृदयं तवाकलयामि॥ तत्र वेश्मिक्कनीगतासितेन तेनुनयामि॥ ५॥ हृत्रूप
सिपुरतो गतागतमेव मे विदधासि॥ किं पुरेव ससंभ्रमं परिरंभणं न ददासि॥ ६॥ ॥७॥॥

श्लोकः स्यादनादर इति॥ तद्यथा॥ प्रियो क्लिक्षणविपक्षसन्निधौ सीकारितां पत्रपरिखंडितौ मौलिनाम्ना
मातिवामा हृदयंगमापि स्त्रजं दरास्त्राय निरास हेलया॥ यथावा॥ स्फुरत्यग्रेति छन्नसरवितवमुखक्षिप्तमन
यनः प्रतीक्षार्त्तो कंपं नवदवसरस्याद्यदमनः॥ दृत्रागवर्ग्यामीद्वरण गुरुहेत्नागहनयाहसंतीवक्षीवित्वमि ५२
ह वनमार्जारच यसीति॥ तमेमम पुरतो ग्रतः हृत्रूपसि॥ गतागतं यातायातं विदधासि करोषि॥ विरहिणो
हि चित्रानुषंगात्सर्वतस्तामेव पश्यंतीति यथा॥ प्रासादे सा दिशि दिशि तु सा पृष्ठतः सा पुरः सा पर्यंके सा पथि
पथि च सा तद्वियोगातुरस्य॥ हं हो चेतः प्रकृतिरपरा नास्ति मे कापि सा सा सा सा सा सा जगति सकले कोयमद्वैत
वादः॥ ६॥

क्षम्यतामिति॥ हे सुंदरि दन्तुनीयस्त्रपेक्षम्यं नो इमं मम मम राधं क्षमस्व॥ कदापि तवईदृशं॥ अपरं विप्रियं न क
रोमि न करिष्यामि इयं चोन्मादावस्था॥ तदुक्तं रसार्णवसुधाकरे॥ अत्रस्मृदति भ्रांतिरुन्मादो विरहोद्भवः इति
॥ पुनः किंचित्संजातविवेकः कथयति देहीत्यादि॥ हे सुंदरि मम मम त्वत्तेन संबंधमात्रषष्ठी॥ दर्शनं देहि प्र
यच्छ॥ तदर्थं नूनिसंप्रदानत्वायोग्यत्वेपि मम कृपया पिदर्शनं देही तियोगेऽपि न चतुर्थीति नेयं तथा च सुंदरी
ति संबोधनेन प्रोत्साहयति॥ मन्मथेन कामेनव अरं दुनोमि संतप्तो भवामि॥ ७॥ वणितमित्यादि॥ जयदेवके
न जयदेवेन स्वार्थे कः॥ इदं हरेश्चरित्रं वर्णितं कीदृशेन प्रणतेन॥ अथार्द्धि रिमित्यर्थः प्रणवेनेति पाठे॥

क्षम्यतामपरं कदापि न वेदृशं न करोमि॥ देहि सुंदरि दर्शनं मम मन्मथेन दुनोमि॥ ७॥
वर्णितं जयदेवकेन हरेरिदं प्रणतेन॥ किंदुबिल्वसमुद्रसंभवरोहिणीरमणेन॥ ८॥ ॥

हरिपरायणेनेत्यर्थः पुनः कीदृशेन॥ किंदुबिल्वो जयदेवकुलस्य राज्ञि यामः स एव समुद्रस्तत्
र संभवो यस्य तादृशेन॥ रोहिणी रमणेन चंद्रेण यथा समुद्रोद्भवेन हर्षेण चंद्रेण तत्सोत्र गति॥ क्रियते न त
था तत्कुलस्योन्नतिर्जयदेवेन कृतेति चंद्रसाम्यं॥ किंदुबिल्वनामा जयदेवस्य कुलमेव॥ केचित्तु किंदु
बिल्वनामा कश्चिन्महाभागवतः समुद्रः कश्चित्तु जयदेवस्य पूर्वपुरुष इति कथयंति॥ श्री किंदुरेणा तिल
को हारी रोहिणी तत्वाविति हारावली॥ तथा च पद्मावर्ता उत्कर्षकथनाय रोहिणी रमणेने त्युक्तं॥ अथवा

॥चंद्रोपमा स्वयमेव स्वदेहे न्यस्तेति तस्याच्च यमेवाभिप्रायः॥ यस्य मम हृदये श्री हरिणैव श्रयं गीतगोविंदामृ
तं श्र्पितं॥ तेनैव हेतुना चंद्रोपमा मम जाता॥ चंद्रश्च सर्वतापहारकः शीतलश्च॥ अत एव एतद्रसधारकाश्च
पि चंद्रवत्सर्वश्रीतलकारकाश्च मन्तसुखदृष्टिकाश्च नवंत्येवेति बोत यत्त्रै वस्तु स्फुति कृतान नु च यद्दंकारेणेति
भावः॥ धन्योहं कृतकृत्योन्यायेनैवेति॥ तिंदुविल्वसमुद्रसंभवरोहिणीरमणेनेति पाठे॥ तिंदुविल्वादीनि
फलानि यत्र वृंदावने तद्देवसमुद्भूतं तत्र संभवः सम्यक्प्रकारेणानित्यविहारेण भवति तिष्ठतीति रोहति आ
रोपयति सुरतसमये स्वोपरि सा रोहिणी श्रीराधा तस्याः रमणेन श्रीकृष्णेन चंडेणापरोक्षेणैव श्रीराधां प्रति
वर्णितं कथितं॥ तदेव जयदेवेन कविना मया हरेः श्रीकृष्णात् इदं यथा संकृतः यतः प्रणतेन प्रकर्षेण तेन
॥अनन्यतया नम्रीभूतेनेत्यर्थः॥ आदौ हरिणा वर्णितं वर्णितः वर्णितः अक्षरमक्षरं तया किं करिष्यति इ
त्यादि रीत्या कथितं पश्चान्मया प्रासं इति वाक्यार्थश्च॥ परम चंडेण श्रीकृष्णेन परममृतं श्रीराधानुनय
रूपं वर्णितं संचितं संभृतं इदमेवामृतं जयदेवकवेन किरणेन प्रसारितं॥ सर्वे रसिकाः यथेष्टं पिबन्तु॥
नामेति शेषार्थश्चेत्यर्थः॥ ७॥ ॥ पूर्वसर्गे श्रीकृष्णस्य विरहाजनितावस्था वर्णिता॥ अत्र तु राधाया विरहा ५३
वस्थां श्रीकृष्णं प्रत्याह॥ यमुनेत्यादिना॥ राधिकायाः सखी माधवं कृष्णं प्रत्याह॥ वक्ष्यमाणमुवाच॥ राधि
केत्यनुकंपायां कः॥ कीदृशं प्रेमभरेण राधाविषयिकस्नेहाधिक्येन उद्भ्रांतं उत्कृष्टिं चलनादिक्रियाकर्तु
मशक्तं॥ अत एव तदन्वेषणं विहाय यमुनायास्तीरे च वानीरनिकुंजे तत्र मंदं निरुत्साहं॥ आस्थितमासी

नं॥ अमंदमिति वचनविशेषणं वा॥ अतिशयव्याकुलां राधां दृष्ट्वा अमंदं सवेगमाहेत्यर्थः॥ मंदः खले मंदा
ते मूर्खे स्वैरिणि रोगिणीति विश्वः॥ सप्रेमा भेदरहितं पूर्णाय ह्रिवचं धनमिति रसार्णवसुधाकरे॥ यद्वा॥ श्रीरा
धाये परोक्षे श्रीकृष्णं संनिधौ उभयोर्हितकर्त्री सखी ललितानाम्नी माधवं मा इति मानवती श्रीराधा तस्याः धवं
ध्यानारं श्रीकृष्णमाह॥ प्रकर्षेण उभयोर्हितकरवाक्यं आह उवाच॥ अथवा॥ माता मम स्त्री श्रीराधा तस्या एव
धवं आस्वादकं नान्यायाः इति भावः॥ अथवा लक्ष्म्याः सकललोकनायाः धवं स्वामिनमपि श्रीराधावियोगेन मंदं क्षी
णमौनाम्य मित्यर्थः॥ २०॥ इदानीं काम एव मे दुःखं प्रयच्छतीति तमेवोपालंभनगोचरं करोमीत्यान्नायेनाह॥ हृदी

यमुनातीरवानीरनिकुंजे मंदमास्थितं॥ प्राह प्रेमभरोद्भ्रांतं माधवं राधिकासखी॥ २०॥

त्यादि॥ हे अनंग कंदर्प मयि पुनः प्रहरप्रहारं मा कुरु किमु इति वितर्के॥ मयि हरभ्रांत्या महादेवभ्रमेण क्रुधा
क्रोधात्वं धावसीति किं मुत कथयामि॥ अथवा॥ उइति हे अनंग हरभ्रांत्या मयि किमिति धावसि॥ कीदृशे मयि॥
प्रियारहिते विरहिते॥ हरः सर्वदा प्रियायुक्तोऽहं त्वधुना प्रियारहित इति मयि हरभ्रमो न युक्त इति भावः॥
तथा च प्रियाविरहसंतप्ते मयि प्रहारमपि नोचितमिति ध्वनितं॥ कामः पूर्वं हरेण तच्छरीरं दग्धं गरहितः कृ
त इति॥ हरे कामस्य महद्वैरसूचनाय अनंगपदेन संबोधनं भ्रमबीजं निरस्यति॥ हृदि च यं विशालतामरणाल
लताया हारः स च विरहजन्यसंतापशांत्यर्थं धृतः भुजंगमनायकः सर्पराजो वासुकिः॥ इयं कंठे कुवल

मृदलानांनीलोत्पलपत्राणांश्रेणीपंक्तिःसोत्यायहनानतुसागरलद्युतिर्विषकांतिः॥इदंमलयंगितापन्नान्य
थंधवलंमलयजरजश्चंदनधूलिर्नतुभस्मविभूति॥अंगेजिमःप्रतिश्लिष्टचंदनद्रवोपिविरहतापवशाद्धूली
भूतइतिरजःपदेनसूचितं॥तथाचविरहलतायांगोत्पदीवृत्ताद्धिदृश्नानात्रवरवासुकिभ्रमात्नीलोत्पलंश्री
रूपामत्वादिधमदिरानिःफरलभ्रमाच्चंदनरजसिभस्मभ्रमाच्चमयिमहादेवभ्रमःतवतुनयुक्तमितिभावः॥
अयंतुभ्रांतिमानलंकारः॥सादृश्याद्वस्त्वंतरप्रतीतिर्भ्रांतिमानितितल्लक्षणात्॥बिनर्केकिमूचेत्यमरः
॥उसंबुद्धौरुषौक्रोधेचेतिविश्वः॥यद्वाउइतिश्रीराधायाःसंबोधनंहेउहेश्रीराधेमयिविषयेप्रियाभ्रांत्या

हृदिविसलताहारोनायंभुजंगमनायकःकुवलयदलश्रेणीकंठेनसागरलद्युतिः॥मलयजरजो
नेदंभस्मप्रियारहितेमयिप्रहरनहरभ्रांत्यानंगक्रुधाकिंमुधावसि॥२१॥ ॥ब॥ :छः ॥

हेअनंगहरभ्रान्त्याक्रोधेनक्रुधाकिंधावसिक्रोधेनदूरेकिंकिमर्थंधावसिधावनंपलायनंकिमितिकरोषित्र्य
यदत्रअनंगभ्रांत्याकामकलहेनप्रहरप्रकर्षेणनहरनहरमांमात्यजमात्यजत्वादृशीबाधामामितिशेषः
॥कीदृशेमयिरहितेत्वयेतिशेषःत्वयारहितेविरहितेमयिअन्यप्रियादोषारोपोऽनुचितइतिभावः॥त्व
द्विरहेणसंतापेसतिकृताशीतोपचाराविपरीतानवंतीत्याहहृदिइत्यादीनिति॥हृदिविसलताहारोहृदये
पद्मिनीतंतुसमूहस्यहारलक्षणःशीतोपचारः॥अयंप्रत्यक्षतयादृश्यमानोभुजंगमनायकःसर्पवि

शेषोनअपितुसर्पसदृशएववदात्मकतयासर्पसमानैवेत्यर्थः॥कंठेकुवलयदलश्रेणीगलप्रदेशेअपितदाहकत
याआरोपिताकमलपत्रपंक्तिःसाकिंगरलद्युतिर्विषवन्नीलकांतिर्नअपितुतथैवअतिसंतापकारकत्वादित्य
र्थः॥हृदिस्थसर्पदिव्याविषकांतिःकंठपर्यंतंव्याप्नोतीतिभावः॥अंगेइदंमलयजरजःमलयाचलचंदनंअ
तितापेनतस्मसात्कृतंरजःधूलीसदृशंनेतीतिनअपितुतत्वपिअतिकठिनमेवतत्त्वतोस्त्वबः॥तवविरहेणास
र्वांगीणमपिअंगेनमेवअतःमांमापरिहरइतिवाक्यार्थः॥हृदयेणदग्धस्यकामस्यात्रप्रवेशाभावान्मन्म
थमन्मथइतिवचनविरोधाच्चइदमेवव्याख्यानंसमीचीनमित्यर्थः॥२१॥कुसुमसायकलेनकामःप्रसिद्धः

पाणौमाकुरुचूतसायकममुंमाचापमारोपयक्रीडानिर्जितविश्वमूर्छितजनाघातेनकिंपौरुषं॥तस्याए
वमृगीदृशोमनसिजप्रेंखत्कटाक्षाशुगश्रेणीजर्जरितंमनागपिमनोनाद्यापिसंधुक्षते॥२२॥ ॥छ॥॥

तःइमानेवचूतमंजरीरूपान्बाणान्धनुष्यारोप्यमांताडयतीतिभ्रांत्याकयापुनरपिकामायैवदैन्यंकरोतिपाणा
वित्यादिना॥हेमनसिजमदनअमुंपुरस्थितंचूतसायकमाम्रपुष्परूपंबाणंपाणौहस्तेमाकुरु॥वसंतकाली
नपुष्पोद्गमंदृष्ट्वाहृ॥चापंधनुरपिसायकंप्रत्यंचायुक्तंमाकुरु॥यद्वाचूतसायकंहस्तेमाकुरु॥हस्ते
पिचेत्करोषितदाअमुंसायकंमारोपयमासंधेहीत्यर्थः॥अत्रमनसिजपदेनममनसोजातस्यतेमत्संताप
कारित्वमितिध्वनितंहेक्रीडानिर्जितविश्व॥क्रीडयालीलया॥निर्जितंविश्वंजगत्येनतादृशास्यमूर्छि

गी·गो· तस्य मूर्छितस्य प्रासस्य जनस्य मादृशस्य घ्याघातेन प्रहारेण तव किं पौरुषं॥ अपि तु न किमपीत्यर्थः॥ अथवा मू
५५ र्छितजनाघातेन तव किं पौरुषं कास्ति तत्पौरुषमित्यर्थः॥ मूर्छितत्वे हेतुमाह॥ तस्या एव मृगीदृशो हरिणी
दृशस्तस्या एवेति विरहाधिक्येन राधानामाग्रहणं॥ क्रिः प्रतिपाद्यते॥ प्रेंखंतः प्रपनीये कटाक्षास्त एव आ
शुगा बाणास्तेषां श्रेणिभिः पंक्तिभिर्जर्जरितं खंडखंडीकृतं मनो मनागपि स्वल्पमपि न संधुक्षतेन स्वस्थं न
वति अद्यापि अद्य पर्यंतमपि॥ धुक्षधिक्ष संदीपन क्लेशनजीवनेष्विति धातु अनुसारात् न संधुक्षते न जीवतीत्य
र्थः॥ इति वा॥ तथा च॥ तत्कटाक्षनृपबाणैरहं मूर्छितः संप्रति मयि कृतमं जरी नृपसायकप्रहारो मृतमा
रणमिवाचरतीति लीलयैव येन विश्वमपि जितं तेन तस्य मूर्छितजने च प्रहारो यन्नो हानिकर इति ध्वनितं सा
यकः शरस्तत्कृयोरिति विश्वः॥ अथवा परोक्षेण श्रीराधामेव याचते न तु तुच्छं काममेवेत्याह पाणाविति॥
हे प्रिये मा इति मां प्रियतमं पाणौ विषये कृत्वा हस्तान्मां आलिंगने देहीत्यर्थः॥ मा इति मां लक्ष्मीकृत्य अमुं नू
तनसायकं चक्षुः कटाक्षबाणं तु कुटीलक्षणं चापं धनुः प्रत्यारोपय कटाक्षावलोकनं प्रकटीकुरु कुर्वि
त्यर्थः॥ ननु किमर्थं आलिंगनकटाक्षास्त्वां त्वया सह क्रीडामीत्याह॥ तव क्रीडापूर्वरतादिलक्षणविलासा
दिरूपा तया निर्जितः वशीकृतः अत एव विश्वः विश्वासवान् मूर्छितश्च मोहितश्च एवंविधो मल्लक्षणो जनः ५५
सेवकः तस्य घ्याघातेन कटाक्षादिघातं विना किं पौरुषं को वा पुरुषार्थः ममेत्यर्थः॥ अथवा तव वा कः प्राक्रमः
उनयोरपि अयमेव पुरुषार्थः यत्संयोगेन क्रीडापर एवेति भावः॥ तस्मा एव पूर्वसमागमरूपायाः तव त्याए

वकटाक्षादिभिः॥ स्तुनिर्तं विचित्रं न शिरी न वति अद्यापि त्वनेन निदायां सन्नासः आशुगोमारुते बाणे इति विश्वः
न तु तुच्छेन कामेनमपि विषये माधवः स्यादिति तमेव दर्शयति देहीति प्रार्थनेयमित्यर्थः॥ शेषं समानमेव॥ अथ
वा॥ परोक्षेण श्रीराधामेव याचते न तु तुच्छं कममेवेत्याह पाणाविति॥ हे प्रिये मा इति मां प्रियतमं पाणौ विषये
कृत्वा हस्तान्मां आलिंगे देहीत्यर्थः॥ अमुं मा इति मां लक्ष्मीकृत्य च नूतनसायकं चक्षुः कटाक्षबाणं तु कुटीलक्षणं
चापं धनुषं प्रत्यारोपय कटाक्षावलोकनं प्रकटीकुर्वित्यर्थः॥ ननु किमर्थं आलिंगनकटाक्षास्त्वां त्वया
सह क्रीडामीत्याह॥ तव क्रीडापूर्वरतादिलक्षणविलासादिरूपा तया निर्जितः वशीकृतः अत एव विश्वः
विश्वासवान् मूर्छितश्च मोहितश्च एवंविधो मल्लक्षणो जनः सेवकः तस्य घ्याघातेन कटाक्षादिघातं विना किं
पौरुषं को वा पुरुषार्थः ममेत्यर्थः अथवा तव वा कः प्राक्रमः उनयोरपि अयमेव पुरुषार्थः यत्संयोगेन
क्रीडापर एवेति भावः॥२२॥ ननु तत्कटाक्षादिस्मरणादेव तव दुःखं भवति कामस्य तत्र कोपराध इत्यत्रा
ह भ्रूपल्लवमित्यादि॥ किमित्याक्षेपे॥ तस्याः राधायाः स्मरेण कामेन अस्त्राणि अर्पितानि स्थापितानीति वितर्क
यामि॥ न चास्त्राणि विरहेण हस्तेऽर्पयितुमुचितानीति तत्र स्तनादिनिर्जितेत्यादि॥ निर्जितानि जगंति यै
स्तानि॥ तथा च तैरेवास्त्रैर्जगत्त्रयं जितं तात च स्थापितानीति भावः तर्हि अत्र किमिति स्थापितानीत्यत आह अनं
गेति॥ अनंगस्य कामस्य तया यजंगमदेवतायां मननशीलदेवतायां तथा च तयैव त्रैलोक्यजयायास्त्राणि
दत्तानि अतो जातप्रयोजनानीति तत्रैव स्थापितानीति भावः॥ देवतया यदस्त्रं दीयते तत्केनापि प्रति दातुं न शक्य

वानु इति ध्वनितं॥ अहो देवतायामास्त्वमंगं विनैव यत्प्रसादेन जगज्जितं अत एवानंगस्य जितत्वाद्देवं देवेन्द्रं
कृत्वैवित्थायतामेवाश्रितवानिति ज्ञेयं॥ कानि तान्यास्त्राणि इत्यत आह भ्रूपल्लवमित्यादि॥ भ्रूपल्लवमिव तदे
व धनुः॥ अपांगतरंगितानि कटाक्षस्यागतागतानि बाणाः॥ श्रवणपालिः कर्णलतापर्यंतं गुणः॥ प्रत्यंचा
अत्र नीलस्निग्धत्वात्क्रुवः पल्लवत्वेन रूपणं॥ वक्रत्वेन धनुष्ट्वेन रूपणं च अपांगस्य मर्मभेदकत्वाद्बाणत्वे
न रूपणं॥ कर्णपालेश्च दीर्घत्वात्प्रत्यंचिकात्वेन निरूपिता॥ अपांगः संगहीने स्यान्नेत्रांते तिलकेपि चेति
विश्वः॥ पालिः कर्णलताग्रे ऽस्त्र्योपंक्त्यावंत्राप्रभेदयोरिति च॥२३॥ संप्रति राधांगलेविजृंभितान्येव स्मरवा
५६

भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण॥ तस्यामनंगजयजंगमदेवतायां
मस्त्राणि निर्जितजगंति किमर्पितानि॥२३॥ भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां श्यामात्मा
कुटिलः करोतु कबरीभारोपि मारोद्यमं॥ मोहं तावदयं च तन्वि तनुतां बिंबाधरो रागवान् सद्वृत्तस्तनमंडल
स्तव कथं प्राणैर्मम क्रीडति॥२४॥
एतानि माम् पीडयंतीति तस्या एवोपालंभं करोमी त्यान्नायेन काममुपेक्ष्य
पुरस्थितामिव राधां संबोध्याह भ्रूचाप इति॥ भ्रूचापे भ्रूरूपे धनुषि निहितो पितः कटाक्षविशिखः कटा
म क्षरूपो बाणो मम व्यथां मर्मपीडां निर्मातु करोतु॥ धनुष्यारोपितस्य बाणस्य परमर्मपीडनमेव धर्म इति
॥तदुचितमेव॥ अथच॥ कुटिलो वक्रः श्यामात्मा श्यामः श्यामस्वरूपं यस्य एतादृशः कबरीभारोपि अ

पि तवेणी केशसंचयोपि मारोद्यमं मारायमारणाय उद्यमं पराक्रमं करोतु॥ अथवा॥ मारस्य कामस्य उद्यमं क
रोतु॥ ते तमः मलिनः कुटिलस्वभावतिसो ऽन्यमारणाय यतत इत्यपि नानुचितं॥ अथ च हे तन्वि अयं बिंबफल
तुल्योधरो मोहं मूर्छां तनुतां तनोतु॥ कीदृशो रागवान् रक्ततावि शिष्टः॥ इदमपि नानुचितं यतो यो रागवान्
मात्सर्ययुक्तः स परं मोहं करोत्येवेति॥ अयं तव सद्वृत्तः सद्वर्तुलस्तनमंडलः कुचविस्तारो मम प्राणैः कथं
किमिति क्रीडति प्राणग्रहणरूपां क्रीडां किमिति करोति॥ सद्वृत्तसच्चरितस्य प्राणग्रहित्वमनुचितमिति
भावः॥ विरोधनामायमलंकारः॥ सद्वृत्तरूपगुणस्य पराप्राणग्रहण क्रियाविरोधकथनात्॥ तदुक्तं
काव्यप्रकाशे॥ विरोधः सो विरोधे पि विरुद्धत्वेन यद्वच इति॥ विशिखस्तोमरे शरे इति विश्वः॥ श्यामोनि
दितरूपयोरिति धरणिः॥ कबरी केशपाशः स्यादिति हारावली॥ कबरी केशवेशः इत्यमरः॥ मारो मृत्यो
विषेऽनंगे इति विश्वः॥ बिंबः फले बिंबिकायाः प्रतिबिंबे च मंडले छायामपि रागोनुरक्तो मात्सर्ये रंजने
पि निगद्यत इति विश्वः॥ चरिते वर्तुले वृत्तमिति शाश्वतः॥ आत्मा देहमनोब्रह्मस्वभावधृति बुद्धिष्विति
विश्वः॥२४॥ ननु तस्या अपि नापराधेन वास्मरस्य किंतु तदंगस्पर्शादिविषयालाभाच्च चलत्वेनत्वां दुः
खाकरोतास्ततो ऽनुभूयमानां तां मत्वान्याह तानीत्यादि॥ स्पर्शसुखानि तदंगस्पर्शजन्यादिसुखानि इदा
नीमननुभूयमानानि तान्येव स्वत्वन्तु भूतान्येव॥ एतेन त्वगिंद्रियविषयजानंः कथितः॥ दृशो नेत्रयोः लरसा
ः चंचलाः स्निग्धाः स्नेहगर्भा विभ्रमाविलासास्त एव स्वत्वन्तु भूता एव॥ अनेन प्राणस्य विषयप्राप्तिरुक्ता॥ गि

रां तद्वचसां सुधामृतं सेवृत्ते भवतीत्येवं गिरां वक्रिमा वक्रत्वमिदानीं श्रोत्रेणास्वाद्यमानः स एव प्रवर्त्तितुं भूत
एव॥ अनेन श्रोत्रेंद्रियविषयसान्निध्यमुक्तं॥ विंबाधरमाधुरी तस्याविंबफलप्रायस्याधरस्य यामाधुरी मधुर
ताऽधुनाम यास्वाद्यमानासैव प्रवृत्तिर्भूतैव॥ अनेन रसनेंद्रियस्य विषयजातः कथितः॥ इत्येवं प्रकारेण विष
यासंगेपि तत्तदिंद्रियाणां स्वस्वविषयासक्तावपि मानसं मन्मथस्य तस्यां राधायां लग्नसमाधि तदेकाग्रं चेत्
यदि हंत इति खेदे तदा विरहव्याधिस्तद्विश्लेषजन्यो व्याधिः कथं वर्द्धते॥ अपिशब्दो विरोधाभासालंकारस्य सूचना
र्थः॥ बाह्येंद्रियविषयासंगे समाधेरसंभवात्॥ बाह्येंद्रियवृत्तिनिरोधे सति मनस एकाग्रता या एव समाधिप
दार्थत्वात्॥ तथा च तत्तदिंद्रियाणां स्वस्वानिमित्तविषयालाभे एव विरहः संभवति॥ मम तत्तदिंद्रियाणां वि
षयविच्छेदस्याभावान्मनसश्च तच्चिंतनैकपरत्वात्तया सह विश्लेष एव नास्तीति कथं विरहजन्यव्याधिसं
भव इति भावः॥ समाधौ व्याधेरुद्भव इति ध्वनिः॥ च एवार्थः॥ गंधरूपरसस्पर्शशब्दा विषया इत्यमीत्य
मरः॥ तस्मात्कोप्यद्भुतो दुर्विनिकस्तित्वेमा विनविवोवर्त्तत इति सिद्धांतः॥ २५॥ इदानीं सर्गांते आशिषमा
ह शास्त्रेतिर्यगिति॥ मधुसूदनस्य कृष्णस्य कटाक्षोर्मयो नेत्रांतदर्शनितरंगा वो युष्माकं क्षेमं ददतु कल्या ५८
णं प्रयच्छंतु॥ दुरितासद्भावेन क्षेमदातृत्वं संभवतीति॥ दुरितदारणसामर्थ्यद्योतनाय मधुसूदनपदोपा
दानं॥ अतिचापल्यसूचनायेति वा॥ किंलक्षणाः॥ मधुरे स्वभावतः पि मधुरिमाश्रये राधायामुखमिंदुमि
व तस्मिन्मृदुस्पंदं ईषच्चलनं संमुग्धमव्यक्तं च सुंदरं वा यथा स्यात्तथा कंदलिताः संपल्लविताः॥ तथान्ये

दुरत्वाभिनवतरंगा अतीव पल्लविता भवंतीति करांकुराणां तरंगसाम्यं॥ कचिच्च प्रेमाणाः कंदलिताः॥ सुमुग्धमधुरेरा
धाननेंदौ सुधासारे वा मधुसूदनस्य ददतु क्षेमं कटाक्षोर्मय इति पाठः तदा किं विशिष्टे मुखेंदौ सुष्ठुमुग्धं च तन्म
धुरं च तत्तस्मिन्॥ रम्येन वप्रिये चेत्यमरः॥ मधुरस्तु प्रियेस्वादाविति॥ पुनः किंभूते॥ सुधासारे॥ सुधायाः सारे
॥ नत्वत्यासु पत्रूपं नीषुकर्थं राधामुखएव पल्लविता ऊर्मयश्च तथाहुः॥ वंशे उच्चरंती गीतिस्थाने सुगानपदेषु

॥ तानि स्पृशामि सुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमास्तद्वक्त्रांबुजसौरभं स च सुधास्यंदी गिरां वक्रिमा
॥ स विंबाधरमाधुरीति विषयासंगेपि चेन्मानसं तस्यां लग्नसमाधि हंत विरहव्याधिः कथं वर्द्धते॥ २५
॥ तिर्यक्कंठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्गीतिस्थानकृतावधानललनालक्षैर्न संलक्षिताः
॥ संमुग्धे मधुसूदनस्य मधुरे राधामुखेंदौ मृदुस्पंदं कंदलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः॥ २६॥
॥ इति श्रीगीतगोविंदे मुग्धमधुसूदनो नाम तृतीयः सर्गः॥ ३॥ ॥ यमुनातीरवानीरनिकुंजे मंदमा
स्थितं॥ प्राह प्रेमभरोद्भ्रांतं माधवं राधिकासखी॥ २७॥

स्वरग्रामादिषु कृतावधानैः समर्पितचित्तैरि
भिर्ललनालक्षैः कामिनीकदंबैर्न संलक्षिता नावलोकिताः॥ तथा च सकललनाकदंबो वंशध्वनिमोहितो न
किंचिद्रूपरूपादितत्त्वेव पल्लविता इति भावः॥ वंशा हरणेस्वभावमनुवर्णयति॥ किंभूतस्य॥ तिर्यक्कंव
क्रः कंठो यस्य विलोलश्चंचलो मौलिः किरीटो यस्य तरलश्चंचल उत्तंसः कर्णाभरणं यस्य सः॥ तिर्यक्कं

गी॰टी॰ रश्मामौ विलोलमौलिश्यामोतरलोत्तंसश्चेति कर्मधारयस्तथाविधमेत्यर्थः॥ [illegible]तिगीर्णं॥ ललनातु नितंबव
५८ तीत्यमरः॥ उत्तंसः शृणाषुरेपि सुंदरे नायकेपि चेति धरणिः॥ कुंदर्वं तु नवांकुरे कलधौतोपरागे चेति॥ ऊर्मि
: पीडालवोत्कंगानंगप्रकाशावीचिषु वस्त्रसंकोचलेखायामिति॥ २४॥ ॥ इतिश्रीगीतगोविंदे मुग्धमधुसू
दनोनाम तृतीयः सर्गः॥ ३॥ ॥ श्रीराधायाविरहेण मुग्धोनाना संभ्रमयुक्तो मधुसूदनः॥ श्रीराधायाः अधरा
मृतकामुकः श्रीकृष्णोयत्र एतादृशास्तृतीयः सर्गः विरहलीलाविस्तारकः परिछेद इत्यर्थः॥ श्रीराधायां मोहि
तत्वात्सुंदर इति मुग्धपदोपादानमितिवा॥ नदेवगीतेन दर्शयिति॥ निंदतीत्यादि॥ गीतस्यास्य कर्णाटराग

निंदति चंदनमिंदुकिरणमनुविंदति खेदमधीरं॥ व्यालनिलयमिलनेन गरलमिव कलयति मलय
समीरं॥ १॥ सा विरहे तव दीना॥ माधव मनसिजविशिखभयादिव भावनया त्वयि लीना॥ ध्रुवपदं॥

स्लक्षणं॥ रूपाणां पाणिर्गजदंतपत्रमेकं वहन्नूदक्षिणकर्णपूरे॥ संस्तूयमानः सुरचारणौघैः कार्णाट ५८
रागः शिशिरकं गनाल इति एकतालीताश्च तल्लक्षणं प्राक्तनं विरहोत्कंठिता नायिकान्वयं॥ नैवागतः स
मुचितेपि वासरे पुप्राणेश्वरः स्वगुरुकार्यवितानयस्याः॥ दुर्वरिष्टतद्विरहज्वरतापितांगी उत्कंठितां व
दंतितां नरतः कवीन्द्र इति॥ गीतार्थस्तु हे माधव सा राधा तव विरहे दीना दुःखिता तथा च॥ सा दुःखिता मा
वालु सस्त्रीक एवेति न तदुःखं जानातीति माधवपदेन कटाक्षितं अथवा हे माधव सकलत्रो नास्वामि नूए

तानदृशामसमर्थवानत्वं तव विरहे सापि दीना॥ त्वमपि तस्याः विरहे तद्दीन तयादी इत्यप्यनुचितमितिभावः॥ यद्वा
हे माधव मासवेतिमा श्रीराधा तस्या एव धवस्वामिनूसवेत्रिमेत्वं पिस्वामिनि सति सा दीनेति नोचितमिति उपा
लंभसंबोधनमित्यर्थः हा कष्टं यदि दुःखिता तर्हि सा कथं वरीवृत्तिरिति दाह॥ त्वयि लीना मग्ना॥ कस्मादिव॥
मनसिजस्य कामस्य ये विशिखा बाणास्तद्भयादिव न तो मनो जो नात इति त्वयि लीने सति तस्माद्भयं न भव
तीति मनसिजेति ध्वनितं॥ ननु मयि कथं लीनेत्यत आह॥ भावनयेति॥ भावनया सर्वविषयनिंदाद्व्यक्ति
त्स्मरणेनेत्यर्थः॥ ध्रुवपदं॥ विषयनिंदामाह॥ चंदनं मलयजं निंदति॥ विरहिणामुपतापकं यथा चेत्सा
धारानिधां विनतीति निंदां करोति॥ किंच इंदुकिरणं सुधांशु किरणं चानुलक्षीकृत्य खेदं कष्टं विंदति
प्राप्नोति॥ तत्रापि च अधीरं चंचलं॥ धीरस्तु कुंकुमे स्वल्पे बुधे धैर्यवति त्रिषु इति विश्वः॥ अधीरं धैर्यर
हितं यथास्यात्तथा निंदतीति वा॥ अधिकं ईरयति कामं प्रेरयतीति चंदनविशेषणं वा॥ अपिच॥ म
लयसमीरं मलयपर्वतसंबंधि वातं व्यालनिलयमिलनेन व्यालानां सर्पाणां निलयो निवासश्चंदनवृक्ष
स्तस्य संसर्गेण गरलमिव विषमिव कलयति मन्यते॥ चंदनवृक्षस्थितसर्पैः पीतो जीर्णस्तु मलयवाय
वः तरव समीरयति स्थानात्स्थानांतरं वस्तीति॥ समीरो वृक्षचालकस्वभावात्॥ विषमयाः कथमन्य
था शरीरसंपर्कादेवमूर्छां जनयंतीति गरलमिव मन्यत इति भावः तथा दुःखितस्य विरहिणो हि सुखहे
तवोपि दुःखायैव भवंतीति ध्वनितं विरहोत्कंठेन स्मरणात्पादत्वं च प्राप्नोति॥ तदुक्तं श्रृंगारतिलके॥॥

दोषोयच्चान्यकार्येषुतदेकार्थंचमानसं· श्वासैर्मनोरथैश्चापिचेष्टानतस्मरणंयथेतिइंदुनिंदतिपद्मकंदलद
लीनत्वंनवामन्यतिकर्पूरं।किंरतिप्रयातिनरतिप्रायेणराधाप्रहेष्यासैः केवलमेवखिद्यतितत्रुज्ञाताप्यसौ
बालिकानन्तकोपिपुवासखिस्मरसरवश्चेतस्यमुग्धाःस्थितःआलोजुजंगमेकुरेष्वापदेदुष्टंदतिनीतिवि
श्वः॥ गरलंतुविषमीनेगरलंतृणहलकेइत्यपि॥२॥ अविरलेतिसास्वहृदयमर्मणिहृदयरूपमर्मस्था
नेसजलनलिनीदलजालेनदलसहितपद्मिनीपत्रसमूहेनवर्मकवचंकरोतिकीदृशं॥ विशालंकिमर्थ
मिवअरलंयथास्यादेवंनिपतितोयोयौमदनशरःकामवाणस्तस्माद्भवदवनायेवनवतोरक्षयेवतस्याद

अविरलनिपतितमदनशरादिवभवदवनायविशालं॥ स्वहृदयमर्मणिवर्मकरोतिसजलन
लिनीदलजालं॥२॥ कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं॥ व्रतमिवतवप
रिरंभसुखायकरोतिकुसुमशयनीयं॥३॥ दयेत्वंसर्वदातिष्ठसि॥ अतोअविरलनिपतद्भिर्मदन
शरैरत्नेपीडामाभूदितिकमलिनीपत्रैः सन्नाहमिवकरोतीतिभावः केचित्तुकीदृशंवर्मअविरलनि
पतितमदनशराद्भवनायरक्षणायभवदिवसंपद्यमानमिवेतिव्याकुर्वंतितच्चवर्नरक्षणेप्रतीतावि
तिविश्वप्रकाशः यथासहस्थलंममेत्यपिविशालंविस्तीर्णमपिभवदवनायेतिप्रथमव्याख्यानेस
खानेसख्याः स्नेहाधिक्यंसूचितंतेनहृतीकर्मकिंचालत्वमपिकथितं॥२॥ कुसुमेति॥ साकुसुमश

यनीयंपुष्पशय्यांकरोतिरचयति॥ कीदृशं॥ अनल्पविलासकलायांवकुतरक्रीडयाकमनीयंकांक्षणी
यंएवंभूतावस्थामपित्वदागमनाशयानुरागातिशयेनकुसुमशय्यामारचय्यतन्मार्गदत्तदृष्टिरेवतिष्ठतीति
भावः॥ किमिवकुसुमविशिखःकामस्तस्ययेशराःकुसुमस्वरूपास्तेषांतल्पंशय्यायत्रतादृशं व्रतमिवकि
मर्थंतवपरिरंभसुखायालिंगनसुखप्राप्तयेतल्पंचशयनीयेस्यात्तल्पंमदकलत्रयोरितिविश्वः एभिःस्त्रि
भिः पदैरुत्कंठाख्यापंचमावस्थाकथिता सुखस्पर्शपुष्पमपिवाणतुल्यंभवतीतिध्वनितं अथवासानल्पविला
सकमनीयंकुसुमशयनीयंतवपरिरंभसुखायकुसुमविशिखशरतल्पव्रतमिवकरोतीत्यर्थः॥३॥ ॥वद

॥ वहतिविगलितविलोचनजलधरमाननकमलमुदारं॥ विधुमिवविकटविधुंतुददंतदलनगलितामृतधारं॥
॥४॥
तिचेति॥ साउदारंसुंदरंआननकमलंमुखपद्मंवहतिधारयति॥ प्रेमामृतादृताल्त्वेनोदारमितिवा
कीदृशंविगलितत्वन्मार्गप्रेक्षणाययतिप्रसारितेविलोचनेनेत्रेएवजलधरौरसवर्षिणौमेघौयत्रतादृशं
अत्रनिरंतराश्रुवर्षित्वेननेत्रयोर्जलधरत्वेनरूपणंकमिवचंद्रमिवकीदृशंविकटाःकरालाविशालावाये
विधुंतुदस्यराहोर्दंतास्तेर्यद्दलनंपीडनंतस्मात्गलिताप्रच्युतामृतस्यधारायतस्तादृशंअत्रमुखस्यविधुनोने
त्रजलस्यचामृतधारयासादृश्यात्भावाथोयिमावोध्यानथाचानेनवैवर्ण्यमपिध्वनितं॥ विकटःसुंदरेप्रोक्तो
विशालविकरालयोरितिविश्वः॥ नमस्कराकुःस्वर्भानुःसिंहिकेयोविधुंतुदइत्यमरः॥४॥ ॥४॥ ॥

गी॰टी॰ विलिखतीति॥ किंच हे रसिक कांते कुरंगमदेन कस्तूर्या नवं त्वां विलिखति कीदृशं॥ असममारभूतं कामरूपि
६० णं ते॥ अधः आसनस्थाने मकरं विनिधाय धृत्वा नवकरेन च धृतं नूतनाम्रमंजरीरूपं शरं येन॥ एवं च निधाय प्रणमति
नमस्करोति॥ मकरवाहनस्त्वमेव मां किमिति संतापयसीति प्रणम्य प्रेष्ठं त्वां याचत इति भावः॥ तथा च वाह
नारूढः प्रियतमः श्रीकृष्णो ग्रामागमिष्यतीति वाहनलिखनमिति ध्वनितं॥ विरहिणी व्यापारश्च कथितः॥ तदा
हुनरत्नः॥ देवताकृजनं कुर्यादृद्याद्दलिभुजे बलिं॥ लिखेत्कांतप्रतिकृतिं पाठयेच्छुकसारिकां॥ गणयेद्वा वधिदि
नं गीतं गायेत्तदंगकं॥ एवं वियोगे ननयेत्कालं वियोगिनीति॥ मृगनाभिर्मृगमदः कस्तूरी गंधवरी खर इति हा

विलिखति हे रसिक कुरंगमदेन नवं तमसममनारभूतं॥ प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं॥५॥

राव ली॥ यद्यपि वियोगिन्याः कामस्मूर्तिर्लिखनं न घटते तथाप्यत्र श्रीकृष्णस्य कंदर्पस्वरूपत्वात्तदाक्रांतचित्तत्वे
न तद्रूपेण लिखनं॥५॥ प्रतिपदमिति॥ प्रतिपदं इतस्ततश्चलंतिपदं पदं प्रतिवचनं वचनं प्रतीतिवा इति निग
दति जल्पति हे माधव तव चरणे पतिताहं त्वां नमामीत्यर्थः त्वयि विमुखे विशिष्टे सति सुधानिधिरपि अमृतनि ६०
धिश्चंद्रोपि तनुदाहं शरीरसंतापं तनुते विस्तारयति॥ अतनुदाहं स्मरतापं वा॥ अनु तनु यथा स्यात्तथा वा॥ तनु
कुलक्ष्पिवा॥ त्वमायाः लक्ष्म्याः धवः स्वामी चंद्रश्च समुद्रोत्पन्नत्वाल्लक्ष्म्याः सहोदर इति त्वयि निकटे स्थिते सति
लक्ष्मीः सपत्नी अपि मे किमिति कष्टं न करोति॥ त्वयि प्रतिकूले च सति स्वभगिनीसापत्न्यमपि स्मरन् सुधा

निधिरपि मे तनुदाहं तनुत इति माधवपदेन ध्वनितं॥ सुधानिधेस्तापकारित्वं विरुद्धमिति विरोधनामायमलं
कारः॥ अथवा॥ हे माधव मायायाः कंचनरूपायाः स्वामिन् कपटरूपवंचनरूप तव चरणे पतिता॥ इमिति त्वा वं
चेति प्रतिपदं वारंवारं इत्येव निगदति॥ निंदया स्तवनप्रणामादिकं करोतीत्यर्थः॥ हा॥ ध्यानेत्यादि॥ अतिश
येन दुःखेन प्राप्यं अतीवदुरापं नवं त्वां ध्यानलयेन एकाग्रतया पुरः परिकल्प्याग्रे लिखित्वा॥ अथवा॥ अतीव
दुरापं नवं तं दोस्त्यादिना अतिदुर्लभं त्वां ध्यानलयेन ध्यानं चिंतनं तन्नयो लयस्तत्परत्वं तेन पुरोग्रे परिकल्प्य
साक्षात्कृत्वा॥ प्रथमपक्षे तु विलिखनं रहस्यात्युक्तं त्वात्र कल्पना॥ सा विलपति विलापो दुःखजं वचः॥ शठह

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं॥ त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनु
दाहं॥ हा॥ ध्यानलयेन पुरः परिकल्प्य भवंतमतीव दुरापं॥ विलपति हसति विषीदति रोदिति चंचति मुंचति ता
पं॥७॥

येत्कालं परर्थे विजंभितो मित्रैव गच्छेत्साकस्मात् हसति उपहसति॥ विषीदति पुरः [illegible] नो पिच
रणौ गृहीत्वानानुनयती सेवं विषादं प्राप्नोति॥ पुनः कथमयं वशः स्यादिति रोदिति॥ तदुक्तं॥ रुदितमु
दितमसूयो॥ पितां वियहैं षिति॥ चंचति चाटूक्तिभिः खसुस्तं दृष्ट्वा गच्छति पश्चादनुनीयालिंगिता तापं मुंचति
खविश्लेषाद्दुःखं त्यजति॥ यद्वा॥ रोदिति पश्चादनुनयं तं प्रणायरोषान्मुंचति निरस्करोति॥ अत एव तापं चं
चति तापं प्राप्नोतीत्यर्थः॥ अलंकारोत्र दीपकः॥ वहनीयारम्य उन्मादावस्था कथिता॥ तदुक्तं॥ श्वासप्ररोद

नोत्कंपवसुधाश्लेषणैरपि। व्यापारो जायते यत्र स उन्मादः स्मृतो यथेति॥ किलकिंचिताख्यश्चायं हावः॥ तदु
क्तं दशरूपके॥ क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिंचितमिति॥ अलंकारलक्षणं काव्यप्रकाशे॥ सैव क्रि
यासु बह्वीषु कारकस्येति दीपकं अस्यार्थः॥ बह्वीषु क्रियासु कारकस्य सैव सकृद्वृत्तिरेव दीपकमिति॥७॥ ॥
श्रीजयदेवेति॥ श्रीजयदेवभणितं यदिमं नसानटनीयं अजिने तव्यं भावनया स्वादनीयमित्यर्थः॥ तदाह इदं वः
कामलददातीति इदं त्वं कष्टेनादत्नानि जापमदमित्यर्थः अत एवाधिकं सुखमधिकृत्य वर्त्तमानं॥ अधि कंस
वैरिणोत्त्रेमः इदमेव अधिकं श्रेष्ठं सर्वफलरूपश्च श्रीकृष्णराधिकाउनयोः संधिकरा सखी च तत्प्रतिपादकत्वान्नु

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं॥ हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयं॥ ॥८॥

इदमेव श्रोतव्यं चेतिवा अस्यार्थः हरिविरहेण आकुलायावल्लवयुवतिस्तस्यायासखी दूती स्तेन प्रेषिता तत
स्याः वचनं पठनीयं नित्यपाठतया अध्येतव्यमिति॥ उपलक्षणं श्रवणकीर्त्तनयोरित्यर्थः॥ ण॥ सा त्वां विनाकु
आपिनिर्वृतिं न लभत इत्याह॥ आवास इति॥ त्वद्विरहेण सा हरिणीरूपायते मृगीरूपमिवाचरती॥ त्वद्विश्ले
षव्याधिजनित पांडुवर्णा हरिणीरूपेणोपमीयते॥ तथा च॥ यथा मृगवधूर्वने समंतात् मदीसदावाग्निज्वालोद्वि
ग्नाभ्रमणश्रान्ता सिता सैव्याधजालं विततं वितनं पद्मपत्रं तीदन्नादिनाश्चकितचकिता विपिनायते अरण्यमिवाच
र्वथैवमयासंकेतस्थलमागंतव्यमिति। अदृष्टखेदेतरापि वनसंकेतनिकुंजनययोन प्राप्तवमत्र तोमंमेदयो
वनंनवीनाद्भुततारुण्यममलरूपमपि निर्मलं सौन्दर्यमपि विफलं अकृतार्थमित्यर्थः॥ यौवनलक्षणान्नितंबो
विपुलंमध्यं कृशमंगं वरप्रकृतिः। पीनौकुचावूरु गुरुरंभाभं पूर्णयौवनोतन्माधुर्यं नवित्रस्तकान्तेनप्रतियुवति
रासीन्मुखरुचादधारस्तेमित्यप्रणयवृन्दावनं स्थितवनकाव्रजेतिप्याकाभृन्नदितवकलायामिति दूरेनिकुं
जस्यारान्ध्येत्वमस्तिकपदमद्दिष्टोनिभूषणाभूषणाभ्यांहिचमत्कारेणनेत्रयोःपरस्परस्फूर्तिनुदममलंतमकी
र्तितमिति॥ अथवाऽदेतिऽ इष्टानांवृंदावनस्थानां ब्रह्मादिसृष्टिव्यतिरिक्तानांब्रह्मादिदेवत्वमेवनघटते॥ अ
तःकंब्रह्मादिशरणं यामित्र अपि तुनयामीत्यर्थः॥ अथवाकंयमुनाजलं तस्याप्तिसाधनमस्ति अतस्तं यामि इति
वितर्कयतिवाकंवृन्दावनस्थमयूरयूथं तच्छिरभूषणत्वात्तस्याप्तिसाधनमस्तीति मन्वा तंशरणं यामिगच्छामिमयूरयूथ
नृत्यदर्शनादिना तत्स्मरणमेवस्यादितिभावः। शेषसमानमेव। अथवाऽहमस्मिन्विरहेसतिकंसर्वसुखरूपश्रीकृष्ण
मेवयामिगच्छामि नान्यमित्यर्थः। अथवाऽहंसमीपेतरीयंवनमस्तिकंश्रीकृष्णमस्येवयामिकिमितिविरुद्धसद्वामीत्यर्थ
ःकमितिनामैकदेशेन संपूर्णनामग्रहणं। अत्रव्रजेऽहमेवसिद्धान्तं श्रीराधायास्तु सुतरामितिवाक्यार्थः॥१॥ ॥अपिच॥
यदिति॥ यद्यस्य कृष्णस्यानुगमनाय अनुसरणायनिशिरात्रौगहनमपिवनमयिताऽलितं अनुभूतं अथवागहनमपि ८१
यत्कथमपिनयत्क्रियतेतदपिकृतं तेनकृष्णेननिमित्तभूतेनममहृदयं असमशरेणविषमबाणेनप्रणयकोटिस्प
नकीलितं विद्धं असमशरेणकामेनवा। अथवा॥ अस्यकृत्यंममापिकृत्यंसृणुवितिष्ठसखीमसुभयोर्दोषनिर्दे

षंचाह॥ यदनुमिति॥ ममकृत्यं माधुस्तस्यकृत्यंतु असाधुस्तदृष्टमितिशेषः। यदनुगमनाय यस्यधूर्तशिरोमणेः
अनुगमनाय अनुअनुगमनाय अशीलितं सहजमेवेत्यर्थः। तत्रापिनिशिरात्रामेवनत्वापिगहनमपिवनंगंभीरं
वनंरात्रौ अशीलितं सेवितं इदं तुममसाधुकृत्यमित्यर्थः। तेनतुनिर्दयेनतुममसाध्याः हृदयं चाभ्यंतरमपिइदंवास
मिवमत्यक्षमिवअक्षमशरकीलितं कामबाणेनविद्धं तस्यकृत्यं तु महान् निर्दयमेवेत्यर्थः। यद्वायस्य अनुगमना
यपश्चात्गमनाय निशिरात्रौगहनमपिमूर्छामपि अशीलितं महागहनरूपां मूर्छामेव अशीलितं प्राप्ति तत्कृतं यतः
हृदयं अभ्यंतरं चेष्टामपि असमशरो असमबाणेन कीलितं शंकुमिवकृतं स्तब्धतामिवप्राप्तमित्यर्थः। एवंवाद्या
भ्यंतरेऽदंएवंकृतमितितस्यमहानिर्दयतामतुसाधुतापत्रपतीतिवाक्यार्थश्च॥२॥ ॥ममेति। एवंवंचितायाम
ममरणमेववरंयोऽहंनतुदेहधारणंकिंलक्षणमाह। अतिवितथकेतना। अतिशयेनवितथं मिथ्याभूतं केतनं संगरीरस्या
यदनुगमनायनिशिराहुनमपिअशीलितं॥ तेनममहृदयमिदमसमशरकीलितं॥२॥ ममममरणमेववरमतिवि
तथकेतना॥ किमिहविषहामिविरहानलमचेनना॥ नू॥ ॥स्तारुद्रा॥ अकृतकार्यत्वात्॥ अथवा॥ अतिक्रां
तवितथमितिवितथंसत्यंकेतनंधांछनंधिषणितिमानवती प्रेष्ठप्रेक्षयापिजीवतीतियस्यास्तादृशी॥ अथवा॥ अति
वितथं अतिशयेननिरर्थकंजातंकेतनंवकुप्रमाणाद्विरकालमनोरथरूपंनेनिमितत्राप्यादिभिर्निकुंजस्थंपरदृयस्या
स्तादृशी॥ अथवा॥ एवंविधायाअपिकृष्णेचेतनायुद्धिर्यस्यास्तादृशी॥ ॥विरहानलविलास्त्राग्निंकिमितिविषहा
मिसहामितस्मात्सर्वनिश्चितमेववरंमनागिष्ट। यदिदेहांतरेपितस्यप्राप्तिःस्यात्तन्यात्यं प्रेष्ठोवरःप्रोक्तोमनागिष्ट
मनंवरमितिधरणिः॥ वितथंतल्लतवचऽस्समरः। केतनंलांछनेकायेगेहेचोपमंत्रणेऽइतिविश्वः॥३॥

गी॰टी॰

८२

मामित्याह॥ अहहेति खेदे इयं मधुरा सरसा मधुयामिनी वसंतरात्रिर्मां परमसुखरूपापि विधुरयति॥ अथवा मधुरा मिष्टा आ
म्रादिफलानां पुष्पजातीनां च प्रकाशप्रदरक्षकलैर्वल्लिपुष्पैः मधुर्वसंतसंयोगयति। रात्रिर्मां श्रीकृष्णात् विधुरयति वियोज
यति अत एव मम तु यामिनी यमरूपा अत एव मम तु यामिनी यमरूपा अन्तस्तत्तुल्या व्रातकस्वभावा निर्दयेति श्लेषार्थः॥ का
पि कृतसुकृतं यया तादृशी कामिनी सफलकामा यो वा हरिं तस्याः पीडां हरतीति तथाभूतं अनुभवति आलिंगनादिनेति शे
षः। विधुरं विकले विश्लेषे भ्रूषरूते इति विश्वः। मधुरं सरसे तन्त्रये स्वादुन्यपि मनोहरे इति धरणिः॥४॥ अहहेत्यादि। अहहेत्य
द्भुतो वलयादि मणिभूषणं कर्कोटादिविविधनाग्नोत्यादि गुणयुक्त रत्नखचितमलंकारं रत्नवनं वा हरिविरहदहनवहनेन हे
तुना विरहाग्निधारणेन बहुदूषणं अनेकरोगयुक्तं कलयामि पश्यामि। तदंगदतापेन तादृशानामपि तापकत्वमिति भावः॥
मामहह विधुरयति मधुरमधुयामिनी॥ कापि हरिमनुभवति कृतसुकृतकामिनी॥४॥ अहहकलयामि वल
यादि मणिभूषणं॥ हरिविरहदहनवहनेन बहुदूषणं॥५॥ ॥कुसुमसुकुमारतनुमतनुशरलीलया॥ स्रग
कुसुमेत्यादि। स्रगपि पुष्पमालापि अतनुशरलीलया काम पि हृदि हन्ति मामपि विषमशरलीलया॥६॥ ॥राधेगो
वाणविलसेन मां हृदि मनसि हन्ति ताडयति। कामवाणाः पुष्पाण्येव स्रगपि पुष्पमयी अतस्तल्लीलयेत्युक्तं॥
कीदृश्या लीलया अतिविषमशरलीलया। अतिवाधेन विषमं शीलं स्वभावो यस्यास्तया तदुक्तं। अशर्वैयधनुर्वि
द्यामभ्यस्य महात्मनः। शरीरमक्षतं कृत्वा भिन्नन्त्यंतर्गतं मनः इति वाणस्ता वदन्यक्रिष्णो ऽन्यहन्ति अयं तु ये
न द्युतस्तमेव विध्यति तिविषमत्वं वा॥ अथवा॥ अतनुशरलीलया स्थूलचापचेष्टया अतनुः शरीररहितः प्रवि
शन्नपि परं तु न दृश्यते अतो दुर्निवार इति वा॥ कीदृशीं मां कुसुमसुकुमारतनुं कुसुमादपि सुकुमारा तनुर्यस्यास्तादृशीं
॥सजाती यस्य हननमपि विषमत्वमेव प्रतिपादितं पीडासहनासामर्थ्यं च ध्वनितं सुकुमारतनुपितिवा॥ किंभूतास्रगु

॥५॥

१६

किंच अहमिति॥ अहं दुःखिता पितरेक निशाइह निकुंजे निवसामि तिष्ठामि॥ कीदृशी॥ भगणितानसंभाविता
च नवेप्रलतायया तादृशी॥ अनेन दुर्लभत्वमप्युक्तं धितमित्युक्तं। अथवा अतिरस्खालनेन गणितास्तमन्वेषयंत्या
परिसंख्याता वनचेतस हृत्साप यासा गणितवनचेतसा अहं इह॥ न निवसामि॥ अपि तु निवसाम्येवेत्यर्थः। मधुसूदनः
श्रीकृष्णो मां चेतसा स्मरयत्यपि न मधुसूदनपदेन कठिनत्वं चापल्यमपि सूचितं। मधुवसंतं मधुरसं वा नाशयती
ति वा मधुसूदनः स्वाधीनचेतोमात्रसाध्ययत्नस्मरणमपि न करोति तच्च भिन्नं गौनं मनकुनोतिरंतरा मम तु अन्तिमिति
चेतसेसनेनध्वनितमन्यथा स्मरणस्य चेतो जन्यत्वेन चेतसे सत्य वैयर्थ्यापत्तेः॥७॥ हरिचरणेति। हरिचरणयोः शर
णं यस्य तादृशो यो जयदेवकविस्तस्य भारती वाणी हृदि हृदये वसतु अर्थात् कृष्णभक्तानां हरिचरणशरणेत्यने
अहमिह निवसामि नगणितवनवेतसा॥ स्मरति मधुसूदनो मामपि न चेतसा॥७॥ हरिचरणशरणजयदे
वकविभारती॥ वसतु हृदि युवतिरिव कोमलकलावती॥८॥ १३॥ ॥नवाण्या अलौकिकत्वमुक्तं॥ की
दृशी कोमला अकठिनवर्णा कोमलत्वं मुखोच्चारः स्पष्टार्थपरिभूषित इति। कलावती कवित्वकलायुक्ता। केव
युवतिरिव। कीदृशी कोमला मृदुंगी कलावती चतुःषष्टिकलाकुशला॥ अथवा॥ हे कोमल सरसश्रोतः हे हरिच
रणशरणेति वा कलावती। कलोऽतिक्रान्ता ईर्लक्ष्मीः नष्टादिसंपत्तिर्यया सा यां भारती गायतां स्तु एव तं मोक्षा
दिसंपादनेन भवतीत्यर्थः। युवतीरपि कलो प्रणयकलहे मानादिभंग्या हि क्रान्ता लक्ष्मीर्यया स॥ अथवा॥
कलो प्रेमाननता अधिका लक्ष्मीः शोभा सौभाग्यसंपत्तिर्यस्याः सा तथा॥ अथवा॥ हे कोमल भक्तवात्सल्ये
न परममृदुल श्रीकृष्ण भवद्भक्तस्य भारती श्रीराधाचरितवर्णनरूपा वाणी। यथा युवतिः पूर्वोक्ता वक्तृभाश्रीरा
धे च नवमनसि वसतेतथैवेयमपि वसत्वित्यर्थः॥८॥ ॥१३॥ गोपीजनवल्लभाय नमः॥ सहायेति॥

गी॰टी॰ तदेवमनयाष्टपद्या विप्रलब्धायाश्चेष्टितमनुवर्ण्येदानीं तस्याः कृष्णविषयप्रेमदर्शनाय तदनंतरमप्युत्कंठितां व
र्णयति तत्किमिति ॥ कांतः कमनीयवल्लभः श्रीहरिः संकेतीकृतो यो मंजुर्मनोहरो यो वंजुललताकुंजो वेतसलतागृहं
तत्रापि यद्यतो हेतोर्नागतस्तत्कामपि कामिनीं कामातुरां किं ध्रुवमभिसृतः संमुखं गतः । कामिनीपदेन स्वसौभाग्याधि
६३ क्यं कटाक्षयति सः स्वभावतस्तु मामेवानुसरति तत्र यावत्किमाकृष्ट इति भावः । ननु मां विहाय कथमन्यामभिस
रिष्यतीत्यत आह ॥ ॥ किं वेति ॥ यद्वा ॥ निसर्गप्रसंगमेर्बंधुभिर्मित्रैः कलाकेलिभिः क्रीडाकौतुकैर्बद्धो रुद्धः इदमपि न
घटेते । मद्विलासाकृष्टस्तैः रोद्धुमशक्यस्तत्राह । किमु वितर्के मामभिसरन् संकेतस्थलमलभमानः अंधकारिणि घ
नतरुच्छायया निविडांधकारे यावति वनोपांते संकेतीकृते विपिनसमीपे भ्राम्यति परिभ्रमणं करोतीति किं । ननु नाग
तः किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभिर्बद्धो बंधुभिरंधकारिणि वनाभ्यर्णे किमु भ्राम्यति
कांतः क्लांतमना मनागपि पथि प्रस्थातुमेवाक्षमः संकेतीकृतमंजुवंजुललताकुंजेपि यन्नागतः ॥४७॥
रतिशिरोमणेः सहसरोरुहस्य तस्य संभ्रमः कथं भविष्यतीति निश्चित्याह । क्लांतमना इति । विश्लेषदुःखेनोपत
प्तमनो यस्य तादृशः मनागपि पथि मार्गे प्रस्थातुमेवाक्षमस्तेन चलितुमेवासमर्थः । उक्ता चेयं नायिका उत्का भवति
॥ तदुक्तं रुद्रेण ॥ किमयं स्मरदंभोदः किं चाद्य सकटवकं ॥ रुतं रूपुरुसंवादिः श्रूयते तन्न तोयदः । इत्युपसंज्ञाया ६३
क्षेपः संज्ञायोयन्निवञ्चति । धर्मेणाहं समुत्सृज्य नाधृष्टघनजानितेति । वितर्के किं किमुत चेदित्यमरः । नृपालः सवि
धेचेति विश्वः ॥४७॥ अथेति ॥ अथानंतरं इयं राधा एतद्दुःस्मारं दृष्ट्वा वदति । स्वयमवलोकितमिव कथितवती । किं
कृता । सखीं माधवमंतरेण कृष्णं विना आगतां वीक्ष्य दृष्ट्वा । माधवपदेन मायायाः कपटरूपायाः ज्ञाकैः धवस्वामिन

१५

अत एव वंचनस्वभावमित्यर्थः । किंभूतां सखीं विषादमूकां दुःखातिरेकेन वाक्यं वक्तुमसमर्थां ॥ कीदृशी ॥ जनार्दनं
कृष्णं कयापि तु नायिकया रमितं विनोदकमाना तर्कयंती ॥ जनस्यार्दनस्वभावो यमतस्तस्य मम संतापकत्वमुचि
तमित्यभिप्रायेण जनार्दनपदोपादानं उपेंद्रवज्रा छंदः पक्षांतरे च श्रीकृष्णं संकेतनिकुंजे अलभमाना व्या
कुलाभ्री राधा निरीक्ष्य सखीं विषादमूकां तां वीक्ष्येत्यर्थः ॥४८॥ ॥ यदाह ॥ तद्गीतेन दर्शयति ॥ स्मरसमरेति ॥ गीतस्या
स्य वसंतरागः ॥ एकतालीतालश्च ॥ गीतार्थस्तु ॥ कापि युवतिः मधुरिपुणा कृष्णेन सह विलसति क्रीडति ॥ किंभूता
अधिकगुणा । अधिकाः सौंदर्यादयो गुणाः यस्याः सा युवतिर्विलसतीनायिकाकर्तृके विपरीतमुक्तं । तेन चान्या
भिमुखस्य वल्लभस्य मणेना अधिकगुणेनेति न्यूनगुणोन्याकृतमपि व्यज्यते । अत एव चपलापुरुषायितानुकरणे
अथागतां माधवमंतरेण सखीमियं वीक्ष्य विषादमूकां ॥ विशंकमाना रमितं कयापि जनार्दनं दृष्टव
देतदाह ॥४८॥ स्मरसमरोचितविरचितवेशा । गलितकुसुमदरविलुलितकेशा ॥१॥ कापि चपला म
धुरिपुणा विलसति युवतिरधिकगुणा ॥ ध्रुवपदम् ॥ नलोला चंचलस्वभावा वा ॥ अस्थिरा वामदृपेक्ष
या अहमेव न द्वितीये स्थिरचित्ताना न्येत्यर्थः । मधुरिपुणेति मधुरसानभिज्ञेन चपलेन वेति कटाक्षितं च । उभयो
श्चपलयोः संबंधे कोवास इति भावः । ध्रुवपदं । तद्विपरीतरतचेष्टितमाह ॥ किं लक्षणा स्मरसमरः कामसंग्रामः सु
रतमिति यावत् । तत्रोचितो योग्यो विरचितः कृतो वेषः प्रसाधनं यया सा । पुनः कीदृशी गलितानि कुसुमानि ये
भ्यस्तादृशाणि ईषद्विलुलितानि स्रस्ताः कृष्णेन सत्कचग्रहलेवनदानेन केशाः यस्याः सा । विपरीतरते नायिकायाः
केशाग्रहणपूर्वकमेव चुंबनं कार्यमित्युक्तं प्राक् कुसुमभरेति पाठे गलितस्खलितः कुसुमभरो येभ्यस्तादृशा

विलुलिताः केशा यस्याः सा ॥१॥

गी॰टी॰ दृशीति॥ हरेः परिरंभणेनालिंगनेन वलितो जातो विकारो नेत्रविक्रिया यस्याः सा। कुचकलशोपरि तरलश्चंचलीकृतो हारो यस्याः सा। कुचयोः कलशत्वेन तदुपरि हारस्य वर्णनेन निर्विघ्नसुरतोत्सवनिर्वाहाय मंगलकलशस्थापनमिव कृतमिति ध्वनितं। कामशास्त्रे चाप्युक्तं। संभोगकोत्पालेन तच्चिंतापदरणाद्यु॥ ३॥ विचलेति॥ क्रीडावशातो पि विचलद्भिश्चंचलैरलकैश्चूर्णकुंतलैर्ललितोमनोहरः आननचंद्रो मुखशशी यस्याः सा। नालिंसंचालकानां मुखे चलत्कलकवचं द्रमसः प्रतीतः पुनः कीदृशी। तस्य श्रीकृष्णाधरपानरभसे नवेगेन कृता तंद्रा तन्मुखानुभवेन च क्षुमालिनं ययासा॥ अतिमादकादधरपानेन मत्तन यासकृत घूर्णेत्यर्थः॥ ३॥ चंचलेति॥ त्वां विक्षणमपि श्रद्धस्थातु न पारयेत्वमेवमम प्राणवल्लभ से वं तस्यानुनयं कृत्वा घूर्णितानोनास्येवं कथयंसा त्रिरश्वालनेन क्रीडावेगेन वा चंचलाभ्यां कुंडलाभ्यां ललितौ कपोलौ यस्याः सापीवा नरेदलितो

दृशि परिरंभणवलितविकारा॥ कुचकलशोपरि तरलितहारा॥ २॥ विचलदलककलिताननचंद्रा तदधरपानरभसकृततंद्रा॥ ३॥ चंचलकुंडलदलितकपोला मुखरितरसनजघनगतिलोला॥ ४॥

मर्दितावतिगतागतेन परमसुकुमारत्वात्॥ किंच॥ मुखरिता शब्दायमाना रसना क्षुद्रघंटिका यस्य तादृशस्य जघनस्य गतागतेन लोला चंचला॥ यथासंख्यामे विविधबाधैः शूरोणां चापलं भवति तथास्या अपि सुरतसंयामे त्रिचपलायाः रसनाया मुखरत्वमिति भावः॥ ४॥ दयितेति॥ दयितस्य श्रीकृष्णस्य विलोकितेनाभिप्रायविशिष्टनिरीक्षणेन लज्जिता लज्जावती हास्ययुक्ता चेत्यर्थः॥ पुरुषायमानायास्तस्याः अधःस्थितस्य तां गतायमानस्य तस्यावलोकनादिवतेउसन्न लज्जायाः सुरतेनुपयोगत्वात्॥ संभोगावेगेन हास्यमेवाभूदित्यर्थः॥ उक्तंच सुरतादन्यत्र लज्जा परमभूषणमिति॥ बहुविधं पिककोकिलकलहंसादीनामिव ना

नाप्रकारं कूजितं शब्दितं यत्र ता दृशो यो रतिरसः संभोगानुरागस्तेन रसिता हृष्टा॥ बहुविधं पारावतादीनां यत्र कूजितं तद्युत रतिरसेन रसितं शब्दितं यस्याः सेति वा। रसितं शब्दितं हृष्टं चेति॥ ५॥ विपुलेति॥ विपुलाः प्रचुरा ये पुलकारोमांचास्तैः पृथुर्महान्मनोहरो यो वेपथुः कंपस्तस्य च भंगोस्तरंगा यस्याः सा। रोमांचकंपयोरन्तरोन्तरोत्पत्तिरंगा स्यामत्र। भंगस्तरंगतु गभेदे भंगो जयविपर्य्ययेइति विश्वः॥ अपिच॥ एवंभूतसुखानुभवे विच्छेदो मा भूदिति सुरतायासेन वा श्वसितं निश्वासः परमानंदाद्वा। तिसान्निध्यस्तस्त्वकासुभावः आनंदावस्थाच निमीलिते चाक्षिमुद्रणमिति श्वसितनिमीलिताभ्यां विकसत्प्रकटी भवदनंगः कामो रतेर्लक्षणं यस्याः सा॥ तदुक्तं॥ मुकुः स्वजघनाश्लेषः सीत्कारो वेति लज्जिता। हुंकारो हसितं नार्या वीर्यसान्निध्यसूचकमिति

दयितविलोकितलज्जितहसिता॥ बहुविधकूजितरतिरसरसिता॥ ५॥ विपुलपुलकपृथुवेपथुभंगा॥ श्वसितनिमीलितविकसदनंगा॥ ६॥ श्रमजलकणभरसुभगशरीरा॥ परिपतितोरसि रतिरणधीरा॥ ७॥

१ रतिरहस्ये। मूर्छनामीलनं चाक्ष्णोश्च्युतिकालस्य लक्षणमिति॥ ६॥ श्रमजलेति॥ कीदृशी॥ श्रमजलकणभरेण सुरतायासप्रस्वेदविंदुसमूहेन सुभगं मनोहरं मुक्तास्रक्कृतशोभं दरवरी रं यस्याः सा॥ किंचोरसि कृष्णवक्षसि परिपतिता पुनः सुरताय कृष्णोत्थानशंकया स्वभुजाभ्यां तरमाहृत्य पतितेत्यर्थः पतितेति निःसहत्वं कथितं तेन च सुरतांतं सूचितं॥ तदुक्तं॥ अंगस्वेदः श्लथत्वं चकेशवस्त्रादिसंयतिः। जावेच्युतिः सुखेनार्याः विरामेच्छा च जायतइति। कीदृशी। रतिरणे सुरतसंग्रामे धीरा स्थिरा चतुरा वा। लवलेशकणकणवइ

गी॰टी॰ श्रीजयदेवेति॥श्रीजयदेवकवेर्भणितंतयत्श्रीहरेःरमितंक्रीडितंतत्कलेः कलियुगस्यकलुषंपापंदूरीभजनवैमुख्यरूपंश्रर्थाज्ञायकानांश्रोतॄणांचपरिनमितंजनयतुतितिक्षेण ज्ञातनयतु॥अथवा॥श्रीजयदेवेनश्रीराधायाःसकाशात्भणितपठितश्रुत्यासदृशमितश्चतएवकलिकलुषकलहेनकलुषंश्रत्तःकरणंविकारश्रीराधायाःतदागमनेनपरिनमितंश्रासमंतात्भावेनशमितंजनयतुकरोतुश्रीकृष्णश्रागस्यप्रेमकलहजन्यमानसविकारंदूरीकरोतुश्रीराधायाइतिध्वनिः॥अथवा॥श्रीजयदेवःश्रियाश्रीराधायावर्णितिश्रन्यासदृश्शुकीयमत्तहरिरमितंतन्निचोरस्यश्रीकृष्णस्यक्रीडाविशेषरमणंश्रोष्ठंकीर्त्तनपराणांकविकलुषंविषयसंबधात्यज्जीयतेतत्सर्वंधोवापरिनमितपरिश्रासमंतात्भावेनशमितंपूर्वसंबधस्यदोषगंदहतु
श्रीजयदेवभणितिहरिरमितं॥कलिकलुषंजनयतुपरिशमितं॥८॥२४॥विरहपांडुमुरारिमुखांबुजद्युतिरयंतिरयन्नपिवेदनां॥विधुरतीवतनोतिमनोभुवःसुहृदयेहृदयेमदनव्यथां॥४९॥
अथसंबधोमाभवतुकिंतुजनयतुनाशंप्रापयतुराधामोहनयोरेवपरमप्रेमएवभवतुइतिवाक्यार्थः॥८॥संप्रतिचंद्रोयमधिकरतंव्यथयतीत्याह॥विरहपांडुरिति॥श्रयेइतिविषादे॥श्रयंहृदयमानश्चंद्रोमम हृदयेमदनव्यथांकामपीडांश्रतीवाधिकांतनोतिविस्तारयतिकीदृशः॥विरहेणमद्विश्लेषेणपांडुधूसरयन्मुरारेःकृष्णस्यमुखांबुजंवदनकमलंतस्यद्युतिरिवद्युतिर्यस्यतात्दृशः॥मदनव्यथाकथंविस्तारयतिसोपिदृष्टेतन्मुखस्मरणात्दुःसहाव्यथाजायतइतिभावः॥किंकुर्वन्वेदनांतापानमपितिरयनतिरोहितंकुर्वन्चंद्रस्तर्हिपराधमपिविस्मार्यवेतनोन्मूलनमपिकरोतीत्यर्थः॥अथाजनकत्वेहेतुमाहमनोभुवःकामस्यसुहृन्मित्रंचंद्रस्येश्वरमनोजन्यत्वेनका ८५

२१

मस्यचमनसिजत्वेनसोदरत्वंतेनमपिसुहृत्त्वस्यकामस्यसाहाय्यंत्विकीर्षतेतंचंद्रेणाव्यथाजन्यतइतिभावः॥चंद्रमामनसोजायतइतिश्रुतेः॥विरहेणतानदुःखयोः॥श्रयेक्रोधेविषादेत्वसंबुद्धौस्मरणेपीतिविश्वः॥तिरतर्द्धौतिर्यगर्थइतिचतिरयन्प्रकटीकुर्वन्नित्यर्थेःसारसमुद्दूरनइतिरत्नकोशात्॥वेदनांतिरयन्प्रकटीकुर्वन्नितिवा॥यमकालंकारश्चात्र॥तदुक्तंदंडिना॥एकद्वित्रिचतुष्पादेर्यमकानांविकल्पनां॥आदिमध्यांतमध्याद्याद्यंतसर्वतइति॥पद्यद्वयेप्येवं॥तथापिट्टिति॥यथाव्याख्यानांतरे॥तदाश्रद्धेतिस्मरणेयेहृस्मरामियत्तत्कृत्वेनमयेवक्रीडितंइतिवेदनादुःखंतिरोहितंकुर्वन्नपिकिंतुसमतितंप्रकृष्णंतिमनोभुवःसुहृत्पांव्यथयतीत्यर्थः॥४९॥इर्ष्यातितनकस्याश्चिद्रमणेनिरूपेदानींश्राधीनभर्तृकांतांश्वमनोरथेनेववर्णयितिसमुदितेति॥गीतस्याप्यपुर्जरीरागः॥एकतालीतालश्च॥गीतार्थस्तुविजयीमंडनादिकोंशोलेनसखीनिगसमुदितमदनेरमणीवदनेचुंबनवलितधरे॥मृगमदतिलकंलिखतिसपुलकंमृगमिवरजनीकरे॥१॥रमतेयमुनापुलिनवनेविजयीमुरारिरधुना॥ध्रुवपदं॥ ॥यमिनिःइत्यंकइतिवा॥नत्तुरौनपराश्वतोवा॥मुरारितितद्विधकार्कत्वेनरसस्यभावंसत्वयति॥पक्षांतरेमुरारिपदेतसामर्थ्यनिर्भयक्रीडन॥सुरयतिवेष्टयतिनारीस्वभुजाभ्यामितिमुरारितोन्मुक्तत्वंवा॥अधुनासाप्रतंयमुनापुलिनवनेयमुनायाःसैकतेयद्वनंतस्मिन्रमतेक्रीडतिअनेनसंभोगश्रमदृशणाभोगयोग्यदेशप्रपत्रिदर्शिता॥ध्रुवपदं॥क्रीडामाहरमणीयवदनेरम्यने॥रमयामितिरमणीतस्याःसुखस्तपुलकरोमांचरहितंयथास्यादेवंमृगमदतिलकंकस्तूर्याविशेषकंलिखति॥नानाचेत्तित्र्याणिमर्मातिक्रीडाद्रेवदनेसमुदितःसमुद्भूतः॥शुकूल्नायककरस्पर्शेनका मोपन्नताहृशे॥अथवा॥कृष्णस्यसमुचितोमदनोयस्मन्ताहृशे॥

पुनः कीदृशो॥ चुंबनायाधरपानाय वलितः सन्मुखीकृत्य संकोचितः कृशेन तयैव वा तन्मुखं चुंबनायाधरो यत्र
तादृशे॥ अथवा॥ चुंबनाय वलितः सेवितः सिंदूररेखादिमंजनं त्राजेन चिरमुषासितो। अधरो यत्र तादृशे।
८६ चुंबनाय वक्रे देन्येनयाचितो वा। वलितं याचितेपि स्याद्वलितं सेविते पिचेति विश्वः। कस्मिन्क मिव। रजनी
करे मृगमिव। पूर्णेचंद्रे हरिणमिव। कीदृशेचंद्रे। समुदितो मदनो यस्मात्तादृशे। अतश्चंद्रदर्शनादमृतमि
वाधरपाने प्रहृतिरपि। अत्रा ह्लादकारि मुखस्यालकसामीप्यं भजमानस्य निशाकरसाम्यं कस्तूरीतिलकस्य
च मृगसाम्यं॥ प्रथमपक्षे॥ समुदितमदने चुंबवलिताधर इत्यनेन तस्याः भावोद्रेकः कथितः न तु नायकस्येति क
टाक्षितं रजनीकरसादृश्येनापि शोभायां न स्थैर्यमपि। नित्यमेव श्रीराधायामानुकूल्येन स्थिरानुरागत्वात्। तस्या

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने कुरवककुसुमं चपलासुषमं रतिमृगकानने॥२॥ ॥

एवं प्रतिसरणासो भाग्यस्य शोभाबाभिवृद्धिः॥२॥ किंच। घनचयेति। तस्याश्चिकुरे केशपाशे जा
तावेकवचनं। कुरवककुसुमं पीतपुष्पविशेषं झिंटीति। पर्यायश्च म्लानशोणपुष्पपद्मं वा रचयति। यथाविन्या
समर्पयति॥ किंदृशे चिकुरे। घनचयरुचिरे मेघपटलवन्मनोहरे पुनः कीदृशे। रतिपतिः कामः स एव मृगः क
रीतस्य काननेनिवासवने अस्य कानन स्योहापनविभावत्वेन कामोपि कामभयमात्रं समानः स्त्रीसदृश
एव केशाबंधनपाशेनिबद्ध इवावतिष्ठती। तिरतिपतियदोपादानं। पुनः कीदृशे। तरलिततरुणानने तरलितं च
चलीकृतं तरुणाननं तरुणः श्रेष्ठः श्रीकृष्णो येन कामोद्बोधनेत्यर्थः तादृशे॥ तरलितविविधोपमोत्प्रेक्षाभिरुत्क
लितं तरुणाननं मुखरीकृतं तरुणस्य निसकिशोरस्याननं मुखं येनेति वा॥ काननस्य विशेषणं वायोज्यं। तदा तरलि

कामोद्बोधकत्वात्पुष्पविकाशाश्च ग्रथितकुसुमैः केशैः साम्यं च युक्तं। कीदृशं कुसुमं चपलासुषमं चपला
या विद्युतः सुषमा शोभा तिशायिता यस्य तत्। रूपकालंकारश्चात्र। अन्यनायिकारमणापक्षे स्वयंतिस्यनेन तत्के
शगुंफने करकंपाद्यनुहृद्यानायकस्य तस्याम नासक्तिरिति ध्वनितं। तद्यथा॥ मा गर्वमुद्वह कपोलतले चकास्ति कृ
ष्णहस्तलिखिता वनमंजरीति। अन्यापि किंन सखि भाजनमीदृशीनां वैरी न चेद्भवति वेपथुरंतरायः इति। मृग
शोकुरंगे च करिनक्षत्रभेदयोरिति विश्वः। काननं विपिने गेहे परमेष्ठिमुखेचेति। चिकुरं चंचले केशेषु
भुजंगयोरिति। कुसुमं पुष्पफलयोरिति सुखमा परमाद्युतिरिति॥ चिकुरः कुंतलो वालः कचः केशः शिरोरुह
इत्यमरः॥२॥ अपि च। घटयतीति। कुचयुगमेव गगनं तस्मिन् मलनिर्मलं मणिसरं मुक्ताहारं तदेव तारकपटलं

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते॥ मणिसरममलं तारकपटलं नखपदशशिभूषिते

तदेव तारकपटलं नक्षत्रसमूहं घटयति योजयति। आकाशस्थितशोभा यत्र निर्मातीति। कीदृशे॥ ॥३॥
सुघने। सुतरां पीने। अतिकठिन इत्यर्थः। पुनः कीदृशे॥ मृगमदस्य कस्तूर्याः रुचिर्दीप्तिस्तया रूषिते पुनः
कीदृशे। नखपदं नखाक्षः स एव शशी तेन भूषिते अलंकृते। नखक्षतं चेदमर्धेंदुसंज्ञं बोध्यं। तदुक्तं पंचसायके। अ
र्द्धेंदुसंज्ञमिदं नखेः सैर्द्धेंदुसंज्ञं कथितं समंतात्। कक्षान्तिके स्तनयोश्च कंदे दानव्यमेतत्करजं सदैवेति। अतो अ
त्रानिपटमप्यर्द्धचंद्रपरं गगनपक्षेपि। कीदृशे गगने सुघने अतिविस्तारवति। अभूतोपमार्थं शोभनाघनामेघायः
स्मिन्निति वा। पुनः कीदृशे। मृगमदकांतिश्चोभिते चंद्रार्द्धेश्चालंकृते। विमलतारकपटलं चयत्र वकविसंपदायश्च
कारस्य स्यामत्वेनैव निरूपणात्तुसाम्यरूपकालंकारत्वमत्र ज्ञेयं। घनः सांद्रे दृढे दार्ढ्ये विस्तरे भनविस्तारवति।

जितविशेति। मृदुभुजयुगले तस्याः कोमले बाहुयुगले मरकतवलयं इन्द्रनीलमणिकंकणमेव मधुकरनि
चयं भ्रमरसमूहं वितरति अर्पयति। कीदृशे भुजयुगले। निजमार्दवेन गौरतया च जितमभिभूतं बिसशकलं मृणाल
८ खंडं येन तादृशे॥ करतले मे च नलिनीदले पद्मिनीपत्रं यत्र तादृशे। पुनः कीदृशे हिमशीतले। हिमादपि शीतले संता
पहरत्वात्। यद्यपि कबिसंप्रदाये क्वापि करतलस्य पद्मिनीपत्रत्वेन वर्णनं नास्ति तथाप्यत्र भुजस्य विचारूपत्वान्न विरु
द्धमिति। किंच। मकरंदार्थिवृन्दाटिभ्रमणात् इदं एव भ्रमरमंडलीस्थितेति भावः। नलिनी पद्मिनी पद्मव्योमसिंधु
सरोवरे इति विश्वः। मरकतो नीलमणिरिति। कंकणे वलयो मत इति धरणिः। विश्राणनं वितरणं दानं च मति
पादनमित्यमरसिंहः। रूपकालंकारोयं॥४॥ रतिगृहेति। रतेः शृंगाररसस्य गृहे आश्रये जघने मणिमयरसनं मु
क्तामयीं मेखलां विकिरयति क्षिपति। अत्र विकिरतीत्यनेन कांचीबंधनसमये श्रोणीस्पर्शजनितसाध्वस
जितविसशकले मृदुभुजयुगले करतलनलिनीदले॥ मरकतवलयं मधुकरनिचयं वितरति हि
मशीतले॥४॥ रतिगृहजघने विपुलापघने मनसिजकनकासने मणिमयरसनं तोरणहसनं। किरति
नूनं कंपमानमानकरः क्षिपति न तु बध्नातीति ध्वनितं। कीदृशे जघने। विपुलापघने विपु कृतवास ॥५॥ ८
लो विस्तीर्णोपघनोवयवो यस्य तादृशे। अतिमांसल इत्यर्थः। अथवा। विपुलं मार्दवयुक्तं अपघनो घनः कठि
न्यं यत्र तस्य जघने कोमले तत्र च तत्र नपातस्मिन् मार्दवसौकुमार्ययुक्ते इत्यर्थः। विशिष्टं विपुलं पुलको यस्मि
न स विपुलस्तादृशोपघनः शरीरं यस्य इति उदितसात्त्विकविकारे इति वा। पुनः कीदृशे मनसिजकनकास
ने। कामस्य सुवर्णमयराज्यपीठे। कीदृशं मणिमयरसनं। तोरणस्य मांगल्यस्रजः हसनमुपहासो यस्मात्तादृ
शं। अन्योपि यदा सिंहासनमुपविशति। तदा तत्र परिजनैर्वंदनमालिका बध्यते मनसिजसिंहासनीभूतस्या ज

घनेस्य क्षुद्रघंटिकारूपमांगल्यस्रजमयं निबध्नातीति भावः। पुनः कीदृशे जघने कृतवासने तदनुरूपसाटि
कादिकं वस्त्रं यत्र तादृशे। कृतवासनं श्रीकृष्णस्य वशीकरणाय शृंगारानुगुणधूपविशेषो येनेति वा। अथवा।
कृता तत्कांतिदर्शनात् श्रीकृष्णेन वासना भोगेच्छा यस्य तादृशे॥ अथवा॥ कृतं वासनं कामेन स्थानं यत्र ता
दृशे। यद्यपि मनसिजकनकासनेनैव कामस्थानत्वं प्राप्तं तथापि नित्यं तत्सान्निध्यसूचनायेतदुक्तं। अंगम
ली कोवयवोपघनोथ कलेवर इत्यमरः। वासनं वसनेऽवस्थाने ज्ञाने च धूपने इति विश्वः। पुलस्यात्पुलके
चेति। रतिः कामस्य भार्यायां स्यादनुरागे सुरतेपि चेति। रूपकालंकारः॥५॥ चरणेति। चरणकिसलये चरण
एव किसलयं ताम्रत्वात् कोमलत्वाच्च। तत्र च ताम्रपद्मपल्लवे यावकभरणं अलक्तकपूरणं करोतु। कीदृशे।
चरणकिसलये कमलानिलये नखमणिगणपूजिते॥ बहिरपवरणं यावकभरणं जनयतिहृदियो
कमलायाः श्रियो निलये आश्रये कांत्याः निवास इत्यर्थः पुनः कीदृशे। नखा एव ये मणिगणा जिते॥६॥
मणिसमूहास्तैः पूजिते अलंकृते। श्रीनंदनस्य नंदनस्य दुःप्राप्यतया श्रीः स्वभक्तिरूपाभिर्मणिभिस्तस्त्रिया चरणसं
पूज्यात्मानं भगवत्समर्पणं यत्तच्चरणसौंदर्यलीनावश्यंवेति भावः। कीदृशं यावकभरणं बहिर्भूतमप्यावरणं
संचरणं यस्य तादृशमस्पष्टमित्यर्थः। चरणस्य स्वभावरक्तत्वात्सावरकमिति वा। पुनः कीदृशे चरणकिस
लये हृदि योजिते स्ववक्षस्यनुरागातिशयेन योगं प्रापिते। स्वहृदये तच्चरणपल्लवं निधाय यावकं रचयति
त्यर्थः। अथवा किंभूते हृदि कमलायाः निलये गृहे। पुनः कीदृशे नखान् खस्तान् तानि तान्येव मणिगणास्तैः
पूजिते भूषिते। श्रियापुरुषेपि हृदि तदीयचरणं धारयति नितस्याः सौंदर्याधिक्यं सौभाग्यातिशयं च कथित

मितिभावः पक्षांतरे कमलायाः वरस्त्रियाः श्रीराधायाः निलये वासितथा च तत्र पक्षतयुक्ते वक्षसि स्वयमेव चाल
कक स्वरेना यद्योजिते दक्षिणपदेन यावकभरणं जनयति सामान्यतः करोति न तु चित्रादि रचनेनातो वदिसूतमप
वरणमितस्ततः स्खलितमित्यर्थः। चरणाकिंशालयेन रवमणिगणपूजिते इत्यत्र किंशालयमणिगणयोः परस्य
 रायोगाद युक्तं नामरूपकमिति। तदुक्तं दंडिना। इदं मंदस्मितज्योत्स्नास्निग्धनेत्रोत्पलं मुखमिति। ज्योत्स्नोत्पला
योगादयुक्तं नामरूपकमिति। नखकररुदे सांडेगंधद्वयेन स्तमतमिति॥६॥ रमयतीति। एवं कामपि सुभ्रूं ज्ञात्वा
भने ह नौनेनेयस्यास्तां खलो दुर्जनो यो हलधरसोदरो बलभद्रस्य भ्राता श्रीकृष्णस्तस्मिन् सुभ्रूं रामति न्यायेन रम
यति सति दिसखि दितो परेष्टिके वदकथय इह विटपोदरे कुंजमध्ये विरसं रसदितं यथा स्यात्तथा त एवाफलं च य
था स्यादेवं चिरं वकुंकालं त्वा प्यकिं किमित्येवं संस्थितास्मीत्यर्थः। हलधरसोदर इति तं ग्राम्यत्वेनोपालभते।
रमयति सुभ्रुवं कामपि सुदृशं खलहलधरसोदरे॥ किमफलमवसं चिरमिह विरसं वद सखि वि
विरोद्धो लवणोक्षुते मूर्खके खदिरेपि चेति विश्वः। अथवा इह विटपोदरे विटपोति धूर्तस्तादृशा टपोदरे॥७॥
स्येवोदरमभ्यंतरं यस्य तस्मिन्नेवं विधधूर्तनिमित्तं। निमित्ते सप्तमी। अहमिह स्थले विरसफलं च चिरं किमित्येव
समित्यर्थः। पक्षांतरे सप्तभिः पदैः सख्यां कमि दमित्यपि याकुर्वंति। तदा कामपि सुभ्रुवं राधामित्यां खलह
लधरसोदरे खलानां निग्रहाय हलधरमायुधं धारयतीति खलहलधरसोदरो बलभद्रस्य भ्रातरि दुष्ट
दमनसमर्थे बलवतीत्यर्थः। विटपोदरश्चतुरश्चूडामणी रमयति मत्ति इदं वनेकिमफलं विरसं चावसमपि
तु सफलं सरसमेवेत्यर्थः। निर्भयकेलिसंपादनोयद्बलधरसादृश्यमिति ध्वनितं॥७॥ इहेति। इह तत्काव्य
कर्त्तरि कवीनां नृपे जयदेवके कलियुगचरितं अचरितं दुरितं कलियुगेन चरितं कृतं वा न वसतु न तिष्ठति

कविनृपजयदेवके इह गीतगोविंदके प्रबंधे राधामोदनयोः
रसभणने परस्परवियोगविलासकथने पठिते सति कलियुग च

रितं अनादि स्थितं कलौ कथितं प्रतिदुरितं दोषं न वसतु अर्थाद्भक्तजनेषु न विषयकारं जनयतु। कीदृशे
रसस्य शृंगाररसस्य भणनं कथनं यस्य तादृशे पुनः कीदृशे। कृतं हरेर्गुणानं वितनं येन तादृशे मधुरिपोः
कृष्णस्य पदं सेवकस्य शृंगाररसस्य भणनं कथनं सेवके। दुरितध्वंसनसामर्थ्यं द्योतनाय मधुरिपुपदोपादा
न॥ अथवा॥ कलिः प्रेम्णा विरुद्ध कलहेन युगयोः युगलयोः श्रीकृष्ण अन्यनायिकयोः चरितं श्रीराधि
कया मनसि कल्पितं रसितं तदेव दुरितं दोषं कविनृपजयदेवके श्रीराधामोदनयोः कविलेन कविरा
जस्तस्मिन् श्रीराधायाः सख्या अन्यया सह श्रीकृष्णस्य रमितमेव दुरितं दुष्टं इति न कथितं न वसतु या राधया
उक्तेन मनइ ह अस्मिन् गीते रसतया रमणं तया भणनेन पदेन कृतं सत्यपि स्त्रीभावनयानतिष्ठतु। ननु
इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके॥ कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके॥८॥२४॥
तर्हि कथं भणितं पठितं। तत्राह। कीदृशे भणने कृतहरिगुणने। एतन्मध्ये हरेः श्रीराधिकाया भणनेनैव वि
रसतापहरती तितेनैव गुणितं भणितमित्यर्थः। कीदृशे जयदेवके यतः मधुरिपुपदसेवके मधुः मधुरो रसः
श्रीराधागीतेन इ युग्मपदयोः सर्वभक्तजनअधिष्ठानभूतयोः राधामोदनयोः सेवकत्वं येन तस्मिन्॥
अथवा॥ वियोगेन कलहरूपचरितं अन्यया सह रमणं तत् राधिकया मनसि एव दुःखेन कृतं प्राप्तं न तु सा
क्षात्तु श्रीराधाया हृदयेन वसतु यत्ज्ञानत तस्थिरीमाभवतु कुसति। इह अस्मिन् अष्टपदैः सख्याः श्रीरा
धामोदनयोः यः रसः रमणं वर्णितं तदेव कविनृपजयदेवके भणति वसति कवित्वतया नृपतित्व राजत्व
दीप्तत्वप्रकाशमानं श्रीराधामोदनयोरेव जयदेवकं क्रीडनयत्र तादृशे भणने कृते सति। कीदृशे भणने

कृतहरिगुणे कृतंमनोहरंराधामोहनयोरेवगुणवर्णनयत्रतादृशेपुनःकीदृशेभ्रमणेनमधुरिपुपदसेव
केमधुश्रीराधायाअधरामृततस्यरिपुःवियोगःअन्ययासहरमणरूपोवाएवंउभयोःपदसेवकेहृदतो
८९ यत्रतस्मिन्॥८॥ ॥नन्वातइति।सखिममअहंसेनशीलेममसमानदुःखशीलेवा।त्वयावकुपत्वंकृतं
तवकोअपराधःयथापूर्वंउक्तंसखिजनवंचितेतिखिदवचनादेवोक्तंनतुद्वेषादिति।सखिपदोपादानप्र
थमसंबोधनहेतुःइतिदोस्यकर्मकुशलेनिर्दयोयोदयारहितोऽतएवशठःकृतएतदमपराधोयदिनाया
तस्तर्हित्वंकिंदूयसेकिमितिदुःखिताभवसि।केवलंशठोनभवतिकिंतुधृष्टोपीत्याहस्वछंदमिति।सवकुव
ल्लभोनेकनारीप्रियोतएवस्वच्छंदंनिःशंकंरमते।ययाकयाचिदपिकयासहकेलिंकरोतीत्यर्थःतत्र
तस्मिन्नर्थेतेनवकिंदूषणंनकिमपीत्यर्थः।ननुक्षणंसमाश्वसिहियावत्पुनरपितंतिकंगत्वातमान
यामीत्यतआहपश्यप्रियेति।अद्येदानीमेवाश्चर्यंपश्यप्रियस्यकृष्णस्यआद्यप्रियस्यैतिवा।संगमायमि
लनायेदंममचेतोंतःकरणंस्वयंस्वयमेवनतुयत्नेनयास्यतिगमिष्यतिकीदृशंदयितस्यप्राणकोटि
वल्लभस्यगुणैःसौंदर्यादिभिराकृष्यमाणंवलान्नीयमानं।अपरमपिगुणैरज्जुभिराकृष्यमाणंवला
दन्यत्रनीयतइतिभावः।कीदृशंउत्कंठार्तिभयादिवस्फुटत्स्फुटत्पातान्तरेउत्कंठाऔत्सुक्यंआर्तिःपीडा
तयोर्भरोतिशयस्तस्मादिवस्फुटत्प्रकटीभवत्त्वद्धिर्भवदित्यर्थः।अपरमपिवस्तंतरसंकुलेस्थानेस्थि

तंवस्तुसांकर्यात्त्वद्धिर्भवतीतिस्फुटद्विदलदितिवा।अन्योपिभाराक्रांतोपिविदीर्णतएव।अतःपरंदुःख
सोढुमशक्तयातत्क्षणेनैवस्मरंत्यायप्राणाएवत्याज्यास्ततोंतेयामतिःसागतिरितिस्वयमेवचेतस्त
त्रयास्यतीतिकिमतःपरंतवतत्रगत्यायासेनेतिभावः।अत्रप्रथमपदेशठोनायकउक्तःस्वछंदमित्यादि
५ नाहृष्टस्तदुभयलक्षणंशठोगूढापराधकृत्।धृष्टोव्यक्तान्ययुवतीभोगलक्ष्मापिनिर्भयाइति।इयंतुप्रण
यसंरंभोक्तिःसतुअतिंदावनेश्वर्यामनुकूलएवनित्यंतदग्रेप्रकटयिष्यति।अतोतदासइवोपसेवितप
दांभोजइति।अत्रोत्प्रेक्षालंकारश्च॥१०॥संप्रतिश्रीकृष्णेनसहरममाणयाःसौभाग्यसुखंतद्धिरह
ताश्चसंतापमष्टपद्याकथयति।अनिलेत्यादिना॥ध्रुपदं॥गीतस्यास्यदेशाखरागे।रूपकतालश्चगी
नायातःसुखिनिर्दयोयदिनायातःस्तद्दूतिकिंदूयसेस्वछंदंबहुवल्लभःसरमतेकिंतत्रतेदूषणं॥पश्यप
द्यप्रियसंगमायदयितस्याकृष्यमाणंगुणैरुत्कंठार्तिभरादिवस्फुटदिदंचेतःस्वयंयास्यति॥१०॥
दि संप्रतिश्रीकृष्णेनसहरममाणयाःसौभाग्यसुखंतद्धिरहिताश्चसंतापमष्टपद्याकथयति।अनिलेत्या
दिना॥ध्रुपदं॥गीतस्यास्यदेशाखरागे।रूपकतालश्चगीतार्थस्तु।हेसखि।आत्मपरदुःखकथयो
गेअन्यथामानसदुःखंकस्याग्रेकथनीयंतत्तुविवेकयाभखिवनमालिनाकृष्णेनरमिताक्रीडिता
तिभावः।अथवायावनमालिनारमितासाकिंशालयशापनेनतपतीनापितुतपत्येवेतिकाकुः।

शिरश्चलनेन॥ अनुभूतविषयत्वान्न तपतीति वा पायाच्च रमिता सा द्रुततरचरणयोः संकटया पुनः पु
नः संगमतृष्णया किं ज्वालयन्नायनेनेन तपतीति ना पि तू पनसा भवतीत्यर्थः॥ उक्तं च॥ चलसियदूज्जाच्चा
१० रयन्तु पश्चन्नलिनसुंदरं नाथ ते पदं। झिलदणं कुरैः सीदति तिनः कलिलतां मनः कांत गच्छति॥१॥ दिनप
रिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतं। धनरजश्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छति॥२॥
कीदृशेन वनमालिना॥ अनिलेन वायुना तरलं चंचलं यत्कुवलयं तद्वन्नयनं यस्य स तथा तेन। अनिलव
त्तरलं कुवलयं च सुंदरं नयनं यस्येति वा। वनमालिपदेन शृंगारित्वमुपपादितं। अथवा वनमालायां वृंदा
वनलक्ष्म्या अनिला श्रीराधाया हृस्तेन स्पर्शरसास्वादलंपटेन भ्रमरेणेत्यर्थः। अनेन याका चित्कदाचिद्

अनिलतरलकुवलयनयनेन॥ तपति न सा किशलयशयनेन॥१॥ सखि या रमिता वनमालि १०
ना॥ ध्रुवपदं॥ विकसितसरसिजललितमुखेन॥ स्फुटति न सा मनसिजविशिखेन॥ ध्रुवपदं॥
मिता च सा तपत्येव तस्यामेवानुकूलत्वान्नित्यमिति ध्वनितं॥१॥ अपि च॥ विकसितेति॥ याव न॥२॥
नमालिना रमितेति सर्वत्र योज्यं। सा मनसिजविशिखेन कामबाणेन न स्फुटति विदीर्णा भवति। अन्यद
पि प्रतिपदं पूर्ववत्ज्ञेयं। तदेव दर्शयति। या रमिता सा मनसिजविशिखेन न स्फुटति अपि तु विरहदशा
यां स्फुटत्येव मदीयेवेत्यर्थः॥ कीदृशेन। विकसितं फुल्लं यत्सरसिजं पद्मं तद्वल्ललितं मनोहरं मुखं यस्य ते
न। मनसिजविशिखेन तन्मुखपद्मेन कामबाणपीडा निवृत्तिरिति सामर्थ्यं निरूपयतीति भावः॥ अन्येऽप्यर्थे

किंच॥ अमृतेति। या रमिता सा मलयजपवनेन मलयाज्जातेन वायुना न ज्वलति न दीप्यते॥ कीदृशेन॥ अ
मृतादपि मधुरं मृदुतरमतिशयेन कोमलं वचनं भाषणं यस्य तेन। तदुक्तं। मधुरया गिरा वल्गुवाक्यया बु
धमनोज्ञया पुष्करेक्षण। विधिकरीरिमा वीरमुह्यतीरधरसीधुनाप्याययस्व नः इति। यथा वा। पयश्चितामृ
तरसानि पदार्थभंगीत्यादिकराख्यैः। वदनतरुसर्प्यसि पर्कसविषयानलज्वालाहरणाय वचनस्यामृ
तत्वेन निरूपणं। तथा चानेन प्रियंवद इति नायकगुणः कथितः॥ अथवा॥ या रमिता सा न ज्वलति अपि
तु विरहदशायां मामिव ज्वलत्येवेत्यर्थः॥३॥ ॥स्थलेति॥ या रमिता सा हिमकरस्य चंद्रस्य किरणेन

अमृतमधुरमृदुतरवचनेन॥ ज्वलति न सा मलयजपवनेन॥३॥ स्थलजलरुहरुचिक
रचरणेन॥ लुठति न सा हिमकरकिरणेन॥४॥ सजलजलदसमुदयरुचिरेण दलति न सा हृ
दि विरहभरेण॥५॥
न लुठति तल्पांगी भूमौ परिवर्तनं न करोति। स्थलोद्भवं जलरुहं कमलं तद्वद्रुचिर्ययो
स्ताहृशौ करौ चरणौ च यस्य तेन स्थलरुहजलरुहयोस्ताहृशावितिवा। अथवा। या रमिता सा विप्रयोगेन
तल्पांगी भवति मामिव भवत्येवेत्यर्थः॥४॥ सजलेति। या रमिता सा हृदि हृदये विरहभरेण वियोगाधिक्येन न
दलति न दीर्यते। कीदृशेन। सजलो जलसहितो यो मेघस्तस्य समुदयः सम्यगुदयस्तद्वद्रुचिरेण मनोहरेण।
अनेन स्निग्धत्वं स्पर्श्णीयत्वं संतापहारित्वं स्निग्धत्वमाप्यायनकरत्वं रसमयत्वं च भगवद्रूपस्य कथित
मिति भावः॥ अथवा॥ या रमिता सा विरहभरेण हृदि न दलति अपि तु तस्या अपि वियोगे भविष्यत्येव मदित्यर्थः॥५॥

कनकेति।यारमितासापरिजनानांदृसनेनोपहासेनपरितः सर्वतोजनानांहास्येनवानश्वसितिसंतापनिश्व
सनमुंचति।कीदृशो।मीकनकनिकषःसुवर्णकषपट्टिकातन्नगतलेखायाइवरुचिःकांतिर्यस्यतत्रादृशंशुच्य
९४ नुपहतंचवसनंवस्त्रंयस्यतेन।अत्रकनकपदेनैवपीतत्वेप्राप्तेजलादिसंपर्केपिवावचमानत्वात्म्लानत्व
प्रदर्शनायनिकषपदोपादानं।कनकनिकषःकनकानुमानदृढुचिर्यस्य।शुचिनीशृंगारमयेवसनेयस्य।कन
कनिकषरुचिश्चासौशुचिवसनश्चतेनेतिवा।शृंगारःशुचिरुज्वलइत्यभिधानात्।शृंगारमयत्वेनप्रियारूप
सादृश्यात्तु।पामरूपशोभाचितपीतांवरेणेत्यर्थः।निकषःकषपट्टिकेतिहारावली।शुचिःशुद्धेनुपहतेचे
तिविश्वः।यारमितासापरिजनहसनेनश्वसितिश्च पितुर्वियोगेसतिश्वसित्येवमिमिवेत्यर्थः॥६॥सकले
कनकनिकषरुचिशुचिवसनेन॥श्वसितिनसापरिजनहसनेन॥६॥सकलभुवनजनवरतरु
णेन।।वहतिनसारुजमतिकरुणेन॥७॥
ति।यारमितातिकरुणेनातिशयितकरुणरसेनोपलक्षि
तासतीरुजंतद्विश्लेषजन्यांव्याध्यवस्थांनवहतिनधारयति।कीदृशेन।सकलभुवनेषुसर्वलोकेषुयेज
नायुवानस्तेभ्योवरतरुणेनाद्भुतलावण्यवत्त्वात्किशोरेणेत्यर्थः।अथवा।कलयाकांत्यासहवर्तंतइति
सकला।भुवनजनायस्मात्तेनवरुतरुणेन।तदुक्तंच।स्वमूर्त्यालोकलावण्यनिर्मुक्तेतियन्मूर्तिसौंदर्यलेशा ९१
तोन्येपिसुंदराइत्यर्थः।अथवा।सकलंसर्वंचतद्भुवनंचवैकुंठाख्यंतत्रजनस्तदीश्वरस्तरुणएवयसा
प्रसिद्धस्तस्मादपिसौंदर्यादिनाचरतरुणेन।उक्तंच।स्वस्यापिविस्मापनमितिनारुणंपंचाननमध्यमंकैशोर
मेवकुन्तुडयश्चवाक्योश्चकापिश्रीरुरसस्तथामूर्तेर्मधुरिमापंचकेशोरेसतिमध्यमे।तन्माधुर्यंयथा॥ २८

नवधनुर्वातनोर्नटस्यद्विबोधयुगंनारालिरिवत्रोणितानस्वरराजिरयेरवरा।विराजतिन्नारीरिणीरुचिरदंत
लेखारुणानकाचसखिसमीक्षणायुवतिरस्यचित्तस्यतीतिरसाम्रतसिंधो।गोलोकत्वेनप्रसिद्धत्वात्व्रजरू
पेभुवनेरामश्रीरामसुबलादिभ्योपिवरतरुणेनेतिवा।अतिकरुणेनेति।कृष्णस्यविरहेणवा।तथाप्रथ २
मपक्षेतिकरुणेनातिशयस्निग्धेनपरमरसावहेनेत्यर्थः।द्वितीयत्वतिक्रांताकरुणादयायस्मात्तादृशेन
निर्दयेनेत्यर्थः।सर्गांतेयत्यक्षदूयंप्रतिज्ञातंतयोःप्रथमंवस्तुविधिमपिराधोक्तिः।द्वितीयेनद्वौधायकस्या।
श्चित्सख्याउक्तिरपिसंभवति।तत्प्रक्तिःपदेरिति।हेसखीत्वमेवस्वाधीनपतिकातेनरमितात्वंतवप्रियःपा
र्श्वःएववर्त्ततेकिमितिविरहार्तेवविलपसीयात्वरमितासाएवंकरोतुरमितायाएवंप्रेमपराक्रमउचित

श्रीजयदेवभणितवचनेन।।प्रविशतुहरिरपिहृदयमनेन॥८॥१६॥

इतिवा।यात्वरमितातस्यास्तदास्वादरहितायाएवंनघटतएव॥७॥ ॥श्रीजयदेवेति।अनेनश्रीजयदेवभणि
तेनश्रीराधायावचनेनतत्सख्यावा।तद्वचनमेवजयभणितमित्यर्थः।तेनहरिरपिहृदयापदार्थ्यपिहृदयंप्र
विशतु।प्रियजनानांमनसिश्रीराधावस्तसीतिवा।हरिरद्भुतविक्रमोवावत्रपापिरुद्धोभवत्वित्यर्थः।सकटे
प्रविष्टस्यनिर्गमाभावात्।।अथवा।।अनेनश्रीजयदेवःश्रीश्चजयश्चश्रीजयौराधामोहनौदेवोइष्टोयस्य
तस्यकवेःभणितवचनेनश्रीराधायाःसकाशात्पवित्रवाक्येतहृदयंप्रतिमानसंप्रविशहरिःमानसविका
रहरणेसमर्थःश्रीकृष्णःअपिशब्दाद्राधापिप्रविशतुप्रकर्षेणनिश्चलतयाचिरात्तुस्थिराभवत्वित्यर्थः॥
अर्थात्तयोःपरागमेव॥८॥ ॥संप्रतिपुनःस्मरशरदतामलयानिलमुपालभते।मनोभवेति।हेचंदनानिल

चंदनसंबंधिवायो प्रसीद प्रसादं कुरु हे दक्षिण सर्वेषां विलासिनामनुकूलस्वभाव वामतां प्रतिकूल
तां मुंच त्यज। चंदनससर्गेण त्वं सत्संगरतस्य दक्षिणस्वभावत्वात् न च क्रूरत्वमुचितमिति भावः ॥ अथवा।
९२ रे दक्षिण प्रसीद न चेत् प्रसीदसि तर्हि वामतां मुंच। ननु मपि वामत्वं नास्तीत्यत आह हे मनोभवानंदन। म
नोभवं कामं मामानंदयतीति तत्संबोधने वमत्यातिकूल्यमाचरसीत्यर्थः। यदि च वामतामपि न मुंचसि तदा
हे जगत्प्राण जगतां जीवातो क्षणं क्षणमात्रं माधवं पुरोग्रे निधाय कृत्वा पश्चान्मम प्राणहरो भविष्यसि
जगत्प्राणेति तस्यानयने स्वस्य च प्राणहरणे सामर्थ्यं द्योतितं। माधवं पुरो निधायेति दुःस्यजस्त्री कृत्य

मनोभवानंदन चंदनानिल प्रसीद रे दक्षिण मुंच वामतां ॥ क्षणं जगत्प्राण निधाय माधवं पुरो ९२
प्रणया जीवनमेव भविष्यतीति भावः। अन्योपभुक्तस्याग्रे प्राप्ते मम प्राणहरो भविष्यसि ॥५१॥ ॥
क्षणमपि प्राणान स्थास्यतीति वा कमनीयत्वेन चांचल्येन च माधव मित्युक्तिः। दक्षिणस्य वामतां च जगत्
गत्प्राणस्य प्राणहरत्वमिति विरोधनामालंकारश्च वामं प्रति प्रेसुंदरे स्वर दक्षिणेऽनुरणायामपरछंदा
नुवर्तिष्यिति ॥५१॥ ॥ अधुनाममेवायमपराधो नान्यस्येत्याह। रिपुरिति। यस्मिन्कृष्णे मनोगते चित्ता
रूढे ऽयं सखीसंवासः सखीभिः सदावस्थानं शत्रुरिव दुनोत्युपतापयति। पुनःपुनस्तस्मिन्नेव योज
नात्। अयं च हिमानिलः शीतलवायुरपि शिखी वाग्निरिव दुनोति। सुधारश्मिश्चंद्रो विषमिव कालकू
मिव दहनोति। एवमनेन प्रकारेणास्य यः परेऽप्यस्वस्थताप्रयच्छंति। अदये दयारहिते तस्मिन्तादृशेनि

र्दयत्वात्तन्मयत्वेपि स्थितेऽप्येत एव यत्तत्पदेन सचिते। पतिभावात्। हृदयमंतःकरणं चतुष्टयं पुनर्भूयोपि व
लाद्बलेन निवार्यमाणमपि दृढात्तत्रैव गच्छतीत्यर्थः। अतः कुवलयदृशां कमलनयनानां कामः कं
दर्पो निकाममनिरंकुशोऽतिशयेन त्यक्तमर्यादोऽत एव वामः प्रतिकूलः। अन्योन्यानुरागे हि कामो
मनोहरो भवत्यत्र तु समर्थिनसानुरागः केवलं ममैव चेतस्तत्र धावतीति वामता कामस्येति भावः
॥ ॥ अथवा। यस्मिन्गते तस्य त्वस्थिते स तिसखीसंवासो रिपुरिव मनो दुनोतीत्यादियोजना सखी
नां रिपुवत् हिमानिलस्य वह्निवत् सुधारश्मेर्विषवदिति विरुद्धमिति विरोधालंकारः। यमकालं

रिपुरिव सखीसंवासोयं शिखीव हिमानिलो विषमिव सुधारश्मिर्यस्मिन् दुनोति मनोगते ॥ हृ
दयमदये तस्मिन्नेवं पुनर्वलते बलात् कुवलयदृशां वामः कामो निकामनिरंकुशः ॥५२॥ बाधां
विधेहि मलयानिल पंचबाण प्राणान्गृहाण न गृहं पुनराश्रयिष्ये किं ते कृतान्तभगिनि क्षमय
तिरागः वात प्रसिंच समं साम तु देहदाहः ॥५३॥ कारश्चात्र शिखिनो वह्निवद्धिमविषमरः ॥५२
संगतिक विरागिषमान्नास्ते प्रातरित्यादि। पश्चात्तस्येच सख्या वोध्यमानामप्यात्मेहि श्रूकृष्णस्तद्धिनिवि
ष्टे रेव तस्य प्रकटी वधूवेति कविः प्रत्यक्षानुभूतमिव वर्णयति। अयं नंदात्मजः जगदानंदाय अस्तु
कीदृशः। अतिशयेन सहासमुखं यस्य तादृशः। किं कृत्वा। राधानने नयनयोरंचलं प्रांतमाधाय।

रोप्य कुथं भूतं तत ज्ञयात रलं कराक्ष वीक्षितं कृतेत्यर्थः॥ ॥उक्तं च। यज्जनागत विश्रांत वैचित्र्येण
९३ विवर्त्तनं। कारकायाः कलाभिज्ञास्त। कटाक्षं प्रचक्षत इति। कुसमति सखी मंडले सहचरी हृदे च।
किंत विस्मितं यथा स्यात्तथा स्वैरं स्वेच्छया हसति हास्यं कुर्वाणे सति। किं दृष्ट्वा प्रातः प्रभाते अच्युतं
श्रीराधानुरागे च्युति रहितं तया सह नित्य विलासिनमित्यर्थः॥ ॥अथवा॥ ॥अच्युतनामापित
स्याः संभोग रसावेशेन क्रीडा संगोपनेन त्वाकोवभूवेत्यच्युतपदेन व्यंग्यं नीलनिचोलं तया मंबस्त्रय
प्रातर्नीलनिचोलमच्युतमुरः संपीत पीतांशुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखीमंड
ले। व्रीडा चंचलमंचलं नयनयो राधाय राधानने स्मेरस्मेरमुखोयमस्तु जगदानंदाय नंदा
त्मजः॥५४॥ ॥इति श्रीगीतगोविंदे सप्तमः सर्गः॥ ॥

स्वविनिमय सखीनां हास्य कारणमित्य
र्थः नंदात्मज इति धीरललित। कूलोयं नायक॥ ॥तदुक्तं॥ गहनादनुरागतः पितृभ्यामपनीत व्यवहा ॥
रकृत्य भारः। विहरन् सह राधया मुरारिर्यमुनाकूल वनान्यलंचकार॥ इति शार्दूलविक्रीडितं वृत्तं ९३
॥५४॥ इति श्रीगीतगोविंदे विमलब्बावर्णनेन नागरनारायणो नाम सप्तमः सर्गः॥७॥ ॥तासु वर्त्तमानो
पितयानक्षितं इति नागरो नारायणः। नारीणां समूहो नारी। समूहा अयनं यस्य तासां वा आयनं यः सः ना

२९

अथ कथमपीति। अथ शब्दो मंगलार्थः। अथानंतरं वा। सा सौभाग्याति शयेन विख्याता राधा प्रभाते प्रा
तः काले प्रियं कांतं साभ्यसूयं सेर्ष्यं यथा स्यादेवमुक्तवती। किं कृता। कथमपि कष्टेनापि यामिनीं रात्रिं
विनीय नीत्वा समाप्तिं प्राप्येत्यर्थः। अथ यामिनी पदेन प्रिय विश्लेष निशायाः दीर्घत्वं ध्वनितमुक्तवती कन्ये
तिवत्॥ अथवा॥ ॥यामिनी पदेन अश्रीकृष्ण भजनं विना यथा लोकानां यमः अनतिक्रमणीयः तथा
श्रीकृष्ण विरहेण श्रीराधायापि सा रात्रिर्यमवदनतिक्रमणीयाभूत्। अत एव यमतुल्यत्वात् यामिनीप
दोपादानं। किंभूता सा। स्मरशर जर्जरीतापि कामवाणग्रसितापि प्रतिरोमविद्धापीत्यर्थः। दुःसहान्यका
अथ कथमपि यामिनीं विनीय स्मरशर जर्जरितापि सा प्रभाते। अनुनय वचनं वदंतमग्रे प्रणत
मानिनी खंडिका। दिवि क्रूरदर्शनजनितमहादुःखा विरहादुःखाप्युवा मपि प्रियमाह साभ्यसूयं॥५५
चेत्यर्थः। कीदृशं प्रियं। अनुनयाय सापराध जनित कोप शांतये विनापुनरीदृशमाचरामीत्यादि विन
य वाक्यं वदंतं। पुनः कीदृशं। अग्रे प्रणतमपि पादाग्रेण प्रणमपि। पक्षांतरे साभ्यसूयमाह। गुणेषु दोषाः वि
ष्करणमसूया स्वरमितमपि चिन्हैरन्योपभुक्तं परिकल्प्य तिरस्कारं चकारेत्यर्थः। रजनीयामिनीत
दयो भवति रसज्ञानां सरलतया रसाभ्यास एवातः परमोचितमेव चेष्टितं श्रीवृंदावनचंद्रप्रियायाः ये
न्यथा परिकल्पयंति ते रसपरिपाटी पराङ्मुखा ज्ञेयाः॥५५॥ ॥श्रीगोपीजनवल्लभाय नमः॥ ॥

श्रीराधायदाह तदेवगीतेन कथयति। रजनीत्यादि। गीतस्यास्य भैरवरागः॥ तल्लक्षणं। सरोवरस्थे
स्फुटिकस्य मंडपे सरोरुहैः शंकरमर्चयंती। तालप्रयोगप्रतिबद्धगीता गौरीतनुर्नारदभैरवीयमिति॥
९४ यतितालश्च। गीतार्थस्तु हरिहरीति खेदे। अथवा। मायायाः कपटरूपायाः धवस्वामिन् ताहृशवचन
स्वभावः॥ अथवा॥ अन्यनायिकानिशि आनंदयितामा तःमा इति माधवेति हे धावन् शीलवनसंभ्रमेण
त्वरया तस्याश्चिह्नज्ञानाभावात्। अथवा मा इति निषेधे त्वं माधवोसि मा स्वामी भवसि मा हि त्वं अन्या
सक्तत्वात् मम स्वामिन्याः स्वामी न भवसि तस्मिन् संबोधने हे माधव मा स्वामिन् अतत्परित्वयाधावात्
याहीत्यर्थः। मद्धताखेदोपि समीचीनो यत्खेदे पि हरिहरिपदोच्चारो भवतीति भावः। हे माधव हे केशव याहि

रजनिजनितगुरुजागरराग कषायितमलसनिमेषं वदति नयनमनुरागमिव स्फुटमुदितरसाभि

याहि इति गच्छ गच्छ॥ कोपावेशेन याहीत्यस्य द्विरुक्तिः माधवेति च चलायां भर्त्तरि ईदृ निवेशं॥१॥ ९४
शं चोपलं युक्तमेवेति भावः समानशीलत्वात्॥ अथवा॥ केशव अन्यकामिनीभोगसुखेन शोते वशी भवती
ति केशव संबोधनं। एवमधिक्षेपे कृते प्यसंतुष्टा केशवेति। केन शोन्यतरस्याः केशः विद्यते यस्य य
स्मिन् वेति प्रशस्ताः कामिन्याकर्षणेन विकीर्णा हि गुंफिता इति केशा वयं ते विस्तार्यंते। गुंफनादिना अन्या
या इति वा केशव संबोधनं। त्वदेकपरायणोहं इति कथयंत माह। केतव वादं मा वद मा कथय। कैतवं तु
वले धूर्त्ते द्यूते इति विश्वः। ननु त्वदर्थमेव खिन्नोस्मीति सक्केन सुखयेत्यत आह। तामिति हे सरसीरुहलो

चन कमलनयन तां नायिकामनुसर अनुगच्छ यातव विषादं दुःखं हरति दूरी करोति। यदर्थं विखिन्नोसित
ये वते दुःखमपनेतु युक्तमहं तु स्वयमेव दुःखितास्मि विषादं कथं हरिष्यामीति भावः। तथा च रात्रिजागरे
णार्द्धमुकुलितरक्तवर्णं त्वन्नयनयोस्तत्कालीसरसीरुहवल्लोचनत्वेन ध्वनितं प्रियाध्यानेन मुद्रणं तद्र
व्यानुरक्तमिति कथितं॥ ध्रुवपदं॥ नन्वहं त्वय्यनुरक्तः कथं ममानुरागस्त्वया अन्यत्र ज्ञातः अत आह र
जनीति। हे कृष्ण तव नयने नेत्रं तदनुरागमिव वदति वारयति। वदसीति पाठे त्वं नयनमनुरागमिव व
दसीत्यर्थः। कीदृशं नयनं रजनिजनितो रात्रिजातो गुरुर्महान् यो जागरस्तेन जनितो यो रागो रक्तता तेन क
षायितमीषद्धोहितं। अत एवालसनिमेषं अलसो मंथरो निमेषः पक्ष्मविन्यासो यस्य तादृशं अन्यो श्र

हरिहरि याहि माधव याहि केशव मा वद कैतववादं तामनुसर सरसीरुहलोचन या तव

पियः किं विहस्तवद्धति सोप्यलसो भवतीति ध्वनितं स्फुटं प्रकटमेव हरति विषादं॥ ध्रुवपदं॥ ॥
उदितः कथितोऽन्यकामिनीविषयशृंगाररसस्याभिनिवेशस्तत्परता येन तादृशं उदितरसस्य उद्रि
क्तरसस्य शृंगाररसस्याभिनिवेशः आग्रहो यस्मिन्निति वा तथा चान्यनायिकाकेलिव्यासंगेन वृथा जाग
रः कारित इति। रागेन क्रोधेन मम मस्ते दोत्कषायितस्य नयनस्य सत्त्वं मम मा ग्रेस्फुटमिति वाकुल्येन त्र
त्वाप्यवहि निर्यातं उदितरसाभिनिवेशमिति चाहरिशाट्ट्रो व्ययखेदवाची॥ कषायितो लोहितश्चेति॥२॥

गी·टी· ननुत्वदन्वेषणार्थं जागरात्तनेत्रयोर्लौहित्यमित्यलं दुःखं कथयेत्यत आह। कज्जलेत्यादि हे कृष्ण त्र

९५ रुणमपि तव दशनवसनमधरस्तव तनोस्त्वच्छरीरस्यानुरूपं योग्यं तनोतीति विस्तारयति। ननु सेत्र्यामाध

रोप्यधुना श्यामइति भावः। कीदृशं॥ कज्जलेनांजनीभूतेन मलिने यो लोचनेने तयोश्चुंबनेन विरचितो

नीलिमा यस्य तादृशं रूपं यस्य तत्तादृशं। चुंबनेलग्नतन्नेत्रांजनेन श्यामीभूतस्त्वदधरएव स्फुटं ने भूर्त्तां

प्रकटयतीति भावः। तदुक्तं गौडेन मेलल्लाटे चुंबनं तत्र कौत्तिमिमिति। कज्जलमलिनेत्यादिना श्वेद

गयी ध्वनिता। अश्वाधरौ तु रदनछदौ दसनवाससी इत्यमरः॥ २॥ किंच। वपुरन्विति। नव वपुः शरीरं रति

कज्जलमलिनविलोचनचुंबनविरचितनीलमरूपं। दशनवसनमरुणं तव कृष्ण तनोति तनो

रनुरूपं॥ २॥ वपुरनुहरति तव स्मरसंगरखरनखरक्षतरेखं॥ मरकतशकलकलितकलधौतलि

जयस्वेलेई दं वपुर्मया जितमिति सुरतविजयपत्रमनुहरति सदृशीकरोति। पेरिचरति जयलेखं॥ ३॥

कीदृशं वपुः स्मरसंगरे ऽनंगरणे खराणां तीक्ष्णानां नखराणां नखानां क्षते राघातिरेखा यस्य तत्तादृशं

। कस्याइव। लेखामरकतशकलेनीलमणिखंडे कलिता निर्मिता या कलधौतलिपिः सुवर्णद्रावाक्षर

विन्यासस्तस्याइवाश्वत्र कृष्णवपुषः श्यामत्वात्तु मरकतशकलसाम्यं सुवर्णस्य च कविसंप्रदाये ऽरुण

त्वेन निरूपितत्वान्नखक्षतस्य तल्लिपिसाम्यं। कलधौतरूप्यहेम्नोः कलधौतकलध्वनाविति विश्वः। शक

लं खंडे त्वेति। पुनर्भवः करूरुह्यो नखो स्त्री नखरो स्त्रियामित्यमरः। संगरोजीकुन्तो युधीतिविश्वः। बर्णाह्

तः स्वस्ति मुखोल्लेखो वाचिकद्वारकं इति हारावली॥ ३॥ ९५

३१

ननु मार्गविस्मरणागच्छतो मेवपुषि वनकंटकादिस्पर्शाद्दिवं दृश्यते नेन तु नखांकमित्यत आह। चरणेति। इ

दं तव हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयांतर्गतस्य नवकिसलयपरिवारं नूतनपल्लवसमृद्धिं। अथवा

पल्लवत्वेनैव नूतनत्वसिद्धेस्तदानवं नव्यमस्त्वेवि दुरितिविश्वकोषात्। श्लाघनीयपल्लवसमृद्धिमित्यर्थः॥

बहिर्वाह्ये दर्शयतीव प्रकटयतीव। कीदृशं हृदयं। चरणकमलाद्दन्यकामिनीपदपद्म गलता स्खलता अल

क्तकेन सिक्तमुक्षितं। अपरोपि वृक्षः सिक्तमूलः सन्पल्लवान्दर्शयतीति ध्वनिः। रूपकालंकारश्चात्र।

अतएव उदारं मनोहरं दर्शनीयमित्यर्थः॥ मदद्रितिवामदत्ता किमपि गोपनीयं नास्तीति भावः। चरण

चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारं। दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरि

वारं॥ ४॥ दशनपदं भवदधरगतं मम जनयति चेतसि खेदं॥ कथयति कथमधुनापि मया सह तव वपुरे

कमलेति सौरभ मदनंतम दनद्रुमेन्यनुरागमूलत्वमलक्तसिक्तमिति शान्ताच्चत्व तदभेदं॥ ५॥

चवृक्षस्य ध्वनितं। क्रोंचारव्यः वं धश्च। तदुक्तं। यो बिम्बादौ हृदिविन्यस्य फलाभ्यां धारयेत्क्वानिस्या। दिपरि

वारः परिकरे समृद्धे वेष्टने पिच्छेनिधरणिः॥ ४॥ ननु तव खेदेन त्वयापि क्वापि हृदये व्याधिविक्रिया जाता क

थमन्यथा कल्प्यते। सत्यं यदि तव मया एकनस्याग्नदानवत्पीरगतक्षतेनेम मवेदनानस्यादित्याह। दश

नेति। भवदधरगतं भवतस्त्वदधरस्थितं कस्याश्चिद्दंतक्षतविक्रमम चेतसि खेदं दुःखं जनयत्युत्पादय

ति। एतच्च तव वपुरधुनापि मया सह कथमभेदं मैक्यं च कथयतीत्यर्थः। अन्यनारीस्पृष्टस्यास्य

याजनकत्वासंभवाद्वपुषोर्भेदोज्ञायते ऽन्योपभोगेन श्मदर्शनादति दुःखेनाक्ष्पन्नं हृदयभेदेनकु

तोवपुषोरैक्यमितिव्यंगेनभेदएवप्रतिपादितइत्यर्थः। प्रसिद्धाभेदकारणनिषेधेभेदकारणस्यविभाव्यमा
नत्वातविभावनालंकारस्तदुक्तंदंडिना। प्रसिद्धहेतुव्यावर्त्यायत्किंचित्कारणांतरं। यत्रस्वाभाविकत्वंवा
९५ विभाव्यंसाविभावनेति॥५॥ मनुतवोपायनार्थंकमलात्रोटनंकृतवतिमय्यपिपद्मकोशाग्रादापतताभ्रमरेण
ममाधरोदष्टोनतुत्वंतत्कृतमित्यतआह। वहिरिवेति। हेकृष्णनूनंनिश्चयेनमनोपिचित्तमपिवहिरिववाह्य
मिवमलिनतरमतिशयेनमलिनंभविष्यति। यद्धायातववपुःश्यामतद्वन्मनोपिभविष्यतीत्यर्थः। ननु
ममंमनोमालिन्यंत्वयाकथंज्ञातमितत्त्वआह। कथमिति। अथेतिप्रश्ने। त्वामेवपुष्पसेपदिनत्वांतर्मलिनं
तदास्मरज्वरदूनंकामसंतापेनदुःखितमतएवानुगतंत्वामनुसृतंमादृशंजनंकथंवंचयसेप्रतार
वहिरिवमलिनतरंतवकृष्णमनोपिभविष्यतिनूनं॥ कथमथवंचयसेजनमनुगतमसमशरज्वर
रयसिश्चारणागतजनवंचनमंतरमालिन्यमंतरेणनसंभवतीतिभावः॥ व्याजेनदंतक्ष दूनं॥६॥ ९६
तादिसंगोपनादितिमलिनोसीत्यपिध्वनितं॥ अथो अप्यर्थेसप्रश्ने मंगलारंभयोरपीतिविश्वः॥ नूनं
मितिशब्दोपादानातउत्प्रेक्षानामायमलंकारस्तदुक्तंदंडिनामन्येकेभ्रुवंप्रायोनूनमित्येवमादिभिः।
उत्प्रेक्षाव्यंजतेशब्दैरिवशब्दोपितादृशइति॥६॥ पूर्वोक्तमेवक्रूरकार्येनापिस्पष्टयति। भ्रमतीति। भवा
न्वनेषुविपिनेषुअवलाकवलायस्त्रीजनग्रासायभ्रमतिपरिभ्रमणंकरोति॥ अत्रास्मिन्नर्थेकिंविचि
त्रेनकिमपीत्यर्थः। अत्रहेतुमाह। प्रथयतीति। पूतनिकैववकसप्रदिताप्रत्नेनैवचधूवन। धेस्त्रीमारणे
तवनिर्दयदयारहितंवालचरित्रंशिशुचेष्टितंप्रथयेतिस्थापयतिशिशुत्वेयेनस्तनदानप्रवृत्ताराक्षसी

हतातस्येदानींकैशोरेमादृशानांकोमलांगीनामबलानांहननेकिंचित्रमितिभावः। अथवा। हेवधूवधनि
र्दयतववालचरित्रंवाल्येपिताडकायाःकंसभगिन्यामारणरूपंचेष्टितंवालचरित्रंकोमलचेष्टांवापूतनि
कैवप्रथयतिविस्तारयतीत्यर्थःस्वार्थेकः। ननुत्वांविहायअन्ययासहममरमणमेवनास्तीतिचेत्तत्रा
ह। भ्रमतीति। हेकृष्णभवान्भवोविविधसंसारोविद्यतेयस्यअतएवअवलाकवलायपरांगनाखंडनाय
वनेषुहृदन्तःकाननेषुभ्रमतिभ्रमणंअटनंकरोति। अथवा। हेवधूवधनिर्दयकिंशास्त्रेणैववधोव
धः। वियोगेनवधोवधोनभवतिअपितुभवत्येव। किमत्रवियोगवधेविचित्रंविलक्षणंवधसममेवेत्यर्थः
॥ वनेषुअवलाकवलायअन्यनायिकावशीकारायभ्रमतिभ्रमणंकरोति॥ अतेममाग्रेविचित्रंनाना
भ्रमतिभवानवलाकवलायवनेषुकिमत्रविचित्रं॥ प्रथयतिपूतनिकैववधूवधनिर्दयवालचरित्रं
वाकूपाटवंयथास्यात्तथाकिमर्थंपूतनिकाएवअन्यासुनलंपटइतिस्वप्रभुद्रुताएवप्रथयति ॥७॥
विस्तारयतिभवान्। एवंकृतःभवानविहरणावधूयाश्चंदतस्याःवधेनत्यागेननिर्दयंवालवच्चारित्रंच
प्रथयतिविख्यातंकरोतिवालोयथाअकस्मातदृथावधपरोभवतितथाभवानित्यर्थः। अथवावा
लवतअचतुरवद्यथाभवतितथाचरित्रंप्रथयतिविस्तारयंभवान्तरवालवत्तातवेत्यर्थः। किंपूत
ननकैवपशुहैवनिपुणतेवअयतुननिपुणतेत्यर्थः। खंडिताचेयंनायिकातदुक्तंनरतेनिद्राकषा
यकलुषीकृतताम्रनेत्रोनारीनखव्रणविशेषविचित्रितांगः। यस्याःकुतोपिगृहमेतिपतिःप्रभातेसा
खंडितेतिकथिताकविभिःपुराणैरिति॥७॥ ॥श्री जयदेवेति। हेविबुधाःकृष्णमाधुर्यरसास्वादपरि

ता:इदानीं श्रीजयदेवभणितं वर्णितं रतिवंचितासंभोगरहिता उत्कलता युवतिः कांता तस्या विला
पः परिदेवनं शृणुत आकर्णयत कीदृशं सुधातोपि मधुरं तत्र हेतुमाह विबुधालयतोपि स्वर्गा
दपि दुःप्रापं तत्रापि दुर्लभमित्यर्थः॥ उक्तं च॥ तस्यैव देवता:प्रपततेतकोविदो नप्यतेयच्चमतामु
पर्यधइतितवकथामृतमित्यादिना च श्रीभागवते॥ अथवा॥ सर्वशास्त्रप्रतिसिद्धमिदं॥ निःसीमप्रे
मरसालवनः श्रीब्रजराजनंदनः प्रियजनसमुदायेषु श्रीगोपिकाएव तेन तेन विबुधश्रेष्ठा वैकुंठ
वासिस्तेषामालयं वैकुंठादयं तत्रापि दुःप्रापमित्यर्थः॥ तदुक्तं श्रीभागवते॥ नायंश्रियोंगइत्यादि
यद्वांछया श्रीललनाचरन्तपइत्यादि विबुधः पंडिते देवइति विश्वः पक्षांतरे॥ रतिरनुरागः वंचित्य

श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापं॥ शृणुतसुधामधुरं विबुधालयतोपि

विप्रलंभाख्यो भावविशेषस्तेन वंचिता छलिता या खंडिता न तु वस्तुतस्तस्याः वि दुरापं॥८॥॥
लापमित्यर्थः अथवा॥ रतौ वंचितासो अधरादौ खंडिता च युवतिस्तस्याः विलापं संभोगादिषु छ
लेनाधरादिखंडनेन शुष्कक्रंदनयाह्नीति॥ यत्तु कीदृशं॥ सुधातोपि मधुरं अमृतादपि स्वादु॥ अतएव
व विबुधालयतोपि दुरापमिति तदानन्तुकामेन खिन्नास्मि याहि याहीति माधव॥ संभोगार्थमनुसरामी
तिततत्राह॥ माधव कैतववादमिति मम मेछानास्ति तामनुसरेत्यादि चेराधोक्तिः॥ ननु रजनिजनितलव

नयनंकरयोर्वितिमुरागवहतिकुंठ्यामिप्रमताराप्रेमितिकृष्णाः॥
ननुतवपुण्यसुकामंमयपहयामितिकरूजा॥
२७

लमलिनेत्यादि॥ अतएव तव वपुरित्यादिनवकिंत्राजयपरिवारमितिपर्यंतं पुनः राधायाः॥ अथकृष्णस्य
॥ एवमेवत्वनु॥ नामप्रियायमद्यंदीयतां रतोन्मवं मेमत्वादितिकृष्णेकथयति॥ नहि मयासहत्तएव ऐक्य
मतआह॥ दृशा न पदमिति॥ त्वयाममऐकाय रिनस्यात्॥ तदा तवपुरनेदं कथं कथयसीत्यर्थः॥ भ्रमनु
नरपितदेवकामयसे॥ अनुगतं जनं॥ असमन्नारज्वरहूनंन स्वक्षततापनं पीडितं॥ अथानंतरं वंचय
सेछलयसीत्यर्थः अतोनूनं वहिरित्यादिनिर्दयबालचरित्रमितिपर्यंतं श्रीराधायाउक्तिः एवमन्योन्यं॥ ए
वमन्योन्यं विविधहावभावादिभिनागिरमोस्योरतिरसेनाक्रांतयोः संभोगे एवनमादि गोष्टी अनयाष्टपद्या
महाकविना निरूपिता॥ वक्तीति च॥ अधरसुधापानं कथानमन्निरित्यादि॥ एवं तवेदमप्यग्निमं पद्यं संग
छतइतिज्ञेयं॥ तच्च प्रणयनरतंगेनतरंगेण हासेनेत्यर्थः॥ सुरतानुरागप्रकटनेन सरतीत्योलज्जानो
गातिन्नायेन सुकुमारांग्या मेचीडया चञ्चोकमित्यर्थः॥ ना॥ तदेवमिति॥ हे कितव धूर्त त्वादालोकत्वदर्श
नं प्रख्यातः प्रसिद्धोयः प्रणयन्नरीनुरागातिन्नायस्तस्य तंगेन नान्नीनहेतुनाशोकादपि किमप्यनिर्वचनी
यां लज्जां जनयति त्वणेकं तु जनयत्येव परं तु शोकादपि लज्जां गुर्वीमुत्पादयतीत्यर्थः॥ तथाच॥ प्रीतोसत्वां
परमानंदजनकत्वमिदानीं तदभावाछोकजनकत्वमेव त्वदालोकस्येति भावः॥ कीदृशपामेतवहृदंप्रत्य
क्षं हृदयं पश्यंत्याः कीदृशं प्रियायदाजकेन प्रियायाश्चरणासंबंधियावकेनव्यासं॥ अतएवारुणछा
यादी प्रियस्येतादृशं॥ अरुणद्योतिइतिपाठे॥ अरुणः संध्यारागस्तद्वत् द्योतितुंशीलमस्यास्तीत्यरु

एणद्योतिएता दृत्रां॥ कमिव॥ बहिः प्रसरदनुरागमिव हृदयं हरिहृदयाधिकात् बहिर्निःसृतं प्रेमेव विपक्षयुवति
परिहासर्सकथानोकादपिमे ऽधिकालज्जा न भवतीति भावः प्रसरदनुरागमिवेत्युत्प्रेक्षालंकारः छायास्तथाप्रि
८८ याकांतिरिति चारुणः संध्यारागेस्यादरुंसारथौजोहितेपिच॥५६॥ इदानीं सर्गांते कविर्मंगलमाचरति॥
चंतमोहि नेति कंसरिपोः श्री कृष्णस्य वंशीरवः मुरलिकानादः वो युष्माकं श्रेयांसि कल्याणानि व्यपोहय
तुददातु॥ कल्याणदातृत्व सामर्थ्यकथनायात्र कंसरिपुपदोपादानं किंलक्षणः॥ कुरंगीदृशां हरिणीतेक

तदेवं पत्रंपस्याः प्रसरदनुरागं बहिरिव प्रियापादाजक्तछुरितमरुणछाय हृदयं॥ ममाद्य प्रख्यात
प्रणयभरभंगेन कितव त्वदालोकः शोकादपि किमपि लज्जां जनयति॥५६॥ चंतमोहि नमौलि
घूर्णनमिलत् मंदारविस्रंसनस्तब्धाकर्षणदृष्टिहर्षणमहामंत्रः कुरंगीदृशां॥ दृप्यद्दानव दूय
मानदिविषत् दुर्वारदुःखापदां भ्रंशः कंसरिपो व्यपोहयतु वः श्रेयांसि वंशीरवः॥५७॥ ॥इति
श्रीगीतगोविंदे खंडितावर्णने विलक्षलक्ष्मीपतिर्नामाष्टमः सर्गः॥८॥ णीनेत्राणां चंतमोहितंम
नोमोहः मौलिघूर्णनं तस्मादप्रत्रंसार्थं शिरश्चालनं मिलन्मंदारस्य पारिजातपुष्पस्य विस्रंसनमधःपातनं ८८
स्तब्धाकर्षणं स्तब्धानां मानिनीनामपि वशीकरणं दृष्टिहर्षणं नेत्रोत्साह श्रवणानिर्हन्यानेत्रविकारोत्त
वति इत्यादिकर्मसाधने महामंत्रः पुनः किंलक्षणः दृप्यद्भिर्दर्पयुक्तैर्दानवैर्दैत्यैर्दूयमानानामुपत

प्यमानानां दिविषदां देवानां दुर्वाराश्चानिवार्याः दुःखापदो दुःखसाधनीभूताः विपत्तयस्तासां भ्रंशोनाशकः यच्छ्र
वणेन देवा दैत्यपीडनयात्र मुक्ता भवंतीति भावः अनेनापि सामर्थ्यलक्षणो नायकउक्तः॥ तथाच देवादीनां
विजासमाधको यस्य वेणुध्वनिः किंवक्तव्यं तस्य पुरुषोत्तमस्य विलासित्वमिति भावः॥५७॥ ॥इति श्रीगी
तगोविंदटीकायां खंडितावर्णने विलक्षणलक्ष्मीपतिर्नामाष्टमः सर्गः॥८॥ ॥विलक्षणलक्ष्मीश्रीराधि
कस्याः पतिर्वल्लभः श्रीकृष्णो वर्णितो यत्रेत्यर्थः॥ प्रणयकोपात्कृरिमधिक्षिप्येदानीं कृतपश्चात्तापां स
खी आह॥ तामिति॥ अथवाष्टौ मंगलार्थं च्यानंतप्यवितानां कलहांतरितानां परुषवचनकथनानंतरं कृतप
श्चात्तापां श्रीराधां रहएकांते सखी राधामोहनयोः प्रेमकलहनिवारिणी हितोपदेष्ट्री राधायाउवाच कथि
तवती॥ कीदृशीं मन्मथखिन्नां मन्मथेन खिन्नां दुःखितां॥ अंतएव रतिरसेन शृंगाररसेन भिन्नांसंगतां॥
रतिरसेन संभोगरागेण भिन्नां विदारितांतःकरणां वा॥ अतएव विषादसंपन्नां उद्वेगसहितां अतएवा
नुवारंवारं चिंतितं स्मृतं हरेश्चरितं पुराविलसितं तत्कालीनविनयं तापयातां कलहांतरितां चेयं नायि
का॥ तदुक्तं भरतेन॥ प्राणेश्वरं प्रणयकोपभरेण नीतं या चाटुकारमचिरादवधीर्यपश्चात्॥ संतप्य
ते मदनवह्निशिखासहस्रैर्घण्याकुजातुकलहांतरिता तु मास्यादिति॥ भिन्नमन्यार्थसंगतेवचने दारितेस्फु
टेइति विश्वः॥५८॥ तदेव गीतेन कथयति॥ हरिरिति॥ गीतस्यास्य गुर्जरीरागः॥ यतिताजः॥ गीतार्थ
स्तु॥ अयेइति संबोधनं हे मानिनि मानवति माधवे श्रीकृष्णे मानं माकुरु॥ अथवा॥ अयेइति सुनावह

विधेऽप्रियसंगमलक्षणे इतियावत्तन्निमित्तसप्तमीयं॥ संभोगार्थविर्जवकरंमानंमाकुथा इत्यर्थः॥ माध
वपदेनापिमाधवोपिलामेवंप्रसादयत्ततोमानंमाकुर्विति ध्वनितं॥ अथवामाधवेवसंतोचितसर्वशृंगा
१८ रयुक्तेश्रीकृष्णेमानंतन्निमित्तंविलंबंमाकुरुनकरणीयमित्यर्थः॥ अथवामायायाः कृपायाः धवेस्वा
मिनि कृपासागरे कृपापात्रेवामानंनोचितमित्यर्थः॥ अथवा॥ मासनेत्कृष्णाउत्तमालक्ष्मीत्वंचतस्याच
धवेस्वामिनित्वांप्रतिधावनसीलेवामानमनुचितमेव॥ अथवा॥ हेमानिनिमानप्रदेमाधवे त्वयिकृपाप

तामथमन्मथखिन्नांरतिरसभिन्नांविषादसंपन्नां॥ अनुचिंतितहरिचरितांकलहांतरितामुवाच
रहःसखी॥ पद॥ हरिरभिसरतिवहतिमधुपवने॥ किंमपरमधिकसुखंसखिभवने॥१॥ माध
वेमाकुरुमानिनिमानमये॥ ध्रुपदं॥ रेत्वमपिमाकृपाकुरुकृपापरात्नवे त्यर्थः॥ कीदृशोमाधवे १८
मानमयेत्वांमाननायप्रचुरेत्वरायुक्तेमानमयेत्वांमानयितुंश्रीलेवामानंदातुंयोग्येवा॥ अथवा॥ हेमा
निनिप्रियेगृहाणतेमानंदातुंयोग्येमानयेमानप्रचुरेउत्तमपिराधासंबोधनं॥ माधवेकृपापात्रेमाकृ
पाकुरुसर्वथाश्रीकृष्णस्त्वांप्रत्यागतस्त्वयामाननीयआदरणीय इतिभावः॥ ध्रुवपदं॥ मधुपवनेवसं
तवायौवहतिसति॥ हरिःकृष्णोभिसरतिस्वयमायाति॥ हेसखिसख्यत्वगुणेतेअवंचनशीलेवा॥ भुवने
वैकुंठलोकेलक्ष्म्यादिभिःकिमतःपरंउत्कृष्टंसुखमनुभूपतेनकिंचिदपीत्यर्थः॥ तवान्निनारण्यप्रणा
भुवनेत्रैलोक्ये॥ अपरंकृष्णाभिसरणात्॥ अन्यत्किंउत्कृष्टंसुखंअपितुनकिंचिदित्यर्थः॥ अथवा॥ २

तइतिहरिपदेनकथितं॥ भवनेइतिपाठेस्वकुंजेतंप्रियंविनावियोगप्रदेकिमधिकंसुखमस्तियदत्रास्थितास
तिप्रियादरंनकुरुषेत्यर्थः॥ नेत्यदितहिविदलमेवात्रानयामीतिभावः भवनेसुखात्राभ्य भवनीतिभवनेनिकुंजमं
दिरंपरमसुखरूपंतत्रस्थाभवतिअतःपरंसुखंकिमधिकंअतएवहरिरपितवभवनेअभिसरतिआयातिस
वैसख्येतिअयमेवाधिकतरमितिभावः॥१॥ अपिच॥ तालेति॥ कुचकलशौतालफलादपिगुरुतरौकिंकिमर्थंविफली
कुरुषेनिष्फलंकरोषि॥ कृष्णकरार्पणादेवकुचकलशयोःसाफल्यंतदभावेवैफल्यमितिभावः॥ अतिसर
सं॥ अतिशयेनशृंगाररससहितं यथाचातिविमर्देनैवतालफलंस्वरसप्रदंभवति॥ तथैवत्राप्यतिविमर्दे

तालफलादपिगुरुमतिसरसं॥ किंविफलीकुरुषेकुचकलशं॥२॥ ॥

नशृंगाररसोद्भवोभवतीतिध्वनितं॥ तथाच॥ अपरोपिकलशोरसोज्ज्वलंनसहितःमंगलायप्रियजनागमेत
त्करेप्यर्तिं॥ तोस्मिन्नवसरेत्वयाप्येवंकर्तव्यमितिभावः॥ अथवा॥ गृहाणतेप्रियतमेसर्वस्वमेवार्पतेत्वंकिंना
र्पयसीत्याह॥ हेराधेकुचकलशौकांचनकलशरूपंप्रियागमनेमंगलवस्तुत्वमितिवातंकिंकिमर्थंप्रिय
पूर्णंविनाविफलीकुरुषेउपायनमिवअग्रेधृत्वासफलीकुरुश्रीफलवत्अर्पयेत्यर्थः यथाकश्चितत्तम
हत्तरिआगतेसतिश्रीफलंअग्रेधृत्वामिलनंकरोति॥ तथैवत्वमपिकुचकलशौतदुपरिस्थितस्यअग्र
भोगंश्रीफलतुल्यंअर्पयित्वामिलनंकुर्विति भावः॥२॥ ननुपदाहरिरागतस्तदात्वयानकथितमित्याह

दृयमिवक्ष्यमाणं मद्वचनं शृणु कीदृशं चानीहितो नाकांक्षितो भेदो वैरस्यं यत्र तादृशं॥ युवयोर्हितकारिण मित्यर्थः॥ अथवा॥ मयासत्यं नाकलितं भेदं यथास्यादेवं मम वचनं शृणु॥ इयं मम सखी मत्तोऽभिन्ना मद भिष्टं न वदिष्यतीति बुध्या मद्वचनं शृण्विति भावः॥ अथवा॥ प्रियमसि मम मनसि वा गुरु खेदं बहुदुःखं किमिति किमर्थं जनयसि गृहागतं मां इयं त्यजतीति तस्य दुःखं भवति मम वाक्यं नावधारितमिति ममापि दुःखं भवति एवं नोचितमित्यर्थः॥ अत एव मम वचनं अनीहितभेदं न ईहितं भेदचेष्टितं येन तत्तन्नव मम तस्यापि दुःखं नीत्यद्य तेन मम वाक्यं शृणु कर्णं दित्वा अवधानं कुर्वित्यर्थः॥६॥ तदेवाह हरिरिति

जनयसि मनसि किमिति गुरुखेदं॥ शृणु मम वचनमनीहितभेदं॥६॥
हरिरुपयातु वदतु बहुमधुरं॥ किमिति करोषि हृदयमतिविधुरं॥७॥

॥ हरिः वियोगदुःखं अन्यनायिकासंगजन्यदुःखं वा हरतीति॥ किंचिन्मात्रमपि अतिस्वल्पमपि करोषि वा का सुन्दर स्मितदातव हृत्तवाभिप्रायः प्रकटीभविष्यतीति भावेन॥ श्रीकृष्ण उपयातु तव दंतिकं गच्छतु बहु मधुरं अतिसरसं यथा स्यात् एवं वदतु अधिकं चाटु वदत्विति वा॥ एवं सति स्वकीयं हृदयं अतिविधुरं विकलं किमिति करोषि अथवा॥ तवान्नाचेद्धरिः तव विषादहृन्नासि नूउपयाति त्वायेन वियोगदुःखे संयोगे सति समीपे यातु त्वां प्राप्नोतु इति बहु मधुरं एवं बहूनां सखीजनानां मिष्टं वाक्यं वदतु मौनं त्यक्त्वा ब्रवीतु

वाक्येनैव हृदयं हा हा अतिविधुरं भवति अतिशयेन तत्रापि विशेषेण बहुमधुरं मकरं मौनेन च अतिभ्राम्यो न तापयते इति कारणान् वद इति भावः॥७॥ श्रीजयदेवेति॥ श्रीजयदेवभणितं हरिचरितं श्रीकृष्णस्य चरितं रसिकजनं भक्तिविशेषरसास्वादचतुरं भक्तजनं सुखयतु आनंदयतु॥ उक्तं च॥ शृंगारप्रचुरा चेष्टा यत्र तल्ललितं विदुरिति॥ अथवा॥ श्रीजयदेवभणितं इति पूर्वोक्तं राधासख्या प्रश्नान्नयापरितमिति॥ अत एव॥ ललितमिति मनोहरं हरिचरितं कुंजद्वारि सविनयं कृतापराधं स्थितं हरिं तादृशं चरितं सख्या उक्तं श्रीराधां प्रति रसिकजनं श्रीराधाधीनं कृष्णं श्रुत्वा रसमानितं दोषग्राहयितं रसिकं सुखयतु इदमेव परमसुखं सुखश्रवणकीर्तनाईना

श्रीजयदेवभणितमतिललितं॥ सुखयतु रसिकजनं हरिचरितं॥८॥१७॥

न्यदिति सुखानुभवतु॥ अथवा इति श्रीजयदेवेन भणितं इत्यादि किं ललितं श्रीराधां प्रति भणितं हरिचरितं हयचिरणं सख्यागीतं श्रीराधामप्येतत् रसिकजनं श्रीराधालक्षणं सुखयतु श्रीकृष्णसन्मुखीभूत्वा श्रीकृष्णसमागमानंदं अनुभवतु युवयोः समागमसुखमेव रसिकानां परमसुखमिति भावः॥८॥ किं चामीतमद्विमुखा सर्वं दुःखं च अनुभवसि॥ अतः सन्मुखीभव त्वां न्यायेनोपदिशामि॥ अथवा विपरीताचरणेन विपरीतमेव सात इत्याह॥ स्निग्धेति॥ हे विपरीतकारिणि विपर्ययविधायिनीति संबोधनं॥ भक्तो हे नीस्त्वयि एतत्सर्वं युक्तमेव तथा च॥ यः परस्मिन् विपरीतमाचरति तस्य सर्वं विपरीतमेव भवति॥ किं तत्॥ तव श्रीखंडचर्चा वि

यंचंदनाद्युलेपोविषमिवसंतापजनकोभवति॥ अथचत्रीनांशुश्चंद्रस्तपनः सूर्यः शीतलस्वभावोपितापमाचरति॥ हिमंतुषारोपिहुतवहोग्निरिवदाहकोभवतिक्रीडामुदः केलिप्रमोदाःयातनास्तीव्रवेदनाइवभवंतियद्यतःस्निग्धेतस्मिन्प्रियेमधुरवचनैःस्नेहंप्रकाशयतिसतिपरुषासिनिष्ठुरभाषिण्यसियच्चप्रणमतितस्मिंस्त्वंद्वेषस्थासिद्वेषमेवलंबस्थितासियच्चोत्सुकेउन्मुखेआलिंगनायसन्मुखेतस्मिन्त्वंविमुखतांयासिपराङ्मुखतांगतासियातनातीव्रवेदनेत्यमरः॥ विरोधालंकारः शार्दूलविक्रीडितंवृत्तं॥५९॥ सर्गांतेकविर्मंगलमाचरति॥ सांद्रेति॥ वयंश्रीगोविंदस्यपदारविंदंचरणकमलंवंदामहेनमस्कुर्महे॥ किम

स्निग्धेपत्यरुषासियत्प्रणमतिस्तब्धासियद्रागिणि द्वेषस्थासियदुन्मुखेविमुखतांयातासितस्मिन्प्रिये॥ तद्युक्तंविपरीतकारिणितवश्रीखंडचर्चाविषंशीतांशुस्तपनोहिमंहुतवहःक्रीडामुदोयातनाः॥५९॥

र्थं॥ अस्मन्नमस्कारायनक्तिप्रतिबंधकदुरितस्यनाशायतादर्थ्येचतुर्थी॥ वक्तृवचनंत्रिष्वाद्यत्रिप्रायेणदुरितनाशनसामर्थ्यंद्योतयति॥ स्वच्छंदमिति॥ किंविशिष्टं॥ स्वच्छंदंयथास्यात्तथाऽवमकरंदवत्सुंदरंचयथास्यात्तथागलत्याप्रस्रवंत्यामंदाकिन्यागंगायामेदुरंस्निग्धंतत्तथा॥ तथाच॥ तथाच॥ यस्मान्निःसृतागंगाजगत्पुनातिइतिकिंवक्तव्यंतस्यसामर्थ्यमितिभावः॥ अरविंदंहिमकरंदोभवतितेनमंदाकिनीउपमीयते॥ इत्युपमालंकारः॥ पुनःकिंभूतं॥ सांद्रोनिविडोआनंदोहर्षोयेषांतेपुरंदरादयइंद्रादयोदिविसीदंतीतिदि

१०२

दिविषदोदेवास्तेषांवृंदैः॥ समूहैरमंदादत्यादराधिकादरान्नम्रैः समंतात्कायादिनानतिपुक्तैर्मुकुटैरिंद्रनीलमणिभिः संदर्शितैः इंदिरानाममरायस्मिंस्तत्ताहृशं॥ अनेननमस्करणीयत्वंकथितं॥ अत्रचरणस्यकमलोपमामंदाकिन्याः मकरंदोपमासुरवृंदमौलिनीलमणीनांभृंगोपमा॥ एवंपरंपरारूपकताचरणस्य॥ तथाचात्रमंदाकिनीपदेनव्यापकत्वंदोपमासुरवृंदमौलि[illegible]याविरतप्रवाहरूपकत्वात्तच्चभगवतःपदोर्वर्णने॥६०॥ इतिश्रीगीतगोविंदेकल्पहांतरितावर्णनेमंदमुकुंदोनामनवमःसर्गः॥९॥ मंदोत्सवोमंदोयत्रवान्वा॥ श्रीराधायाः प्रेमकलहवाकोमतिरस्कृतत्वात्मंदाउच्छिरःमुकुंदसख्यामूकत्वंकुंदितंहूरीकृतंयेनस

सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिःसंदर्शितेंदिंदिरं॥ स्वच्छंदंमकरंदसुंदरगलन्मंदाकिनीमेदुरंश्रीगोविंदपदारविंदमशुभस्कंदायवंदामहे॥६०॥ ॥ इतिश्रीगीतगोविंदेकलहांतरितावर्णनेमंदमुकुंदोनामनवमःसर्गः॥९॥

वर्णितोयत्र अथवा॥ श्रीराधायाः प्रेमकलहवाक्योनमूकत्वंदत्तंयस्यसमुकुंदोवर्णितोयत्र॥ अथवा॥ सखावोधितत्वात्स्वयंमौनत्वेनशृणोतीतिमूकत्वेनमूकत्वेनमुकुंदपदोपादानं॥ इदानींसखावोधितांमानिनींस्वयमनुनयति॥ अत्रांतरइत्यादिना॥ अत्रांतरेऽस्मिन्नवसरेप्रदोषेनिशामुखेहरिः कृष्णःसुमुखीसुंदराननांकिंचित्कोपभ्रमेणप्रसन्नवदनामित्यर्थः श्रीराधामुपेत्यसमीपंगत्वासानंदगद्गदंआनंदेनगद्गदक्षरवाक्सहितंयथास्यात्तथा

 इतिवक्ष्यमाणमुवाचकीदृशींमसृणरोषवशांस्निग्धकोपयुक्तांसखीवचनैःकिंचिन्नमितरोषामित्यर्थः॥पु
नःकिंभूतां॥असीमनिरपारैर्निःश्वासैःनिःसहांविरहदुःखसहनाक्षमांमुखंयस्यास्तांसव्रीडंसलज्जंयथास्यादे
१०३ वंईक्षितेसख्याःवदनंमुखं॥ययातां॥अथवोप्रातःकालीनोहरिरगतःसायंकालोजातस्तथापिनमानंमुंच
ति॥तदाहरिस्तस्याःमानहारकःश्रीकृष्णःस्वयमेवइत्युवाचवक्ष्यमाणंविनयवाक्यमाहअनुनयचतुरत्वादि
तिपद्यपादानां॥६१॥तदेवगीतेनकथयतिवदसीत्यादि॥गीतस्यास्यदेशवराडीरागः॥अष्टतालीतालः॥रागल

अत्रांतरेमसृणरोषवशामसीमनिःश्वासनिःसहमुखींसुमुखीमुपेत्य॥सव्रीडमीक्षितसखीवदनं
दिनांतेसानंदगद्गदपदंहरिरित्युवाच॥६१॥वदसियदिकिंचिदपिदंतरुचिकौमुदीहरतिदरतिमि
रमतिघोरंस्फुरदधरसीधवेतववदनचंद्रमारोचयतिलोचनचकोरं॥१॥प्रियेचारुशीलेमुंचमयिमा
नमनिदानं॥सपदिमदनानलोदहतिममामानसंदेहिमुखकमलमधुपानं॥ ॥ध्रुवपदं॥ ॥ १०३

क्षणंतु॥आरब्धगमंनमुद्रानिद्राघूर्णयमाननयनयुग्मादा॥सुखशायिनीनिजदयितेदेशवराडीनवेक्षो
रिति॥लघुर्द्रुतौलघुश्चैवत्यष्टोष्टतालीप्रकीर्तितेति॥गीतार्थस्तु॥हेप्रियेप्राणवल्लभेश्रीराधेचारुमनोह
रंशीलंयस्यास्तादृशेत्वंमयिमद्विषयेअनिदानंअकारणंअन्यनायिकासंभोगकारणरहितंमानंमुंच
त्यजननुमन्मानकृतेतवकाहानिर्जाताअतआह॥सपदीति॥सपदितन्मानसमकालएवमदनानजः॥

कामाग्निःममामानसंदहतितापयति॥अतोमानत्यागस्यकावार्ताकिंतुमुखकमलमधुपानंदेहि॥मुखमेव
यत्कमलंतत्संबंधियन्मधुस्तोत्यादितास्वित्रामनायतत्पानंदेहीति॥अनेनमानेनसंमुखंपत्रपंत्याःमुखाव
लोकंयाचितं॥अथवा॥चारुशीलेमयिसदेकनिष्ठस्नताविइति॥अतएवअकारणंमानंमुंचेत्यर्थः॥अत
ःपानंदेहीत्युक्तं॥त्वांप्रतियाचते॥सपदिशीघ्रंमुखकमलमधुपानंमुखपअनिःस्तवचनामृतपानंदेहि
॥अत्यादरश्रवणंपानमुच्यते॥अतःपानंदेहीत्युक्तं॥मुखकमलमधुपानमधरामृतंवा॥ध्रुवपदं॥अपि
च॥हेप्रियेत्वंयदिकिंचिदपिप्रियासिप्रियनिरपेक्षंस्वल्पमपिवदसिवक्षि॥तदादंतरुचिकौमुदीतवद
शनानांयादीप्तिःसेवकौमुदीचंद्रज्योत्स्नसाअतिघोरमतिभीमंदरतिमिरंदरःसाध्वसमसएवांधकारस्तद्ध
तिदूरीकरोति॥अपिच॥तववदनंचंद्रमाइवसःस्फुरदधरसीधवेप्रकाशमानाऽधरामृतार्थंममलोच
नचकोरंचक्षुःपक्षिविशेषंरोचयतिसाभिलाषंकरोति॥सीधवेप्रकाशमानाऽधरामृतार्थंममलोच
नचकोरंचक्षुःपक्षिविशेषंरोचयतिसाभिलाषंकरोति॥सीधवइतिनादर्थ्येचतुर्थीअनेनचंद्रमसः
नत्वमिजनत्वमितिकथितं॥लोचनयोश्चकोरत्वेनतदेकजीवनतयातद्धानत्वंचेतिध्वनितं॥अपिच
॥नयनयोअधरपानेछयातद्धर्मधृपयेनाधरसुधाअद्भुतमाधुर्यभरोनिरूपितः॥१॥मयारोषप्रकट
यतीमाह॥सत्यमिति॥हेसुदतिशोभनदशनेत्वंसत्यमेवयथार्थमेवयदिमयिकोपवत्यसिकोपवत्य
सितदाखरास्तीक्ष्णायेनखराःएवशराःवाणास्तैर्घातिंप्रहारंदेहि॥तेनापिचेन्नतुष्यतितदाभुजबंध

 नंबाहुभ्यांबंधनंघटय॥ तेनाप्यसंतोषेरदखंडनंरदैर्दंशनैरधरेक्षतंजनय येनवा सुखजातंसुखसमू
हो भवतितदेवकुरु॥ इतिरहस्योपदेशश्चकथित॥ तथामप्यपराधानुरूपंदंडंविधायकोपंमुंचेतिभा
 वः भ्रमूणांहिसापराधेभुजनेषु ताडनबंधनखंडनादयोदंडाः समुचिताः अत्रैतद्व्याजेननखक्षतालिं
गनचुंबनादीन्प्रार्थयते॥ २॥ ननुयातवप्रियासादंडंविधातुकिंमयाः तत्राह॥ त्वमसीति॥ त्वंममजी
वनमसि॥ त्वयिविषण्णायांममविषादोभवतीतिप्रसन्नायांप्रसादइतित्वमेवममजीवनमतोजीवना

सत्यमेवासियदिसुदतिमयिकोपिनीदेहिखरनखरशरघातं॥ घटयभुजबंधनंजनयरदखंडनं
येनवाभवतिसुखजातं॥ २॥ त्वमसिममजीवनंत्वमसिममभूषणं॥ त्वमसिममभवजलधिरत्नं
॥ भवतुभवतीहमयिसततमनुरोधिनीतत्रममहृदयमतियत्नं॥ ३॥

दन्यत्किंप्रियेभवत्यतस्त्व
मेवममवध्यमेतिभावः॥ त्वंममभूषणमलंकरणमसिगौरांगी त्वांविनाश्यामशरीरस्यमेकेनापिभूष
णेनवतीत्यर्थः॥ अनेनापिव्याजेनालिंगनंयाचते॥ भवजलधौगोपजन्मजलधौवततरूपेरत्नाकरेत्वमे
वममरत्नमसियथाऽन्योरत्नाकरेप्रविश्यपरिश्रांतः कश्चिद्रत्नलब्धापूर्णोभवतितथाहमप्यस्मिन्व्रजे
त्वांस्त्रीरत्नंप्राप्यकृतार्थोस्मीतिभावः॥ अनेनस्वस्यगोपकुलउद्भवंबहुमानयतिजन्मसाफल्यमप्ये
तावदेवेतिध्वनितं॥ तथाचसमुद्रस्थानीयंव्रजंव्रजांगनारत्नानिमहारत्नंश्रीराधिकैवेतिच॥ जातोजातो

यदुत्कृष्टंतद्धिरत्नंप्रचक्षतेइत्युक्तेः उपसंहरतिभवत्विति॥ इहभवर्णेमयिभवतीसततंसर्वदानुरोधिनी
अनुकूलाभवतुतत्रतदनुकूलतायांममहृदयमंतःकरणमनुदायोतियत्नंअतिशयितप्रयत्नवत्त्वदा
राधनप्रयत्नयुक्तमस्तीत्यर्थः॥ अनुरोधेऽनुवर्तननिमित्यर्थः॥ ३॥ नीलनलिनेत्यादि॥ हेतन्वि कृशांगी॥ नी
लनलिनस्यनीलोत्पलस्येवाभाकांतिर्यस्यएतादृशंतवलोचनंकोकनदरूपं॥ रक्तोत्पलसौंदर्यंधारय
तिबिभर्त्ति॥ यदिचकुसुमशरः कामस्तस्यबाणभावेनबाणत्वेनतद्बाणाभिप्रायेणवाइदंकृष्णंचक्षुरनुरं
जयसिरक्तंकरोषिएतस्यचक्षुषोनुरूपंयोग्यंभवति॥ मन्मथशरमथितमानसानांरमणीनांनेत्राणिलो

नीलनलिनाभमपितन्वितवलोचनंधारयतिकोकनदरूपं॥ कुसुमशरबाणभावेनयदिरंजय
सिकृष्णमिदमेतदनुरूपं॥ ४॥ स्फुरतुकुचकुंभयोरुपरिमणिमंजरीरंजयतुतवहृदयदेशं॥ र
सतुरसनापितवघनजघनमंडलेघोषयतुमन्मथनिदेशं॥ ५॥

हितानिभवंति॥ बाणत्वेनचशरा
हिसततंपरमर्मभेदिनोरुधिराक्तत्वेनरक्ताभवंति॥ रोषंत्यक्त्वासंतोषाभिप्रायेण॥ लोचनमनुरंजये
तिउचितमितिभावः॥ तन्व्यंगीतिसंबोधनेनापिकृशांग्यास्तवरोषोनोचितइतिध्वनितं॥ अथवा॥ कुसु
मशरबाणः कटाक्षस्तेनयोभावः शृंगाररसस्यानुभावस्तेनस्निग्धकटाक्षावलोकनेनेत्यर्थः॥ श्यामोलोहि
तापादनसमर्थयास्तेममरंजनंयुक्तमेवेतिभावः॥ ४॥ किंचित्प्रसन्नांवीक्ष्याहास्फुरत्विति॥ मणिमंजरी

गी॰ टी॰ हारलताकुचकुंभयोः कुचकलशयोरुपरि स्फुरतु चंचलाभवतु॥ तव हृदयदेशं वक्षःप्रदेशं रंजयतु र
श्मिभिः शोभयतु॥ तव नयननलिनं रक्तं तो धत्ते त्वं च हृदयं मे मां रंजयसि॥ अतो मणिमंजर्यापि तव वक्षोपि दिरं
१०५ जयतितरां बहुरूपं भवतीति भावः॥ अत्र स्मरकेलिं कर्म्मारंभे मंजरीयुक्तकरणकिंकिणीस्थापनं मंगलार्थमेवे
ति सूचनाय कुचयोः कलशत्वेन मणिहारस्य मंजरीत्वेन निरूपणं युक्तमेव कृतं॥ अपि च॥ तव घन
जघनमंडले मांसलजघनप्रदेशे शरणं नापि क्षुद्रघंटिकापि रसतु शब्दायमाना भवतु॥ मन्मथनिदे
शं कामाज्ञां घोषयतु॥ संभोगरणे मदनाज्ञया विलासिजनं योजयत्विति भावः॥ वचनचातुर्येण स्फुरतु
मणिमंजरीरसनापि इत्यादिना विपरीतरतं याचते॥ ५॥ अपि च स्थलेति॥ हेमसृणवाणि स्निग्धवच
नेन मां आज्ञापय। तव चरणद्वयं सरसः सांद्रः सहरसेन शृंगारेण सह वर्त्तत इति वा॥ सरसं यथा स्यात्तथा वि
लसत् शोभमानो लक्तकरागो यत्र तादृशं करवाणि कुर्यां॥ कीदृशं चरणद्वयं॥ स्थलकमलगंजनं स्थ १०५
लोत्पन्नं यत्कमलं स्वकांत्या तस्य तिरस्कारकं॥ अरुणतया सौगंध्य सौकुमार्येण च तिरस्कृत स्थलकमल
सौंदर्यमित्यर्थः॥ अनेन चरणस्य पद्मादपि शीतलत्वं कथितं तं मम हृदयानुरंजकत्वात्॥ पुनः कीदृशं मम
हृदयरंजनं मम हृदयानुरागजनकं॥ अथवा॥ अथवा मम हृदयमपि क्रौंचबंधादिरंजयति संभोगे
स्खलिते अजलक्तकरागयुक्तं करोतीति तथाभूतं। अतो मयास्य रंजनमुचितमिति॥ भावः॥ पुनः कीदृ
शं॥ जनितउत्पादितो रतिरंगे सुरतकौतुके संभोगरागस्य वा परमभागः परस्परशोभा येन तादृशं॥ कामो

द्दीपककारीत्यर्थः॥ तथा च क्रौंचबंधादौ मम हृदयलग्नं सत्वरस्य शोभां दास्यतीति भावः॥ परस्परं तु याकांतिः परभा
गः स कथ्यत इति रंगः कौतुकरागयोरिति च धरणिः॥ ६॥ स्मरेत्यादिना॥ हे प्रिये। उदारं सुंदरं पदपल्लवं चरण
किसलयं मम शिरसि धेहि मस्तके स्थापय॥ अनेन प्रियजनचरणस्य भगवत्कृतगौरवातिशयेनोपास्यत्वमु
च्यते॥ पल्लवपदेन सौकुमार्यं दौर्गंध्यं च तापहारित्वं मांगल्यं सौंदर्यं चेति उदारं महत् अनेन प्रदवातेन च से
व्यत्वे योग्यत्वमिति॥ कीदृशं मम मंडनमलंकरणं॥ अनेन भगवतः प्रियजनानुवर्त्तनमेव भूषणमिति कथि

गी॰ ५ स्थलकमलगंजनं मम हृदयरंजनं जनितरतिरंगपरभागं॥ भण मसृणवाणि करवाणि चर
णद्वयं सरसलसदलक्तकरागं॥ ध्रु॥ स्मरगरलखंडनं मम शिरसि मंडनं धेहि पदपल्लवमु
दारं। ज्वलति मयि दारुणो मदनकदनारुणो हरतु तदुपाहितविकारं॥ ७॥ ॥ध्रु॥ ॥

तं॥ पुनः कीदृशं स्मरस्य य गरलं विषं तस्य खंडनं नाशनं॥ विरहिणि मूर्च्छादिप्रदत्वेन मलयानिलादेः स्म
रगरलत्वनिरूपणात् स्मरस्य सर्पत्वमाक्षिप्यते। चरणपल्लवं धेहीत्यनेन नायिकाया गारुडिकत्वे चेत्या
क्षेपकत्वमिदं च परमपि सर्पादिविषं गारुडिकचरणाघ्रिक्षातेनाभिमंत्रितपल्लवाद्यारोपणेन च शाम्य
तीति ध्वनितं॥ किं च मयि दारुणो दुःसहो मदनः कामस्तज्जनितं यत्कदनं तापः स एवारुणः सूर्यः ज्वलति अ
तस्तेन उपहितविकारस्तन्यादि तं परं हरतु दूरीकरोतु॥ अन्योपि सूर्यसंतापः शिरसि पल्लवादिस्थापनेन भ

 स्पनातिध्वनितं॥ अरुणः स्फुटरागोस्या स्त्रयंस्तु यस्यासा रथावितिः॥ करनंकचुपेतापेच॥७॥ इतिस्या दि॥इ
त्यनेनप्रकारेण मुरवैरिणः मुरवानि आलिंगनसमूहानिएरयतिप्रेरयन्तीति मुरवैरी तस्य मुरवैरिणः मुरवेह
१०६ नेप्रियालिंगनेवैरिवत्तया हालिंगनकारिण इतिवा॥ मुरवैः॥ आलिंगनसमूहैः कुलाइनःस्वामिनः नानालिं
गनेसमर्थस्तस्य मुरवैरिणः कृष्णस्य राधिकामधिराधांलक्ष्मीकृत्य प्रोक्तंवचनजातंवाक्समूहो जयतिस
र्वोत्कर्षेणवर्त्ततां॥ कीदृशंचटुलंमनोहरं॥ चटुप्रीतियुक्तंपटुचतुरं चारुसुकुमारंपुनः कीदृशंजयदेवनाम्नः
कवेः भारतीभारतीसंज्ञायस्या एवंभूता वाणी भूषिता लंकृतायेन तत्तथा मानिनीजनेति॥ मानिनीजनस्यमा

इतिचटुलचाटुपटुचाटुमुरवैरिणोराधिकामधिवचनजातं॥ जयतिजयदेवकविभारती
भूषितंमानिनीजनजनितशातं॥८॥ नवतीलोकस्यजनितंशांतंसुखंयेनतत्तथाजयतिपद्मावती
रमणजयदेवकविभारतीभणितमितिशातमितिपाठांतरेपद्मावतीजयदेवस्यपत्नीतस्यारमणोवल्ल
भोयोजयदेवकविः तेनभारत्याभारतीसंज्ञयाकविवर्णितंपुनः कीदृशंअतिशांतं॥ अतिशायितंसुखंय
स्मादृशं॥ भारत्यावाण्याभणितमितिवुधाख्यानमेतं॥ तथासतियोनहृत्तापत्तिः प्रथमपादस्कासमीचीन
एवतदुक्तंरसार्णवसुधाकरे॥ शृंगारेविष्टादिभारतीति॥ शृंगारतिलकेच॥ प्रेमप्रुरुवप्रयासवकोक्तिनिरं १०६
तरा॥ भारतीवत्तवेहतिर्वरिहास्याद्भुताश्रयेति॥ चटुलः सुंदरेचलेइतिधरणिः॥ चटुलवाटुप्रियवाकामि

तिहदचंद्रः॥ पटुस्तीक्ष्णेनिरोधेवतुरेन्यवद्दितिविश्वः शातसुखानिचेत्समरः॥८॥ ॥१९॥ इदानीमात्मानं
निरपराधंज्ञापयन्संभोगार्थंप्रोत्साहयन्नाहापरिहरेति॥ हेकृतांतंकेविहितकोपेश्रीराधेत्वंशंकांममान्यका
मिनीसंभोगोजातइतिसंज्ञायंपरिहरत्यज॥ यतोममस्वांतेचित्तेअनंतरमभ्यंतरंविततोप्युतुंश्चयात्कामान्योध
न्योजनस्ताहृशासोभाग्ययुक्तःस्त्रीलक्षणःकोपितविशतिनप्रविशति॥ कुतोनविशतीत्यतआह॥ परेति॥
परानवकाशिनिइतरानवकाशशून्ये॥ नत्रहेतुमाह॥ त्वयेतिघनेनिविडेस्तनजघनेयस्यास्तादृशयात्वयास

परिहरकृतातंकेशंकांत्वयासततंघनस्तनजघनयाक्रांतेस्वांतेपरानवकाशिनि॥ विशतिवि
तनोरन्योधन्योन।कोपिममांतरंप्रणयिनिपरिरंभारंभेविधेहिविधेयतां॥६२॥ ॥३॥

ततंनित्यमेवाक्रांतेव्याप्ते॥ तथाच॥ सदात्वयामदीयेहृदयेन्यस्यप्रवेशुंस्थलमेवनास्तिसांगस्यप्रवेशाभा
तु॥ अनंगएवपरंप्रविशति॥ नस्यांगाभावादित्यर्थः॥ हेप्रणयिनीतस्मात्परीरंभारंभेआलिंगनारंभेविधे
यतांकर्त्तव्यतांविधेहिकुर्वित्यर्थः॥ आतंकः क्रोधशंकयोरितिधरणिः॥६२॥ यद्येवंनप्रत्येषितदामप्यप
राधानुकूलंदंडमाचरेत्याह॥ मुग्धेसुंदरिमूढेवा॥ निर्दयंदयारहितं॥ दंतदंशंदशनक्षतं॥ अथच॥ दोर्वल्लि
वंधंभुजलतावंधनंनिविडंगाढंस्तनाभ्यामापीडनंचविधेहिकुरु॥ हेचंडिअतिकोपने॥ त्वमेवमुदमप्यराधि
नोममदंडाचरणेनानंदमंचप्राप्नुहि॥ नपुनःपंचवाणःकामःसएवनिरपराधिजनहिंसकत्वेनचांडालस्त

स्य कांडदलनान्नाराचप्रहरणाद्सवः प्राणाः न मयांतु न निर्गच्छंतु॥ चांडालप्रहारेण न समीचीना गतिश्चतस्त्र
 या साक्षाद्देवयथोचितदंडाचरणं विधेयमिति भावः॥ तथा च कामपीडया प्राप्तदशाम्यवस्थयाच्छति कामातुरः
संभोगरूपं प्रसादमानवत्याः सकाशाद्याचरित इति ध्वनितं चंडिस्याद् इति कोपने त्यमरः॥ चंडालकांडदलनादि
तिपाश्वेचंडो वक्रोऽलकोंऽश्चलकवधः केशाः समूहलस्य दलनात् प्रसरणात्॥ अथ वा श्रीराधावदनपार्श्वयो
रजकलंवनात्वं न मुकुंदश्चंच हर्षमाप्नुहीत्यर्थः॥ तथा च तच्छोभानुभमेवानंददायिनीति भावः॥ अथवा हे चंडि
कोपेन वक्रेत्वमेव पुरुषायितं मयि स्त्रियायितेविधेहि संपादय एवकारेणाहं त्वदाज्ञाव्यतिरेकेण पुरुषायि

मुग्धे विधेहि मयि निर्दयदंतदंशं दोर्वल्लिबंधनिविडस्तनपीडनानि॥ चंडित्वमेव मुदमंच
न पंचबाणचांडालकांडदलनाद्सवः प्रयांतु॥ ६३॥ तेनकरोमीत्यर्थः श्रीराधाकर्तृका पुरुषायि १०८
तानि दर्शयिति॥ दंतदंशादोर्वल्लिबंधनिविडस्तनपीडनानि मय्येव विधेहि निर्दयं यथा स्यात्तथा न तु दंशं च औ
दासीन्यं मयि विषयेन प्राप्नुयात् मा कुर्वित्यर्थः असवः तव प्राणा अमय्येन प्रयांतु मत्परायणा भवंतु॥ अथ
वा॥ हे राधे मय्यनिर्दयं नितरां दयत्यातिशायेन दयापरा भव॥ हे पंचबाण कामदेव च चंडालकांडदलनात्
हे मुग्धे मम प्रार्थनान भिन्नेनी कृत्वा बाणत्यागात् निर्दयं नितरां दयं दयां विधेहि॥ वधादुपरमेत्यर्थः॥ श्रीरा
धाप्रसादो मयि जातः अतः परं तवापि पराभवो गत इति भावः॥ ६३॥ ननु कोपो नास्त्येवेत्यत आह॥ ॥

शशिमुखी त्यादि॥ हे शशिमुखि चंद्राननेन नवभंगुरभ्रूः कुटिलाभ्रूलतिशोभते॥ कीदृशी युवजनानां तरुण
जनानां मोहाय सम्मोहनाय कराला नायक कालसर्पकन्या इव॥ अन्यान् जगीह मोहयत्सोऽदृष्ट एव
तस्याः करालं तदुदितभयभंजनाय तस्याः सकाशाद्दुदितं यत्भयं तस्य नाशाय यूनां तरुणानां मम अस्मा
स्य भूतप्रत्यर्थः॥ त्वदधरसीधुसुधैव त्वदीयाधरसीधुर्मदिराविशेषः स एव सुधामृतं स एव सिद्धः साधितो मंत्रः
त्वमेव चेदधरामृतं पायय पश्चात् तदा परं तद्विषापहरणं भवेदन्यथा नस्यादेव अत एवाधरपानं दत्वा तव कोपसर्प
दष्टस्य मम जीवनं संपादयेति भावः॥ ६४॥ एवमप्युत्तरमप्रयच्छंतीं प्रत्याह॥ व्यथयतीत्यादि॥ हे तन्वी कु

शशिमुखि तव भाति भंगुरभ्रूर्युवजनमोहकरालकालसर्पी॥ तदुदितभयभंजनाय यूनां त्वदधरसी
धुसुधैव सिद्धमंत्रः॥ ६४॥ व्यथयति वृथा मौनं तन्वि प्रपंचय पंचमं तरुणि मधुरालापैस्तापं विनोदय
दृष्टिभिः॥ सुमुखि विमुखीभावं तावद्विमुंच न मुंच मां स्वयमतिशयस्निग्धो मुग्धे प्रियोयमुपस्थितः॥ ६५॥

शांगीतवदृथा मौनं निः प्रयोजन वचन संकोचो मां व्यथयति पीडयति अतः अंगपालवरतावंतं कोपधारण
मनुचितमिति सूचनाय तन्विपदोपादानं तस्मात्त्वं पंचमं रागविशेषं प्रपंचय विस्तारय हे तरुणि मधुरा
लापैर्मधुरवाक्यैः मधुरवचनैर्वनितापं मम संतापं विनोदयापसारय हे सुमुखि शोभनवदने दृ
ष्टिभिः कटाक्षावलोकैः विमुखीभावं औदास्यं विमुंच सुमुखा स्व वैमुख्यमनुचितमिति भावः हे मुग्धे

गी॰टी॰र॰ प्रियस्नेहाननितेत्ययंप्रियः॥ स्वयमेवत्वनाहूतएवोपस्थितः आगतः कीदृशः अतिशयस्निग्धः अति

शयेनस्नेहवान्॥ अतोमानंमुंच॥ स्वयमागतःप्रियोहानुनोचितमितिभावः॥ ६५॥ संप्रतिमानायनीदना

१०८ यतदंगरूतिंकरोति॥ बंधूकेति॥ हेचंडिप्रियेअयंतवाधरोबंधूकद्युतिर्बांधवः बंधूकस्यारुणपुष्पविशे

षस्ययाद्युतिर्दीप्तिस्तस्याः बांधवः सुहृत्पोषकइत्यर्थः अनेनबंधूकादपिश्रेष्ठमुच्यते॥ अयंचस्निग्धोगं

डःकपोलः मधूकछविर्मधिरहजनितपांडिम्नामधूकपुष्पस्येवछविःकांतिर्यस्यएतादृशश्चकान्तिशोभ

ते॥ तेलोचनंनीलनलिनश्रीमोचनंस्वकांत्यानीलोत्पलस्यकांतिंमोचयत्याजयतीतिदृशं॥ स्वभावएवनी

बंधूकद्युतिबांधवोयमधरः स्निग्धोमधूकछविर्गंडश्चंडिचकास्तिनीलनलिनश्रीमोचनंलोचनं॥

नासाभ्येतितिलप्रसूनपदवींकुंदाभदंतिप्रियेप्रायस्त्वन्मुखसेवयाविजयतेविश्वंसपुष्पायुधः॥ ६६

लतारक्तत्वात्नीलंचक्षुरंजनेनविनापिसुतरांनीलोत्पलमप्यतिशेतेइतिभावः॥ हेकुंदाभदंतिकुंद १०८

पुष्पस्येवाभायेषांतादृशादंतायस्यास्तादृशी॥ तवनासातिलप्रसूनस्यपदवींतिलपुष्पमसिद्धिंचअभ्ये

तिप्राप्नोति॥ अत्येतिपाठेअतिक्रामतीत्यर्थः॥ प्रायइतितर्कयामिसप्रसिद्धः पुष्पायुधः पुष्पमेवायुधमा

स्त्रंयस्यएतादृशः कामस्त्वन्मुखसेवयाविश्वंजगद्विजयते॥ कामः पंचभिरेवशरैर्विश्वंविजयते त्वन्मुखेबं

धूकमधूकनीलोत्पलतिलकुंदपुष्पाणिसंतीतित्वन्मुखादेवपंचमायुधः कामोविश्वंविजयतेइतिभावः॥

११

तथाच॥ रक्तपांडुनीलकषायोज्ज्वलेति॥ आकर्षणवशीकरणोन्मादनद्रावणशोषणेतिकामस्यशराः

कथिताः॥ त्वन्मुखसेनयेतिपाठेत्वन्मुखमेवयासेनाकरकंतेनबंधूकेबंधुवेणीवेस्यादितिपुष्पः॥ मधु

पुष्पोमधूकश्चगुडपुष्पोमधुद्रुमइतिहारावली॥ दृशा॥ दृशामिति॥ हेतन्वितंपृथ्वीगता पृथिव्यांप्राप्तासती

विबुधयौवतंदेवयुवतीनांसमूहंउद्वहोआश्चर्यंवहसिधारयसिएकेनैवांगेनदेवांगनानांसौंदर्यंतिरस्करो

षीत्यर्थः॥ तदेवाहदृशाविति॥ तेवदृशौनेत्रेमदालसेमदेनस्वैर्यणालसेमंथरेतथाच॥ स्वर्गेएकैवमदा

लसानाम्नीदेवांगनात्वंतुनेत्रेएवकेमदालसेदधासीतात्पर्यमितिभावः॥ तववदनंइंदुमत्यास्पदंइंदुविष

दृशौतवमदालसेवदनमिंदुमत्यास्पदंगतिर्जनमनोरमाविधुतरंभमूरुद्वयं॥ रतिस्तवकला

वतीरुचिरचित्रलेखभ्रुवावहोविबुधयौवनंवहसितन्वि पृथ्वीगता॥ ६७॥

यणीयामतिस्तस्याःआ

स्पदंविषयइत्यर्थः॥ तवमुखेअयमिंदुरितिमतिर्भवति॥ तथाचेंदुमतीदेवांगनातस्याःसौंदर्यादिप्याधि

कत्वेनांमुखेनैववहसीतिश्लेषेणलभ्यते॥ तवगतिर्गमनंजनमनोरमालोकानांमनोहारिणी॥ अथवा

॥ जनस्यमद्वक्षणस्यभ्रुत्यजनस्यैति॥ तथाचमनोरमानाम्नीदेवांगनातदात्मिका॥ अथवा॥ रमालक्ष्मी

स्तदात्मिका॥ लक्ष्म्याःसौंदर्यादिकंतवगत्यंतर्भूतंभवतीत्यर्थः॥ तवोरुद्वयंऊरुयुगंविधुतरंभंविधु

तास्तन्नोनयातिरस्कृतारंभाकदलीयेनतादृशं॥ तथाचऊरूसौंदर्येणतिरस्कृतारंभानाम्नीदेवांगना

गी·टी·र· पि॥ अथवा॥ तवरतिः सुरतक्रीडा कलावती काम कलाकौतूहलशालिनी हावभावकिलकिंचितमोट्टायि
तविव्वोकादिमतीत्यर्थः॥ तथाच कौतूहलेनैवाल्पीकृता कलावती नाम्नी देवांगनेति भावः॥ सुवीर चित्रले
१०१ खिवीरुधि निर्मितविचित्रलेखेवारुचिरपाग्मनोहरेइत्यर्थः॥ तथाच स्वर्गे एका चित्रलेखा॥ अत्र तु
त्वद्रूपं चित्रलेखाद्वयं रचितमित्याश्चर्यमिति भावः॥ प्रेयोनामायमलंकारस्तदुक्तं दंडिना॥ प्रेयः प्रि
यतराख्यानं रसवद्रसपेशलमिति॥ इष्टीकं चेदं छंद इत्यपि ध्वनितं॥ तथाश्लोकद्वयेन गुणकीर्तने
न प्रसादनं कथितं॥ ६७॥ कविः सर्गांते आशीर्वचनमुक्ते॥ हरिः श्रीकृष्णो वः युष्माकं गायतां प्रीतिमा

मतिं वस्तनुतां हरिः कुवलयापीडेन सार्द्धं रणे राधापीनपयोधरस्मरणाकलंकुंभेन संनेदवान्॥ यत्र खि
द्यति मीलति क्षणमथ क्षिप्त द्विपे तत्क्षणात् कंसस्याजमभूत् जितं जितमिति व्यामोहकोलाहलः॥
६८॥ ॥इतिश्रीगीतगोविंदे द्वादशः सर्गः॥१०॥ १०१
नंदं तनुतां विस्तारयतु भक्तानां कंठहारीति हरिः॥
किंलक्षणः॥ रणे संग्रामे राधायाः पीनौ यौ पयोधरौ तयोः स्मरणकृतसंस्कारबोधो यो मांतादृशो कु
भौ यस्य तथाविधेन कुवलयापीडेन हस्तिना सार्द्धं संनेदवान् संसर्गवान्॥ अत्र प्रचुर शृंगारित्वं
तथाच श्रीराधायां सर्वाधिको भावस्तथाच श्रीकृष्णस्याद्भुतवीर्यं शृंगारविरोधिभयानकेहेतुमहासत्व
हस्ति संग्रामे शृंगाररसाविर्भावेन वर्णितमिति ज्ञेयं॥ तदेवाह॥ यत्र यस्मिन् रणे तत्कुंभस्थलंदृष्ट्वा
१२

नोद्गदसात्विकविकारेण खिद्यति स्वेदं करोति॥ पुनः केनापि सुखोदयेन क्षणं क्षणं मीलति शायेन जि
तं जितं आवेगेन द्विरुक्तिः इति व्यामोहकोलाहलश्चाभूत्॥ अयमर्थः॥ प्रथमं तावत्स्वेदमालिन्याभ्यां कं
सजयाभ्यां आनंदो जातः पश्चात् तत्क्षणमेव हस्ति गजेन्द्र आवेगात् तत्र गुणाजितं जितमिति अमुनाप्रकारेण
व्यामोहः मूर्छा कोलाहलः हाहाशब्दश्चाभवदित्यर्थः॥ यद्वा उदितसात्विकविकारेण तादृशस्य दर्शना
त् व्यामोहात् आत्मा जितं जितमिति कोलाहलो भवदित्यर्थः॥ ६८॥ ॥इतिश्रीगीतगोविंदे मानिनी वर्णने
मुग्धमाधवो नाम द्वादशः सर्गः॥१०॥ ॥मुग्धश्रीराधादत्तनिगुणवर्णनाभ्यां च सुंदरः प्रफुल्लितमुखार
विंद इत्यर्थः श्रीराधामानेन मूढो मोहितो वा॥ माधवः श्रीराधाया मानन्नायधवः धावन् शीघ्रः वेगेन
मानवत्याः प्रसन्नशीलो वर्णितो यत्र सामाद्वादशः सर्गः॥ प्रकरणसमाप्तिमर्यादा करइत्यर्थः॥ मील
ति ईक्षणं निमीलति सति॥ अथ अथानंतर तत्क्षणमेव क्षिप्त द्विपे क्षिप्ते हस्ति सति कंसस्याजो॥ द्वादशमे
मानप्रकारमनुवर्ण्य पिहितानि मिकादशो सर्गेस्मिन् मानितायामानिन्याश्चाभिसारमाह॥ सुचिरेत्यादि॥ कापि
अनिर्दिष्टानि धायस्वी राधां जगाद वचनं॥ कसति परोषे स्फुरति सति॥ कीदृशे दृष्टिमोषे॥ दृष्टिं मुष्णाति
स्वविषयग्रहणासमर्थं करोतीति तादृशे॥ रसोद्बोधक गाढांधकार इत्यर्थः॥ पुनः कसति॥ केशवे कस
सुखस्य ईशः केशवः श्रीराधाकृतैव सन्नीतिवसनिवासेवः कोराज्यासौवश्य केशवः तस्मिन् केशवे सुख
स्वामिनी परमसुखरूपे श्रीकृष्णे मृगाक्षी हरिणनयना श्रीराधा सुचिरं चिरकालं व्याप्य अनुनयेन प्रण

गी·टी· मित्वा मम मारयित्वा कुंजशय्यां जता वेष्टित कुटीराभ्यंतर स्वशयनीयं गत वति गते सति सुचिरमित्यादि
ना तस्यां स्नेहाधिक्येन तत्र शंता कथितेति ध्वनितं ॥ राधानुनय एव मम परमपुरुषार्थ इति तात्पर्यं नाय सुचि
रपदोपादानं ॥ कीदृशे केशवे ॥ कृतवेशे कृता निःसारी चिताजंकरणे ॥ अथवा ॥ निर्मितः श्रीराधामंड
११० नार्थं विविधपुष्पादिनालंकरणादिकं येन तादृशे ॥ कीदृशीं राधां ॥ रचिता रुचिरा मनोहरा नूपुरा लंक
तिर्यया तां ॥ पुनः कीदृशीं निरवसादां ॥ निर्गतो वसादः कृष्णागमनजन्यदुःखं यस्यास्तां ॥ कृष्णानुन

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गत वति कृतवेशे केशवे कुंजशय्यां ॥ रचितरुचिर भूषां दृष्टिमो
षेप्रदोषे स्फुरति निरवसादां कापि राधां जगाद ॥ ६० ॥ विरचित चाटुवचन रचनं चरणे रचित प्रणिपा
तं ॥ संप्रति मंजुलवंजुलसीमनि केलिशयनमनुयातं ॥ १ ॥ मुग्धे मधुमथनमनुगतमनुसर राधिके ॥
याद्गितवेशाद्इत्यर्थः ॥ ६० ॥ तदेव गीतेन कथयति ॥ विरचितेति ॥ गीतस्यास्य वसंतरागः ध्रुवपदं ॥ ॥
॥ यतिताल ॥ तल्लक्षणं कथितं प्राक् ॥ गीतार्थस्तु ॥ हे मुग्धे सुंदरी ॥ अनुगम मधुमथनानुसरण कृतविलं ११०
चाटुनाज्ञितेषा ॥ हे राधिके रूपेणाधिके सकल व्रजांगनातिशायित सौंदर्येणामोहित व्रजेंद्रनंदने ॥ अथवा
स्वमाधुर्यविधिरिणायं चाबादिस्वरेण वावशीकृत कृष्णे ॥ वर्णितं च भगवत्प्रियैः कृष्णसारेण हरपंचम
स्वरेमुंच गीत कृत कामिराधिके ॥ प्रेक्षते तत्र हरिणाक्षु धाचतां त्वां नयावदति नाषणो जन इति ॥ रस्क

१३

नांबेरूपेचेत्येकाक्षर ॥ मधुमथनं मधुर्मधुरारसरसस्तं मथ्नातीति विलोड यति इति तत्तथा ॥ तं शृंगाररसास्वादं
चतुरमित्यर्थः ॥ अथवा मथनं भ्रमरवत्तत्तद्रसास्वाद लंपटं स्तं ॥ अथवा मधुर्वसंतस्तं मध्नाति क्षोभयति संस्म
रस्तं कंदर्पकोटि सुंदर मनोहरं अनुगच्छ कीदृशं अनुगतं नव सौंदर्यजा वण्यादिना कृष्णः आनुकूल्येन त्वा
मनुसृतं स्तं ॥ अथवा ॥ कामिनां अधिके इति राधिके शृंगाररसस्वभाव इत्यर्थः रस्क कामइत्येकाक्षरः मधुर्वसंतं
॥ अथ कालेनि सर्वतोभावेन नमतक्षा भूत्वा अनुगतं मत्वा भूत्वा अनुगतं संकेतप्रासं प्रियमनुसर क्रीडापरा भव
इत्यर्थः ॥ वसंतस्योद्दीपन विभावात् ॥ अथवा हे राधिके अनुसर ॥ न त्वनाहूता कथं व्रजामीति चेदत आ
ह ॥ मधुना माविदूषकोयं समागतस्तं मधुं नमः कृत्वानुसरेत्यर्थः ॥ ध्रुवपदं ॥ अनुगतत्वमेवाह ॥ विर
चिता विहिता चाटुप्रियोक्तिः मम कोटिप्राणवल्लभा त्वमेवासि त्वत्पादनखशोभयापि व्रजसुंदरीकदंब
मपि न तुलयामि त्वया स्वासाधारणगुणैर्वशीकृतोस्मि त्वां विना क्षणमपि स्थातुं न शक्नोहमित्यादि व
चनकदंबस्य रचना संदर्भो येन तादृशं ॥ अथवा ॥ तवानयनाय मच्चरणे रचितः प्रणिपातो येन तादृशं
॥ चरणे संकेता चिमुखगमनार्थमिति वा ॥ विविधानुनयपूर्वकं नमस्क्रियाकथनाया त्रचितपदोपादानं
॥ तर्हि संप्रति कुत्रास्तीत्यत आह संप्रतीत्यादिना ॥ संप्रत्यधुना मंजुलो मनोहरो वंजुलो वेतसस्तस्य सीम
नि पर्यंते अशोक ज्ञतिकातदं इतियावत् ॥ यत्केलिशयनं क्रीडाशय्या तामनुलक्षीकृत्य यातं गतं ॥
तत्र स्थं त्वां प्रतीक्षत इत्यर्थः ॥ वंजुलादीनामुद्दीपनविभावत्वेन परिगणनात् उपादानं ॥ १ ॥ ॥ ७ ॥ ॥

गी॰र॰टी॰ नाघोत्साहयतीत्वरयतिध्वनेति॥ हेसखित्वंपेहिकृष्णमनुगच्छकथंयथास्यात॥ मुखरितौध्वनितौमणिमं
जीरौमणिपुक्तेनूपुरेयत्रतद्यथास्यादेवं॥ पुनःकथंयथास्यात्दरेणसाध्वसेनमंथरश्चरणविहारःपदवि-
२२ न्यासोयत्रएवंयथास्यात॥ तत्रहेतुगर्भविशेषणेनसंबोधयति॥ घनयोर्निविडयोर्जघनस्तनयोर्भारस्य
भरोतिशयोयस्यास्तादृशिमरालानांहंसानांस्वकीयमंथरगमनेनमंजीरादिशब्देनचनिकारंतिरस्कारंवि
धेहिकुरु॥ संप्रतिमरालेषुशब्दायमानेषुसत्सुमंजीरादिध्वनिरपिमरालशब्दत्वेनैवलोकैर्ग्राह्यइतिसंप्र
तियोग्योभिसारक्षणइतिध्वनितं॥ अथच॥ हंसशब्दोयात्रायांशुभस्त्वयतिगमनंप्रतिविलंबेनकार्यइ

घनजघनस्तनभारभरेदरमंथरचरणविहारं॥ मुखरितमंजीरमुपैहिविधेहिमरालनिकारं॥२॥ ॥

तिभावः॥ तदुक्तंवसंतराजे॥ काष्ठासुसर्वास्वपिदक्षिणेनदंसस्यशब्देनचसर्वसिद्धिरिति॥ मरालोराजहं २२
सेस्यान्मरालोहंसमात्रकइतिधरणिः॥ निकारःस्यात्परिभवेधान्यस्योत्करणेपिचेतिविश्वप्रकाशः॥ पो
गांतरेमरालविकारंमरालानांहंसानांसारासारविवेकचतुराणांविकारंश्रीकृष्णानुसरणंविनाप्य
सारंविकारंविक्रियारूपंतुच्छंअसारमेवविधेहिविशेषेणधेहिचिंतयस्वजानीहीत्यर्थः॥२॥ अन्यम
प्युद्दीनविनावंदत्तयितिसृणिवित्यादि॥ तरुणीजनानांमोहनंमाधुर्यातिशयेनमोहजनकंमधुरिपोःकृ
ष्णस्यरावंशब्दं॥ करकमलेनकरोमिचरणमहमागमितासिविदूरमित्यादीनिमधुराणिसंभाषणानि

महामधुरमोहनात्यद्भुतस्वरग्रामच्छनानानतालरागैराजापितंत्वद्गुणसंकीर्तिवेणुनोदंवाशृणुकर्णयि
॥ कीदृशं॥ रमणीयतरमतिशयेनरमणीयं॥ अततरुणीजनानांमोहनं॥ मधुपविरावमितिपाठे॥ मधुपानां
भ्रमराणांविविधप्रकारेणरसोद्बोधकंशब्दं॥ अथवामधुमधुररसस्तंपिबंतिअस्वादयंतीतिमधुपः
श्रीकृष्णस्तस्यानुनयालापमिति॥ मधुरिपुशब्देनापिभ्रमरस्वरूपेणतद्रसलोपट्यंतद्गुणगानपरत्वंचकथितं
॥ तथाचश्रीभागवते॥ मधुरयागिरेतिकाश्चित॥ पिकनिकरेकोकिलसमूहेकुसुमशरासनशासनवंदि
निस्तावकेसति॥ अथवा॥ कुसुमशरासनशासनंवंदितुनमस्कर्तुंशीलमस्यतादृशं॥ कामाज्ञाकारि

शृणुरमणीयतरंतरुणीजनमोहनमधुरिपुरावं॥ कुसुमशरासनशासनवंदिनिपिकनिकरेभज
भावं॥३॥

णिसतीत्यर्थः॥ भावंकृष्णेनुरागंभजआश्रय॥ कामाज्ञयाशब्दायमानेपिकनिकरेभावमभि
प्रायंभज॥ पिकनिनदस्यकृतावुद्दीपकत्वात्प्रियतमसंभोगावसरेपिकादीनांरुतमिवकूजितंप्रकटीकुर्वन्नि
त्यर्थः॥ वंदिनस्तावकाइत्यमरः॥ अत्रापिपिकनिकरउंकारेणकृष्णस्यमधुरस्वरोयात्रायांगीतवाद्यवत्
शकुनमित्यपिध्वनितं॥३॥ अथच॥ अनिलेत्यादि॥ हेकरभोरुकरभःकनिष्ठातोमणिबंधपर्यंतंकरस्यव
हिर्भागस्तद्वत्॥ निम्नोन्नतेऊरूयस्यास्तादृशि॥ गतिंगमनंप्रतिविलंबंकालक्षेपंमुंचत्यज॥ अनिलेनवा
युनातरलश्चंचलोयःकिंशलयनिकरोनवपल्लवसमूहस्तत्स्वरूपेणकरेणलतानिकुरंबंलतासमू

गी॰र॰टी॰ हस्तव प्रेरणमिव करोति॥ किं त्वाजयकंपच्छलेनासमंजसमसहमानो जनासमूहोऽपि त्वां प्रेरयति इति वि
लंबो न कार्य इति ध्वनितं॥ शाकुनशास्त्रे च॥ वामे मधुरवाक्पक्षी हस्तः पञ्चवितो गतः॥ अनुकूलो वृत्तवायुः
११२ प्रयाणेऽग्रुनसूचक इति॥ समूहे निकुरुंबमस्त्रियामित्यमरः॥ मणिबंधादा कनिष्ठं करस्य करभो बहिरि
त्यमरः॥ प्रेयो नामालंकारः॥४॥ अपि च॥ स्फुरितमित्यादि॥ अमुं कुचकुंभं नालनकलशं एच्छ सखि स
मीचीनमसमीचीनं वा वदतीति प्रश्नं कुरु॥ कीदृशं॥ स्फुरितं सकंपं॥ कस्मादिव॥ अनंगतरंगवशादिव॥ अ
नंगस्य कामस्य यस्तरंगः ऊर्मिस्तद्वशादिव॥ अत्रानंगतरंगे॥ तानेनतस्याऽरसतरंगिणीत्वमाक्षिप्यते॥ अ

स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभं॥ पृच्छ मनोहरहारविमलजलधारममुं कुचकुंभं॥५॥

न्योपि कुंभः नद्यंतरंगैः प्रेर्यमाणः सकंपो भवतीत्ययमपि कुचकुंभः स्त्वयि रसतरंगिण्यामनंगतरंगे
ः प्रेरणादिव सकंप इति भावः॥ इवशब्दो त्रोत्प्रेक्षाद्योतकः॥ पुनः॥ कीदृशं॥ मनोहरो यो मुक्ताहारः स
एव विमलानिर्मलाजलधारा यत्र तादृशं॥ अत्र स्तनोपरिस्थितस्य हारस्य जलधारत्वरूपणात्स्तनस्य पूर्ण ११२
कलशत्वेन रूपेणमाक्षिप्यते॥ पूर्णादिवकलशात्तरंगैरांदोलनेसति बहिर्जलधारानिःसरणसंभवात्
॥ पुनः कीदृशं॥ सूचितो हरेः छद्मस्य विरहतापहरणात् हरिरिति परिरंभ आलिंगनं येन तादृशं॥ नारी
णां स्तनकंपः प्रियसंगमं सूचयतीति शाकुनिकस्तु कं॥ निर्सनायक्लिनेकंपः प्रियसंगमसूचकः इति
१५

हणकिलशत्वेन स्तनरूपणमपि यात्रायां पूर्णकिलशाद्दर्शनं शुभमिति सूचनाय॥५॥ सख्याः सकाशात्त्वज्जं
तीमप्याह॥ अधिगतमित्यादि॥ इदं तव वपुः सखीभिः अतिशयेन रतिरणाय सुरतसंग्रामाय सज्जं कृतालंक
रणादिसंविधानमधिगतं ज्ञातं॥ अथवा॥ सखीभिरिदं तव वपुर्वृद्धा रतिरणे सज्जमधिगतं प्राप्तं॥ इदानीं तासां
कालज्ञातिभावः॥ अतो हे चंडि रतिरणाकांक्षिणि अलज्जं निःशंकं सरसं सोत्साहं॥ अथवा॥ रसः शृंगाररसस्त
त्सहितं सरागं वा रणितः शब्दायमानः कृतो रसनायाः कांच्याः रवो ध्वनिर्डिंडिमो वाद्यविशेषो यत्र एवं यथा स्या
त्तथाभिसरश्रीकृष्णाभिमुखं सुरतरणसंकेतस्थलमुपेहि॥ अन्यत्रापि सोत्साहरणेडिंडिमस्ताड्यते॥

अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जं॥ चंडि रणितरसनारवडिंडिममभिसर सरसमलज्जं॥६॥

नेति ध्वनितं॥ अभिरमेति पाठे॥ लज्जं लज्जारहितं यथा कृष्णेन सह सुरतं विधेहि॥ संभोगादौ लज्जा
या अनुपयोगित्वात्॥ अलज्जमिति युक्तं॥ किंच॥ कचिदात्मनेपि परस्मैपदिन एव॥ यथाबलं धाधर्ष राधामि
त्यादिवत्॥ बाधामित्येतत्पदं दुर्गसिंहटीकायां प्रमाणीकृतं॥ तथैवाभिरमेत्यपि पदं ज्ञेयं॥ तत्र क्रियाविशे
षणं सरसमिति हावभावमोट्टायितरैत्निःसरैः शृंगाररसाद्भिन्नं यथा स्यात्तथा॥ पुनः कथं यथा स्यात्॥ रणि
तरसनारवडिंडिमं यथा स्यात्॥ अनेन विपरीतसुरतमिति ध्वनितं॥ ननु सखी निर्लज्जा यामित्याह॥ सखी
भिज्ञातमिव अतो विलंबेन न कार्यं इति भावः॥६॥ तदेवाह स्मरेत्यादि॥ हे सखि करेण सखीमवलंब्य सलीला

नं

स्मरशरसुभगनखेन सखीमवलंब्य करेणसलीलं॥ चलवलयकणितैरवबोधयहरिमपिनिजगतिशीलं॥ ३॥ मूल॰

 सहितं यथा स्यादेवं च लगच्छ॥ कीदृशेन करेण॥ स्मरस्य कामस्य ये शराः तद्वत्सुभगाः सुंदरा नखा यस्मिन् तादृशेन॥ अन्यस्मिन्नपि रणे शरास्त्राणि भवंति॥ रतिरणे तु नखा एव स्मरस्य शरास्त्राणि इति भावः॥ अथ च॥ वलय
११२ कणितैः कंकणशब्दैः हरिमपि निजगतिशीलं॥ स्वकीयगमनस्वभावं स्वरूपं वा॥ गतिप्रापिशीलं चरित्रं॥ अव
बोधय ज्ञापय॥ अन्यत्रापि समीचीनो योद्धा अस्मिन् हमवहितं कृत्वैव युध्यत इति ध्वनितं॥ निगदितं शीलम्
मिति पाठे कथितस्वभावमित्यर्थः॥ ३॥ श्रीजयदेवेत्यादि॥ इदं श्रीजयदेवेन भणितं हरिविनिहितमनसां हरौ
विनिहितं सत्परं मनो येषां तादृशानां अविरामं अनवरतं कंठतटीं अधितिष्ठतु कंठदेशे वसत्वित्यर्थः॥ की

श्रीजयदेवभणितमधरीकृतहारमुदासितवामं॥ हरिविनिहितमनसामधितिष्ठतु कंठतटीमविरामं॥ ८॥ ॥२०

दृशं॥ अधरीकृतः स्वगुणो हीनीकृतो हारो येन तादृशं॥ पुनः कीदृशं॥ उदासिता स्वमाधुर्येण तिरस्कृ ११२
ता वामा स्त्री येन तादृशं॥ अविराममिति भणितस्य विशेषणं वा कीदृशं॥ नित्यमित्यर्थः॥ कंठस्थितस्मर
स्मरामायास्वविषयिणां शोभाप्रदत्वं रसप्रदत्वं च भवति॥ श्रीजयदेवस्य भणितं मदभ्रमैः कंठे धृतेन तस्य
माधुर्यास्वादनेन तयोस्तिरस्कारो जायत इति भावः॥ अथवा उदासिताः वामाः श्रीराधाकृष्णयोः उपास
नरहिताः सर्वधर्मा वामा मार्गास्ते उदासिताः श्रीरासीन्यता तिरस्कृताः नीता येन तादृशं॥ पक्षे मनसामित्यावंत
त्वं तदा श्रीराधाविशेषणं तदेवदर्शयति॥ सख्यावाक्येन हरिविहितमनसां हरौ श्रवणेनैव विन्यहार कल्मस्मिन्

विहितं विशेषेण हितं कृतं मनो यया सा विहितमनसा तां विहितमनसां श्रीराधां हरौ विहितं तया स्थितं वा
तां अधितिष्ठतु सख्या गीतं हय चिरणं तस्या हृदये अधिष्ठाय वसत्वित्यर्थः॥ कीदृशं सख्याः वाक्यं श्रीजयदे
वेन भणितं तस्याः सकाशात् परमफलतया पवितं अधरत्वमित्यर्थः॥ पुनः कीदृशं अधरीकृतोष्ठपुटीकृत
हारं श्रीराधा ओष्ठपुटी हरति तस्य चुंबनायत गच्छतियस्मादित्यर्थः॥ पुनः कीदृशं उदासितवामं अत
एव उदासितं श्रीराधायाः वामं वक्रतालक्षणं येन तादृशं॥ पुनः कीदृशं अत एव अविरामं श्रीराधायाः
श्रीकृष्णे विरामं शून्यं तन्न गमकमित्यर्थः॥ कीदृशं श्रीराधां कंठतटं श्रीकृष्णस्य आलिंगनसमये कंठ

॥ मामां दृक्ष्यति वक्ष्यति स्मरकथां प्रत्यंगमालिंगनैः प्रीतिं यास्यति रंस्यते सखि समागत्येति चिंताकु
लः सत्वां पश्यति वेपते पुलकयत्यानंदति स्विद्यति प्रत्युद्गच्छति मूर्छति स्थिरतमः पुंजे निकुंजे प्रियः॥ १०॥

भूषणं कंठाभरणमित्यर्थः॥ ८॥ पुनरपि तस्योत्कंठाधिक्यं कथयंती त्वरयति सेत्यादि॥ हे सखि तस्या
यनेन सख्यत्वसाधिके वंचनरहिते वा सा राधा॥ आगत्य मां दृक्ष्यति ईक्षिष्यते॥ दृष्ट्वापि मां स्मरकथां स्मरशो
भेन स्वलितं मधुरस्वकोक्तिं कंदर्पकेलिसूचिकां कामकथां वक्ष्यति कथयिष्यति स्मरगला पंक्त्वा सा प्रत्यं
गं प्रत्यवयवं मम आलिंगनैः प्रीतिं यास्यति॥ युक्तापि मया सह रंस्यते केलिं कलिकरिष्यति इति चिंताकुलः
सकृष्णः स्थिरतमः पुंजे स्थिरांधकारसमूहे निकुंजे त्वां पश्यति॥ समागमसाध्वसेन वेपते पुलकयति अंगा
नीति॥ अथान्तिवालिंगनविनाध्यसन्तुसुखेन रोमांचयुक्तो भवतीत्यर्थः॥ आनंदति संभोगक्रीडां परिकल्प्या

गी.टी. नंदयुक्तो न वेति॥ तेनैव संभोगभ्रमेण स्विद्यति प्रस्वेदयुक्तो भवति॥ पश्चात्सुरतांते पुनरपि मन्मथं दृष्ट्वा॥ निर्गच्छं
तीं प्रत्युद्गच्छति प्रत्युत्थानं कृत्वानुगच्छति॥ त्वामदृष्ट्वा मूर्छति मूर्छामाप्नोति॥ अथवा॥ सप्रियतमः अत्युत्कंठ
यात्वां परोक्षेपि दृष्ट्वा प्रत्युत्थानं करोति॥ दन्तानि नानिर्दितो भूत्वा कंपपुलकस्वेदादिसात्विकविकारान्प्रकटय
२८ तीत्यर्थः॥ साक्षात्समागमे कीदृशोरसोदयो भविष्यतीति केनवकुतूहलाक्रांतेः ततः शीघ्रं गंतव्यमिति भावः॥ प्र
त्यंगमालिंगतेन नवदृष्टाधिकृतलक्षणमालिंगनमुक्तं॥ शार्दूलविक्रीडितं वृत्तं॥ दीपकालंकारः॥ ७०॥ ॥
श्रीकृष्णस्य प्रेमानुवर्णयंती नामभिसारोचितनिबिडांधकारस्योद्दीपनत्वमनुवर्णयंती पुनरपि त्वरयति॥ अक्ष्णो

अक्ष्णोर्निक्षिपदंजनं श्रवणयोस्तापिच्छगुच्छावलिं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकं॥
धूर्तानामभिसारसाहसहृदां विष्वग्निकुंजे सखि ध्वांतं नीलनिचोलचारु सुदृशां प्रत्यंगमालिंगति॥७१॥

रित्यादि॥ हे सखि ध्वांतमंधकारः निकुंजे अत्र तामंडपे विष्वक् सर्वतः सुदृशां सुंदरलोचनानां धूर्तानां पुरुषवं
चकानां अभिसारसत्वरहृदां अभिसारे सत्वरं हृदयं यासां परमविदग्धविलासिनीनामित्यर्थः॥ तासां प्रत्यंगं प्र
त्यवयवं आलिंगति आश्लिष्यति॥ किं कुर्वन्॥ अक्ष्णोर्नयनयोरंजनं कज्जलं निक्षिपद्ददयत्॥ श्रवण १८
योः श्रोत्रयोस्तापिच्छगुच्छावलिं श्यामपुष्पावलिं इंदीवरपंक्तिं वा वासंतिमल्लिकापुष्पगुच्छपंक्तिं वा कुच
योस्तनयोः कस्तूरिकापत्रकं मृगमदचित्ररचनां चित्रं निक्षिपत्॥ कीदृशं ध्वांतं नीलनिचोलचारु भूषामप्रच्छ
दवत्सुंदरं॥ अभिसारोचितवस्त्राभूषणादिकं सर्वं ध्वांतमेव करोतीत्यर्थः॥ अतो भूषणादिनिर्माणेनापिका

लातिक्रमो न युक्त इति भावः॥ शार्दूलं वृत्तं॥ तथा च स्त्रीणामलंकरणादिरचनाधिकारेण पुंसकादीनामेवेति नपुं
सकनिर्देशेन ध्वनितं॥ अपि च॥ भूषामसुंदरेणैव सर्वं भूषादिकं संपादनीयमित्यजनमंडनविलंवेनेति तस्मादृणात्
ध्वनितं॥ धूर्तः स्याद्वंचके लोके च॥ ७१॥ किंच॥ नवादृशीनां प्रेमपरीक्षाकारणमप्येतदित्याह॥ काश्मीरेति॥ का
श्मीरवत्कुंकुमवद्गौरं वपुः शरीरं यासां तादृशीनामभिसारिकाणामभिसारपराणां नायिकानां यिकानां॥
अभितः सर्वतः रुचिमंजरीभिः कांतिपरंपराभिः॥ आबद्धरेखमाबद्धरेखायेन तादृशं एतत्तमालदलनीलत
मंतमालवत्पल्लववदतिश्यामेन नीलं तमिस्रं तमस्तत्प्रेमहेमनिकषोपलतां तासामभिसारिकाणां यत्प्रेमत

काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो रुचिमंजरीभिः॥ एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति॥७२॥

देव हेमस्वर्णं तस्य निकषोपलतां कषपाषाणतां तनोति विस्तार
यति॥ परमकांतिमतीनां एतादृशपिंगांधकारे कांतारे सर्वमुपेक्ष्य कांताभिसारप्रस्थानेन प्रेमणा शुद्धिः॥
परीक्ष्यत इति भावः॥७२॥ परमविदग्धसखी रसोद्बोधवंचनकदंबैः संकेतनिकुंजसमीपमानीय लज्जावतीं
पुनरपि निकुंजप्रवेशनायादिशतीत्याह हारावलीत्यादि॥ अथ अयानंतरं इयं सखी राधा इति वक्ष्यमाणं सुतां च
कीदृशीं निकुंजनिलयस्य निकुंजमेव निलयो निवासस्तस्य द्वारे हरिं श्रीकृष्णं निरीक्ष्य दृष्ट्वा ब्रीडावतीं लज्जा
युक्तां॥ प्रथमसमागमे कामिनीनां लज्जा भवतीति लज्जावतीत्युक्तं॥ कीदृशस्य निकुंजनिलयस्य॥ हारव
ल्लोहारं पंक्तयस्तरलो मध्यमणिः कांचनकांचिदाम॥ स्वर्णरचितमेखलादाम मंजीरो नूपुरं कंकणं करन्

षणांए ने सुखचितायेमणयस्तेषांद्युत्या दीपितस्यप्रकाशितस्य॥ तरलश्चंचलो रवंडे हारमध्यमणा वृषीतिवि
श्वः॥ निजयश्वोरमंदिमिंरेति कोषः॥७३॥ तदेवगीतेनाहमंजुतरेति॥ गीतस्यास्य वराडीरागः॥ मंठताजः॥ गी
तार्थस्तु॥ हेराधेमाधवसमीपंकुसांतिकंप्रविशइहमंजुतरकुंजतलकेलिसदनेमंजुतरंयत्कुंजतलं तेनिकुं
१२५ जाभ्यंतरं देशस्तदेवकेलिसदनं क्रीडामंदिरं तत्रविलसविलासंकुरु॥ कीदृशि॥ रतिरभसेन सुरतोत्साहेन
हसितंहास्ययुक्तंवदनंमुखंयस्यास्तादृशि॥ रतिरभसहसितंविद्यतेस्यासोरतिरभसहसितवान् कृष्णस्तस्या
नः प्राणोयस्याःसातत्संबोधनमितिवा॥ श्रीकृष्णस्यप्राणा नूपेइत्यर्थः॥ अथवा॥ इहनिकुंजे प्रविशमाधव

हारावलीतरलकांचनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य॥ द्वारेनिकुंजनिलयस्यहरिंनि
रीक्ष्यव्रीडावतीमथसखीनिजगादराधां॥७३॥ ॥मंजुतरकुंजतलकेलिसदनेप्रविशराधेमाधवा॥ समी
पमिहविलसरतिरभसहसितवदने॥१॥
समीपंविलासंसंभोगंकुरु॥ हेमंजुतरकुंजतलकेलिसदने १२५
॥ मनोहरतरकुंजतलमेवक्रीडागृहंयस्यास्तादृशि॥ अथवा॥ इहमाधवविलस॥ कीदृशे॥ मंजुतरकुंज
तलकेलिसदनंयस्यतादृशे॥ पुनःकीदृशेरतिरभसेनहसितंवदनंयस्यतादृशे॥ प्रविशराधेमाधवसमी
पमिहविलसेत्यंतं ध्रुवपदं॥ प्रतिपदमनुवर्त्तमानत्वात्॥ माश्रीस्तस्याः धवः माधवः सौंदर्यनिधानइत्य
र्थः॥ वक्तनायाः समागमेनिरवधिसौंदर्यप्रकटनान्माधवपदमुपात्तं॥ कुंजतरपार्श्वेप्रकृष्टकुंजइत्यर्थः
॥१॥ अपिच॥ नवेति॥ कीदृशेकेलिसदने॥ नवंनूतनंभवत्शोभमानंयदशोकदलंपल्लवंशोकपत्रंतन्निर्मितं
शयनंशय्यातदेवसारोयुवतीनांमहाधनंयत्रतादृशेमाधवसमीपंप्रविशशय्यायांविलसेत्यन्वयः॥ एवंन

नवेष्टशय्यायांप्रविशविलसेचेतिवा॥ कीदृशि॥ कुचकलशयोस्तनकुंभयोः॥ तरलश्चंचलोहारोयस्यास्ता
दृशि॥ अपरस्मिन्नपिविलासगृहेमहाधनंतिष्ठतीति ध्वनितं कुचकलशातरलहारेइत्यनेनविपरीतसुर
तंसूचितं॥ तत्रकलशहारयोःसंभोगारंभेमंगलाचरणमिति ध्वनितं॥ अथवा॥ नवसदशोकदलैः कृष्ण
निर्मितशय्यायांसारःश्रेष्ठंयस्याःसातावप्रक्षाननिर्देशः॥ तस्यसर्वस्वरूपेइत्यपि॥ तस्याएवसंबोधनं॥ अ
थवा॥ तादृशंशयनमेवसारोयस्यास्तादृशि॥ अथवा॥ इहमाधवेविलस॥ कीदृशे॥ त्वदर्थंरचितंश
यनमेवसारोयस्यतादृशे॥ अथवा॥ नवलसदशोकदलशय्यायांवरांगनायामहाधने॥ पुनःकीदृशे
॥ पुरुषकर्तृसंभोगादौत्वत्कुचकलशयोरुपरिचंचलोहारोयस्यतादृशात्र्यशोकदलपदेनाशेषविरह

नवलसदशोकदलशयनसारे॥ प्रविशराधेमाधवसमीपमिहविलसकुचकलशतरलहारे॥२॥

दुःखहानिरानंदावाप्तिश्चभविष्यतीतिध्वनितं॥ अथवापरमश्रृंगारस्यस्यश्रीकृष्णस्यसमीपंसानिध्यंनि
कटंप्रविशगच्छपश्चाछय्यायांपुष्पादिनिर्मितायांविलासशय्यायांविलसश्रीकृष्णेनसहक्रीडांकुर्वित्यर्थः॥
२॥ कुसुमचयेति॥ हेराधेइहकुसुमचयेनपुष्पसमूहेनविचित्रवितानेर्विविधमंडनादिभिःश्रुचिश्चउपह
तं॥ अनुपभुक्तं॥ अथवा॥ शुचिःश्रृंगारस्तत्स्वरूपंश्रृंगारप्रधानानांभोगयोग्यंवा॥ कृष्णेननिर्मितंतन्नि
गार्थवासगेहंलीलागृहंतत्रविलस॥ कीदृशि॥ कुसुमादपिसुकुमारोदेहोयस्यास्तादृशि॥ अथवाइहमा

धवेविलस॥ कीदृशे कुसुमचयेन रचितं शुचिवासगेहं येन तादृशे॥ पुनः कीदृशे कुसुमादपि सुकुमारो देहो य
स्यास्तादृशे॥ अथवा॥ कुसुमचयेन रचितं॥ असमर्थात्कि स्मिनवासगेहं यस्यास्तादृशीति संबोधनं॥ प्रविश्य रा
धे महत्त्वे विरसः प्रणयः आसमयः रूऽधकंपः प्रकृष्टस्तदीय प्रणयकंपः समग्रसात्विकविकारो यस्यास्तादृ
२५ शि इत्यपि संबोधनं॥ श्लेषकथने सखत्वानानाम नेद इत्यलंकारिका॥ तथाच॥ तादृशाराध्याऽरचनेन तस्य त
यिनावस्तमपि स्वत्समीपे उदितसात्विकविकारेति विजसे त्यर्थः॥ युद्धेधकंपनेतथेतिच॥ प्रणयः प्रसरे वेशे
विसरः प्रसरे वुमे इति विश्वः॥ हे कुसुमसुकुमारदेहे॥ कोऽप्यथिन्यां सुश्रोणि मानामान्नो नायस्य कुसुमः श्री

कुसुमचयरचितशुचिवासगेहे॥ प्रविश राधे माधवसमीपमिह विलस कुसुमसुकुमारदेहे॥ ३॥

कृष्णः तस्य सुरतांबुंऽ अनाश्रितत्वे नाश्रयो मारः कामस्तद्रूपो देहो यस्यास्तादृशि॥ कृष्णानिकांक्षितसद्रू
पेइत्यर्थः॥ अथवा॥ हे राधे श्रीकृष्णेन राधयितुं साधयितुं वश्री कर्तुं योग्ये॥ इह कुंजसदने प्रविश्य प्रवेशे कु
रुमाधवस्य शृंगारलीलायाधवस्य पते॥ श्रीकृष्णस्य समीपं सन्मुखं वे विलससंचुंबनादिक्रियां कुरु कराकृ ११६
दिक्रियां वा विविधविलासे वाक्रीडां कुर्वित्यर्थः॥ मत्तोनावं वा कुरुतवचनोल्लित त्वादितिनावः॥ वामाधव
समीपं प्रविश्य इह अस्मिन् माधवे विलस॥ यद्येहं वा प्रविश्य येहं वा विलस स्वाधीननर्तत्वा नियमोन
वक्रयोमये तिवाकार्थश्च॥ ३॥ चलेत्यादि॥ हे राधे प्रियरमणयोग्ये माधवसमीपं चलव्रज॥ इह केलिसद

१९

ने प्रविश्य विलसच॥ कीदृशे केलिसदने॥ मलयपवनसंबंधीयः पवनो वायुस्तेन सुरभीकृतेन॥ अथवा॥ चलश्चंच
लो यो मलयवनपवनस्तेन विलासितो मनंसि चालयतीति चलपदेन माद्यमेवोक्तं॥ कीदृशि॥ रतौ वलितं वर्द्धि
तं ललितं हाव विशेषगवगीतं यथा तादृशि॥ अथवा॥ रतिवलिते कल्पवली कामधेनुइति॥ ललितगीते लालि
तं कमनीयं गीतं गानं यस्यास्तादृशि॥ रतिवलिता चासौ ललितगीता च तस्याः संबोधनं॥ रसवलितपाठे रसव
लितं शृंगाररसंमिश्रं ललितं मनोहरं गीतं यस्यास्तादृशि॥ रससहितं हावविशेषो गीतं यस्यास्तादृशी वा॥ अथ
वा॥ इह कुंजे विलस॥ कीदृशे॥ रत्यातव प्रेम्णा वलितं संयुक्तं ललितं मनोहरं गीतं तवगुणगणं यस्य त

चलमलयवनपवनसुरभिशीते॥ प्रविश राधे माधवसमीपमिह विलस रतिवलितललितगीते॥ ४॥

दृशे॥ रसवलितं वा॥ ललितलक्षणं तु॥ नानाविधमनोहार्यस्वनावजमनोहरं॥ शृंगारचेष्टितं स्त्रीणां ललि
तं संप्रचक्षते इति॥ अथवा मानात्वेन मानं तस्य धवः तव मानप्रदः स्वामी तस्य श्रीकृष्णस्य समीपं नेत्रगोच
रं यथा स्यात्तथा प्रविश्य प्रकर्षेण नूपुरादिरवेण विशागच्छ॥ इह अस्मिन् कुंजे नवरत्नाख्यायां विलस विवि
धतया लसक्रीडां कुरु त्वमेव पुरुषायितानवेति विपरीतरतया अस्याः एव क्रियां कथयतीत्यनेनेव॥ अ
स्याः एव पुरुषायितमुक्तमिति नावः॥ अथवा प्रियउत्साहनाय प्रियायाः कर्तकिपाशो उपदिश्यति पुनः पु
नः प्रविश्य विलसमाधवसमीपमिहेति यदेरिति नावः॥ ४॥ ॥७॥ ॥

वितते त्यादि॥ हे राधे रः कामस्तस्य आधिमानसपीडा वा प्रियकाम हरिके माधवमानं धूयतिवः आनंदप्रदः मा
धवः श्रीवः स्तस्य समीपं पार्श्वं प्रविश त्वम् वेन्नां कुरु॥ इह केलिसदने चिरं विलस च विलासम् रसं संपादय॥ कीदृ
शे वितते विस्तीर्णे वकुलनिवहैः नीनां जनानां नवैः पल्लवैर्घने सो द्रेएवं नृते त्वायनेवा॥ त्वं कीदृशि॥ अलसपीन
जघने॥ अलसे मंथरे पीने मांसले जघने यस्यास्तादृशि॥ अनेन निर्नयं वकुकाले गुच्छायां संभोगसुखानुब
धं ध्वनितमिति व्यंग्यं॥५॥ मधुमुदिते त्यादि॥ कीदृशे केलिसदने॥ मधुना पुष्परसेन मुदितानां नंदितानां निया
नि मधुपकुलानि भ्रमरसमूहा स्तैः कलितो विहितो रावः शब्दो यत्र तादृशे॥ अथवा मधुमुदित मधुपकु

विततवकुलनिवहनवपल्लवघने॥ प्रविश राधे माधवसमीपमिह विलस चिरमलसपीनजघने॥५॥ ७७
मधुमुदितमधुपकुलकलितरावे॥ प्रविश राधे माधवसमीपमिह विलस मदनरसरसभावे॥६॥

लवत्तरागमनमहोत्सवे रावः॥ शब्दो यस्य तादृशे माधवे॥ तस्याः श्रीराधायां॥ संबोधनं वा कीदृशि मदन
स्य कामस्य यो रसः शृंगाराख्यस्तत्र यो रसस्तेन उपलक्षितो भावो यस्यास्तादृशि अथवा॥ इह माधवे वि
लस॥ कीदृशे॥ मदनरसेन यो रसस्तेनोपलक्षितो भावो यस्य तादृशे॥ सरसभावे इति पाठे सरसः सरागो
भावो भिप्रायो यस्याः तादृशि॥ यद्यपि मधुपेत्यनेनैव मधुपानं प्राप्तं तथापि तदानीं तनमधुपानप्राप्तये मु
दितमित्युपात्तं॥ मधुना वसंतेन वा॥ हे राधे प्रियाराधिते॥ माधवस्य मदनमोहनस्य समीपं समक्षं मोहनार्थं

प्रविश पुष्पकरी व लब्धवतस्य दृशिं देही त्यर्थः पश्चादिह तस्य समीपे केलिसदने विलस मदनकीडां कुरु यथेष्टमि
ति भावः॥६॥ मधुतरेति॥ कीदृशे केलिसदने॥ मधुरतेरतिशयेन मधुरो यः पिकनिकराणां कोकिलसमूहानां
निनदः शब्दस्तेन मुखरे वाचालः अथवा॥ श्रीराधायाः संबोधनं॥ तदा मधुरतरा पिकनिकराणामिव यो निन
दः सुरते कंठकूजितं तेन मुखरे॥ पुनः कीदृशी दशनरुचिरेन्चदंतकांतिरेव रुचिरं शिखरं माणिक्य विशेषो
यस्यास्तादृशि॥ दंतकांतिर्यस्यास्तादृशि द्वितीयपक्षे विपर्ययो सोपमा॥ बोध्या॥ तदुक्तं दंडिना॥ त्वदाननमिवोन्नि
द्रमरविंदमभूदिति शिखरादपि रुचिरा दंतकांतिरित्यर्थः॥ अथवा दशनरुचिवत् रुचिवत् रुचिरं शिखरं मा

मधुरतरपिकनिकरनिनदमुखरे॥ प्रविश राधे माधवसमीपमिह विलस दशनरुचिरुचिरशिखरे॥७॥
विहितपद्मावतीसुखसमाजे॥ कुरु मुरारे मंगलशतानि भणति जयदेवकविराजराजे॥८॥ ॥२१॥ ॥

णिक्य विशेषो यस्यास्तादृशी॥ इह माधवे विलस कीदृशे॥ मधुरतरः पिकनिकराणामिव त्वत्संगमे गोष्ठी शब्दस्तेन
मुखरे॥ अनेन गोष्ठी छत्रमिः कथिता॥ पुनः कीदृशे॥ दशनरुचिरुचिरशिखरे॥ मधुतरल पाठे॥ मधुनात
रलश्चांचल इति॥ पक्कदाडिमवीजानं माणिक्यं शिखरं विदुरिति शाश्वतः॥ अथवा॥ हे राधे स्वकीय तस्या
पि सवर्थिसाधिधीके इह केलिसदने प्रविश लज्जां त्यक्त्वा प्रियसन्मुखीन व माधवस्य परमरमणस्य
समीपं साक्षात्प्रत्यक्षं विलस सर्वशृंगारत्नावं मकात्रायेत्यर्थः॥ अस्मिन्नष्टपद्यां श्रीराधां कृत्यमेव माध

 न्यात् ध्रुवपदाहत्तिः कथितातत्रापिपदेपदेऽयविशेषस्य कथितः ननु राधामाधवयोः सामीप्यं दृष्ट्वा सखा
: प्रपत्तकलित इतिह पविज्ञादेव प्रतिपदे ध्रुवपदोपादानं च अर्थविशेषं चनिरूपितमितिमहान् वाक्यार्थश्च
२२८ ७॥ विहिते त्यादि॥ हे मुरारे जयदेवकविराजराजे मंगलशतानि कुरु॥ कीदृशे जनेति॥ तव गुणान् वदति॥ पु
नः कीदृशे विहितः कृतः पद्मावत्याः श्रीवृंदावनलक्ष्म्याः सुखसमाजः सुखसमूहो येन तादृशे॥ अथवा कविरा
जराजे जगति गायति सति॥ किंभूते॥ विहितः प्रियायाः सुखरूपः समाजः संगमो येन तादृशे॥ नावविशे
षोक्तिरियं॥ कुरु मुधीरे मंगलशतानीति पाठे॥ हे सुधीरे श्रीराधे मंगलशतानि कुरु कीदृशे विहितस्तव
सुखरूपः समाजः प्रियसंगमो येन तादृशे॥ किंच॥ कविराजराजे इति प्रौढोयं कविः॥ तदुक्तं॥ यथोचितनि
जोत्कर्षवादी प्रौढ इतीरित इति॥ तद्रहस्यवर्णनेन सर्वाधिक्यादपि युक्तमेव कविराजराज इति॥ अथवा
पद्मावतीजयदेवकवी॥ पत्नीपरमसाध्वी केनचित् दुष्टेनोक्तं तव पतिर्मृतः तदैवस्याः मरणं जातमेव तत्
क्षणे जयदेव आगतस्तदैव जयदेवेन एषाष्टपदी पठितात दैवसा पिउच्छ्रायसं दैवगानं चकार तदा जय
देवेन हरिः प्रार्थित इत्यत आह विहितेति॥ ननु त्वया केनोत्कर्षेण ज्ञातेतत्राह॥ विहितपद्मावती सुखसमा
जे पद्मावत्याः मृतायाः मम जायायाः पुनः जीवनेन विहितः कृतः मयासह सुखसमाजस्तव कीर्त्तनलक्ष
णः संगमो येन त्वयेति महानुत्कर्षः मृतकजीवनरूपो यस्मिन् त्वयिता दृशे परममंगलकारिणि त्वयि स्व
कीयमंगलकरणे किं अशक्यमिति भावः॥ ननु मंगलकरणे मम किं सामर्थ्यमिति चेत्तत्राह॥ कीदृशे मु २२८

रारे राजराजेरा त्वां विदुषुवादिनां ईश्वराणामपि महाराज्ञि परमस्वतंत्र तरे जयदेवकविः इति जगति सखाः सका
दितिपाठे इतीति किं॥ हे मुरारे श्री राधिकाया दृढालिंगनदात्रे श्रीराधयासह मंगलशतानि क्रीडासमूहानि मंग
लानि कुरु संपादयेत्यर्थः॥ अथवा जयदेवः नायमित्तानां नतरं प्रार्थयिते॥ जयदेवकविराजराजे इति तिशेषः इ
ति जगति इतीति किं हे मुरारे मुरस्य मारणस्तवा वस्य महादैत्यत्र्पस्य मृत्योः नस्यैव अरेत्राणुरूपेण तु मम ना
यिकाः अरे इत्युपालंभे संबोधनं॥ विहितायाविवाहितत्वात्रवढासीत्वाञ्च पद्मावत्या मम नार्याया सह सुखस
माजे तव नजन समागमे सति मयि मंगलशतानि तव नजन यरं परागिकुरु संपादय इति प्रार्थनाविषयार्थं
कविराजराजेतिउत्कर्षोक्तिरिति भावः पद्मावत्या विनेत्यर्थः॥ ८॥ ॥ वैचित्र्येंतरेण प्रेरयति त्वामित्यादि॥ अयं
श्रीकृष्णः॥ अन्याभिः सुंदरीभिः कुः प्राप्तः॥ त्वयासुलभत्वेन वशीकृतस्त्वां चित्रे मनसावहन् धारयन् अति
श्रांतोतितरां येन श्रमयुक्तो जातः॥ कंदर्पेण कामेन तत्रामतिताये न तापितः अतिसूक्ष्मे चित्रे पीन स्तनज
यनवत्वात्स्वेधारणे न श्रमो युक्त एव॥ अन्योपि यो धर्मे गुरुतरभारोद्वहनं कुरुते तेन स्याप्यतिश्रमो नवनीति
भावः॥ अनस्त्वैव सुधयामृतेन संवाधं संकटं विंबाधरं विंबफलसदृशाधरं मोक्षपातुमिच्छति॥ एतद
पियुक्तमेव॥ श्रांतस्य तमस्य पानेच्छा पथ्यमेव॥ तत्रस्माद्धेतोरस्य कृष्णस्य अंकं क्रोडं क्षणं त्वमलंकुरुतत्
षयनत्वयं वक्तुनार्यत्तुरक्तो तस्तदंकारोहणादिनेत्यत आह॥ इह कृष्णं कुरुतः कस्माद्धेतोः संन्नमः
॥ नयं कीदृशे॥ उपसेवितं लदीयं चरणकमलं येन तादृशे॥ उपसेविने ति॥ नित्यपार्श्ववर्तिनीतिभावः

तत्रहेतुगर्भविशेषणमाह भ्रूक्षेपेति॥ भ्रूक्षेपस्य भ्रूचालनस्य या लक्ष्मीः संपत् तस्याः यो लेशः स्तेन क्रीते॥ दास इव जनेसंभ्रमो न युक्त इति भावः संभ्रमः स्याद्दरे त्वरा तो संगमे चादरेचे ति विश्वः॥१॥ सेत्यादि॥ सा मानवत्यपि
११८ राधा निवेशनं वासगृहं प्रविवेश प्रविष्टा॥ किं कुर्वाणा मंजुमनोहरे यौ मंजीरे नूपुरे तौ सिंजनात् शब्दं कुर्वती॥ सिंजानमंजुमंजीरमिति पाठे सिंजानश्चासौ मंजुमंजीरश्च तद्यथा स्यादिति क्रियाविशेषणं प्रविवेशेति॥ ननु मोहनायकिमपि शावादिकं प्रकर्त्तव्यं तत्प्रविवेशेति भावः॥ कथं यथा स्यात्॥ ससाध्वसं साध्वससहितं सानंदमानंदं

त्वां चित्तेन चिरं वहन्नयमतिश्रांतो भृशं तापितः कंदर्पेण च पातुमिच्छति सुधासंबंधबिंबाधरं॥ अस्यांकं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दास इवोपसेवितपदांभोजे कुतः संभ्रमः॥१॥
सा ससाध्वससानंदं गोविंदे लोललोचना॥ सिंजानमंजुमंजीरं प्रविवेश निवेशनं॥१६॥ ॥छ॥ ११८

सहितं च यथा स्यात्तथा॥ कीदृशी सा॥ गोविंदे लोले चंचले लोचने यस्याः सा॥ सिंजानामंजुमंजीरमित्यनेन कंपः सात्विकस्तेन पादस्खलनं हर्षसाध्वसो व्यभिचारिणावौ लोललोचनेत्यनेनानुभवः कटाक्षरूपः॥ यथा वाय लो व्यभिचारिभावः पर्यवंनागरयोः समागमे रसोत्पत्तिरुक्ता॥१६॥ लीलागृहे प्रवेशं निरूप्य दर्शनी दशनिमलोत्सवेन रसविक्रियां गीते नाह॥ राधावदनेत्यादि॥ गीतस्यास्य वराडी रागः॥ रूपकतालः गीतार्थस्तु॥ सा राधा हरिं श्रीकृष्णं ददर्श दृष्टवती॥ कीदृशं एकरसं एको मुख्यः शृंगाराख्यो रसो यस्य तं॥ अथवा

एक एव राधाविषयो रसः सर्वातिशायितरागो यस्य तं॥ राधायाया दृशोरसः कृष्णस्यापि तादृश एवेति वा समानशीलत्वात्॥ समानशील व्यसनेषु सख्यमिति रसपोषणं भवतीति भावः॥ पुनः कीदृशं॥ चिरं चिरकालेन अप्यत्र अभिलषितो वांछितस्तत्संबंधी विलासः केलिर्येन तं॥ पुनः कीदृशं॥ गुरुर्महान् हर्षः प्रिया प्राप्ता हर्षश्चानंदस्तस्य वशं वदमायत्तं प्रफुल्लितं वदनं यस्य तं॥ अनेन उद्भटविकार उक्तः संवरणायोग्यत्वेन तदधीनत्वात्॥ पुनः कीदृशं॥ अनंगविकासं कामसदृशं॥ अनंगविकासमिति पाठे कामस्य विकासः स्फूर्त्तिर्यस्य तं॥ गुरुहर्षवशंवदनमनेन हरेरनुरागाभिलषितविलासत्वे चावगते इति भावः॥ तदुक्तं॥ आकारैरिंगितै

राधावदनविलोकनविकसितविविधविकारविभंगं॥ जलनिधिमिव विधुमंडलदर्शनतरलिततुंगतरंगं॥१॥ हरिमेकरसं चिरमभिलषितविलासं॥ सा ददर्श गुरुहर्षवशंवदवदनमनंगविकाशं॥ ॥ध्रुवपदं॥

र्गत्या चेष्टया भाषितेन च॥ नेत्रवक्त्रविकाराभ्यां लक्ष्यतेंतर्गतं मन इति ध्रुवपदं॥ अथ पदानि
राधेत्यादि॥ पुनः कीदृशं हरिं॥ राधायाः यद्वदनं मुखं तस्य विलोकनेन वीक्षणेन विकसिता उल्लसिताः विविधा नानाविधा विकारा जंभणांगक्षेपणकरविमर्द्दादिरूपास्त एव विभंगाः विशिष्टोर्मयो यस्मिन् तं॥ कमिव॥ जलनिधिमिव॥ समुद्रमिव॥ कीदृशं जलनिधिं॥ विधुमंडलस्य चंद्रमंडलस्य दर्शनेन तरलिताश्चंचलीकृता स्तुंगा उच्चास्तरंगा ऊर्मयो यस्य तादृशं॥ अत्रागाधशृंगाररसाश्रयत्वेन कृष्णस्य जलनिधि

गी. टी. साम्यं॥ राधामुखस्याल्हादकारित्वादिना चंद्रसाम्यं॥ त्वं नांगनिरूपांगविकारस्येतरेतरे तत्र तयातरंग
साम्यं बोध्यं॥ उपमालंकारश्च॥ अथवा सा सखी क्रमन्मुखी श्रीराधा हरिं मनोहरं रूपं स्वपराय एणांवाश्रीहि
१२० ष्णं दद्दृशे चिक्षु विषयं सर्वांगमपि विलोकितवती॥ कीदृशं हरिं एकरसं स्वस्याः प्रति एकरसं तां प्राप्तं॥ पुनः
कीदृशं चिरं अभिलषितविलासं चिरं सर्वदैव नोगावसरे तदुपरते च अभिलषितः सर्वांगितः लषितः ईप्सितः वि
लासो यस्य तं॥ अथवा अभिलषितः सर्वांगे लषितः चित्रितः चिक्रितः विलासो नखदंतघाताद्दिलक्षणः क्रीडा
विनोदः स्वस्याः यस्य तं स्वस्या येन वा तं॥ पुनः कीदृशं गुरुहर्षवशं श्रीराधागमनेन गुरुः अधिको यो हर्षः त

हारममलतरतारमुरसि दधतं परिलंब्य विदूरं॥ स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं॥२॥

धदृशं श्रीराधायाः वक्त्रोल्लसितं॥ अत एव हास्यपरया वदवदनं श्रीराधा प्रतिवदनं वदनं न्यायमानं सुखं यस्य
तं॥ पुनः कीदृशं अनंगविकारं श्रीराधायां स्वस्यापि कामप्रकारा कइति ध्रुवपदं अभ्यस्तमानं॥१॥ वि
कारनिवाह॥ हारमित्यादि॥ पुनः कीदृशं विदूरमतिशयेन परिरम्यालिंग्य उरसि वक्षसि हारं दधतं बिभ्राणं की
दृशं॥ अमलतरीश्च तिशयेन विमलतरः तारः स्थूलो मौक्तिकं तेन ताद्दृशं॥ कमिव॥ स्फुटतरः प्रकटतरो यः १२०
फेनसमूहस्तेन करंबितं मिश्रितं यमुनाजलपूरमिव प्रवाहमिव॥ अत्र कृष्णशरीरस्य श्यामस्निग्धतया सौंद
र्यपिरयाच यमुनाप्रवाहसाम्यं हारस्य चातिशुभ्रतया फेनसमूहसाम्यं बोध्यं॥ अत्र हारालिंगनेन स्वाभिला

षप्रकटनान्मोट्टायिताख्यो हावोत्र वर्णितः॥ तदुक्तं रसार्णवसुधाकरे॥ स्वाभिलाषप्रकटनान्मोट्टायितमिति॥
तारो मुक्तादिसंशुद्धौ तरले शुद्धमौक्तिके॥ तारस्थूरजते शुभ्रेरप्यन्यदवरीरितमिति विश्वः परिलंबि विदूरमिति
पाठे अतिशयेन दीर्घमित्यर्थः॥ तदापि स एव भावः॥ उरसि धारणेनालिंगनप्राप्तिः॥ हारस्य श्रीराधा हृत्संस्पर्श
त्वेयं॥ अथवा श्रीराधायाः उरसि हारं विदूरं त्वदूरादागतं गजमुक्ताफलं च दुर्मूल्यं वा विदूरं च अमूल्यं च हरत्री
ग्रंवा श्रीराधया आगमन वर्धयिनायदधतं श्रीराधायाः उरसि कंठाद्दधेनागेस्तनो परिधारयंतं॥ किं कृत्वा
परिरम्य गाढालिंगनं कृत्वा आलिंगतच्छलेन लघुलाघवतया स्वउरःस्थंतदुरसि धृतवानित्यर्थः॥ वा तत्सम
ये प्रथमसमागमाच्च विदूरं यथास्यात्तथा दूरादेव परिरम्य हारं उपहारतया दधतं तस्याउरसि अर्पितवंत
मित्यर्थः॥ कीदृशं हारं अमलतरतारं श्रेष्ठतरसुवर्णसूत्रगूढितं॥ अमलनिर्मलतरश्चातिशयेन निर्मलो
नि आमलकप्रमाणानि ताराणि मुक्ताफलानि यस्मिन्वा तं श्रीराधायाः उरसि स्थितयोः हारकुचयोः उप
मा जाता तदाह स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं प्रकटफेनमिश्रितयमुनाजलपूरमिव हा
रोपमा फेनतुल्यं यमुनाजलोपमा तुल्या श्रीकृष्णरूपामोपमा श्रीराधा उरसि हारकुचयोर्मंडनगीतमित्य
र्थः॥२॥ पुनः कीदृशं॥ श्यामलेत्यादि॥ श्यामलं नीलं मृदुलं कोमलं कलेवरं मंडलं शरीरं मृदुलं यस्य तं॥ अ
त एवाधिगतं अधिकं परिधेयत्वेन प्रियात्वपमा हृत्पातस्था तं॥ गौरं स्वर्णपीतं दुकूलं पट्टवस्त्रं येन तं॥ अनेन
गौरांग्यास्तेन सहजतावृष्टेनालिंगनेन परमप्रीत्या नविष्यतीति ध्वनितं॥ तदुक्तं प्रियमनुकृतवचोविन्न

मावेष्टयंती द्रुममिव शृंगारलांगी मंदसीत्कारदीर्घं वदनमुद्रितलेखाकंदती चुंबनार्थं नमयति विनतांगीय
स्तनावेष्टितं तदिति॥ कमिव॥ नीलनलिनमिव॥ श्यामकमलमिव॥ कीदृशं नीलनलिनं॥ पीतोयः परागः
२२१ पुष्परेणुस्तस्य पटलं समूहस्तस्य योन्तरीति न्यायस्तेन वलयितं वेष्टितं मूलं यस्य तादृशं॥ अत्र कृष्णस्य नि
र्घे सौगंध्यसौकुमार्यश्यामत्वेन नीलोत्पलसाम्यं॥ पीतपट्टांबरस्य च मूलतत्पीतपरागसाम्यं॥ दृष्टांतदार्ष्टां
तेनैवोद्दीपनविभावश्च दर्शितः॥ उपमालंकारश्चापि॥ बहिर्मूलपरागावृतत्वान्नावादभूतोपमेयं॥ ३॥ ॥
तरलेत्यादि॥ श्रीराधावलोकनार्थं तरलश्चंचलो योदृगंचलः कटाक्षस्तस्य चलनेन मनोहरं सुंदरं यद्वदनं

श्याममृदुलकलेवरमंडलमधिगतगौरदुकूलं॥ नीलनलिनमिव पीतपरागपटलभरवलयितमूलं
॥ ३॥ तरलदृगंचलचलनमनोहरवदनजनितरतिरागं॥ स्फुटकमलोदरखेलितखंजनयुगमिव शरदि तडागं॥ ४॥ २२२

तेन जनित उत्पादितो रतिरागो राधायाः सुरतेच्छा येन तादृशं॥ अथवा॥ कटाक्षयुक्तं सुंदरं यद्वदनं श्रीराधायास्ते
न उत्पादितं संयोगेच्छा यस्येति॥ अनेन कांतादृष्टिरुक्ता यथा॥ आपिबंतीव दृग्यस्यायासा विज्ञाति निर्मला॥ स
भ्रूक्षेपकटाक्षा च कांता मन्मथवर्धिनीति कमिव॥ शरदि शरत्काले स्फुटकमलोदरविकसितपद्मगर्भे खेलितं
क्रीडितं खंजनयुगं खंजरीटयुगलं यत्र तादृशं तडागमिव अत्र यौवनाविर्भावात् स्वच्छकांतिमत्त्वया श्री
राधादर्शनसंक्षुभितान्नायत्वेन चरमाधारतया पिकृष्णस्य शरत्कालीनसरोवरसाम्यं वदनस्य विकसितप

द्मसाम्यं॥ तन्मध्ये चांचल्येन विचित्रसौंदर्येण च नेत्रयोः खंजरीटयुगसाम्यं॥ द्वितीयव्याख्याने पितत्कटाक्षाश्रय
त्वात् कृष्णस्य सरोवरसाम्यं युक्तमेव॥ शरत्काले जलान्यायस्य कमलजगर्भे खेलन खंजनोदृष्टः सन्नयथाहं घुवंछि
तं प्रयच्छतीवं तदपांगवत् कृष्णवदनदर्शनं श्रीराधायावांछितं केलिसुखंदास्यतीति शरत्कालीनपद्ममध्यखं
जनोपमानेन ध्वनितं॥ तदुक्तं वाराहसंहितायां हेमसमीपमितो वरलोजहरितोपनष्टेषुदधिपात्रधान्य
करेहष्टो नीष्टानिचेष्टतेविहगइतिच॥ भ्रूमे सुगौ भुगज वाजिमहोरगेषु राज्यप्रदः कुशलदः शुचिरुज्वलेषु
॥ स्यात्खंजनस्त्वपितडागस्के जलाधार इति श्लेषे विभ्रमः॥ युक्तोपमालंकारोयं॥ तत्रक्षणां स्मितपुष्पो
ज्वलेलोचनेन रंगमिदं सुखमिति॥ पुष्पादिरेफाणां संगत्या युक्तरूपकमिति॥ ४॥ ॥वदनेति॥ पुनः की

वदनकमलपरिशीलनमीलितमिहिरसमकुंडलशोभं॥ स्मितरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं॥ ५॥

दृशं हरिं॥ वदनकमलस्य मुखपद्मस्य परिशीलनाय प्रकाशनाय च अनुलवायवा मिलितो
मिहीरोस्ति यौतिमांसमे सदृशो॥ अथवा॥ तास्यां शोभाकांतिर्यस्य तं॥ अत्र कुंडलयोर्नानामणिखचित
त्वेन सूर्योपमावोध्या॥ प्रियादर्शनाद्विकसितपद्मोपमा वदनस्य॥ अद्भूतायमेयं॥ सर्वथापि प्रपनासा
रः समकृतद्रुवक्वचित्॥ तवाननं विनाती तिताम द्भूतोपमां विदुरिति॥ पुनः कीदृशं॥ स्मितस्येषद्धासस्य
या रुचिः कांतिस्तया रुचिरो मनोहरो यश्च समुल्लसितो राधाधरपानोत्कंठया प्रस्फुरितोईषत्कंपितो यो
धरपल्लवस्तेन कृतो राधायारतिलोभः सुरतेच्छायेन तं॥ अथवा श्रीकृष्णमुखपद्मपरिशीलनायवि

कान्तानायप्रफुल्लायमिलितापामायाराधायाएवमिहिरसमा अतिगौरकांत्यासूर्यतुल्यातयाकुंडलकां
त्यावशोनायस्यतं॥ अथवाश्रीराधायाः वदनकमलपरिशीलनेनसादरावलोकनेनमिलितामिहिरसमा
सूर्यसदृशाकुंडलशोनायस्यतं पुनः कीदृशं दशिश्रीराधायाः स्मितेनमंदहास्येनयारुचिः दंतकांतिः रु
चिरामनोहरोसमुल्लसितोप्रस्फुरितोअधरपल्लवोओष्ठोयोतास्यांश्रीराधायाःअधरपल्लवास्यां कृतःका
रितः रतिनोगः चुंबनादिनोगलालसायस्यतं॥५॥ शशिकिरणेति॥ पुनः कीदृशं॥ शशिकिरणेश्चंद्रकि
रणैः छुरितंसंमिश्रं उदरमभ्यंतरंयस्यतादृशोयोजलधरोमेघस्तद्वत्सुंदरः सकुसुमाः पुष्पसहिताः केशा
यस्यतं॥ अत्रकेशानांश्यामतयामेघसाम्यं॥ अत्रकुसुमानांचमेघांतश्चारुचंद्रकिरणसाम्यंबोध्यं॥ पुनःकीदृ

शशिकिरणछुरितोदरजलधरसुंदरसकुसुमकेशं॥ तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं॥हा॥

शं॥ तिमिरेंधकारेउदितंप्रकटीभूतंयच्चंद्रमंडलंशशिबिंबंतद्वन्निर्मलस्यमलयजतिलकस्यश्यामसुद
रस्यललाटेमंडलाकृतितिलकस्यांगात्अंधकारेपूर्णचंद्रबिंबसाम्यं॥ पूर्णचंद्रोदयेतिमिरस्यासंभवादभू १२२
तोपमेयंबोध्यं॥ चंद्रमंडलाकारतिलकेतिअयमभिप्रायः स्वस्यनंदकुमारत्वानुकरणात्वेनवैष्णवत्वं
दर्शितं॥ तद्यथा॥ विप्राणामूर्ध्वपुंड्रं तुक्षत्रियाणांत्रिपुंड्रकं॥ वैश्यानांमंडलाकारंशूद्राणामर्धचंद्रकंइ
तिस्मृतेरितिवर्णनियमः॥ वैष्णवधर्मेसिवैष्णावेवऊर्ध्वपुंड्रएवनियमः नंदस्यवैष्णवएवतस्यवैष्णवत्वं
श्रीनागवतेक्षादशोनियमेनविख्यातमीतंश्रीकृष्णपुत्रत्वेनविशेषेणैवविख्यातंअतः चंद्रमंडलेसुर

ल्याचंद्रमातुल्यमुज्वलंऊर्ध्वपुंड्रमेव अनेनउज्वलगुणएवलक्षितः ननुमंडलाकारत्वेनिवैष्णवत्वमेवद्योति
तमितिनावः॥हा॥ पुलकेति॥ पुनः कीदृशंश्रीराधायाः दर्शनेनविपुलोयः पुलकनरोरोमांचातिशयस्तेनदं
तुरितंव्याप्तं॥ रतिकेलिकलाभिः रतिसंबंधिनीभिः केलिकलाभिः॥ चुंबनालिंगनादिविशेषचातुरीभिर
धीरंचंचलं॥ श्रीराधायाः अवलोकनेनमणिगणानांमणिसमूहानांकिरणसमूहेनसमुज्वलानिभूष
णानिमुकुटांगदमंजरादीनितैः सुनगंसुंदरंशरीरंयस्यतं॥ मध्याभिसारिकेयंनायिका॥ मध्यालक्षणं॥
तुल्यलज्जास्मरामध्यामोहांतसुरतक्षमा इतितथाचएभिःपदैः कष्टेनविनावानुभावसात्विकव्यभिचारिभिः
सांगःशृंगाररसःस्थायिभावोनिरूपितः॥७॥ श्रीजयदेवेत्यादि॥ हेजनाहरिंप्रणमतनमस्कुरुत॥ किंकृत्वा

विपुलपुलकनरदंतुरितंरतिकेलिकलाभिरधीरं॥ मणिगणकिरणसमूहसमुज्वलभूषणसुनगशरीरं॥७॥

॥ सुचिरंबहुकालंव्याप्य हृदिचित्तेनिविनिधायप्रार्थयित्वा॥ ननुयागादिनादुर्लभत्वेनदेवांतरंनजनी
यंहरेस्तुसुलनतयाकिंतत्राह॥ कीदृशंसुकृतोदयस्यपुण्योदयस्यसारंसारभूतं अथवासुकृतोदयएवसा
रोधनंयस्मात्तं॥ तथाच॥ पुण्योपचयानंतदेवपरमफलंतेनैवपुण्योपचयः तन्नामस्मरणेनैवयागादृष्टपका
रःक्रियते॥ नतंकेपिउपकर्तुंशक्नुवंतीतितस्मैवबुद्धिनेया॥ तस्मादेवविधेयमिति नावः॥ अथवासुकृतोद
यसारंसुकृतोदयस्यनगवद्धर्मस्यउदयःप्रकाशः तस्यैवसारंफलंवासुकृतोदयाशोननकृतः उदयःप्र
काशोययाश्रीराधयातस्याः सारंनोग्यविषयंवासुकृतोदयंश्रीराधोदयमेवसारंश्रेष्ठफलंयस्यतं॥ श्रीज

मुदेव भणित विभवे वाग्विभवे द्विगुणीकृतो भूषणभारो ऽलंकरणसमूहो येन तं ॥ जयदेवसरस्वती स्वयमेवोप
मोत्प्रेक्षाद्यलंकारवती भगवद्गुणोत्कर्षवर्णनीयैः सुतरामलंकृतेति भावः ॥ अथवा ॥ श्रीजयदेवस्य तद्दासस्य भ
१२२ णितविभवेन वर्णितमधुरगुणो द्विगुणीकृतो भूषणैर्भारो येन तं ॥ प्रथमस्तु स्वर्णाद्यलंकारो द्वितीयः का
व्यालंकार विषयतया वर्णितमधुरगुण इति ॥ अथवा ॥ श्रीजयदेवभणितविभवैः राधाविषयिकरसानुभा
वैर्द्विगुणीकृतोलंकरणसमूहो यस्य ॥ प्रथमस्तु भूषणभूषणांगसौंदर्यलंकारः ॥ द्वितीयोपि रसानुभा
वातिशायीलंकार इत्यर्थः ॥ आदौ एकाकी स्थितत्वात् स्वकीय एकैव विभवस्य स्वरूपप्रकाशविभव एव एकं
भूषणं पश्चात् द्वितीयाश्रीराधायाः समागमेन द्विगुणीकृतं द्वितीयं कृतं भूषणभारं अलंकारसमूहं यस्य त
श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं ॥ प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं ॥ च ॥
॥२२॥
वा ॥ च ॥ इदानीं श्रीराधायाः रसविकिक्रियामाह ॥ अतिक्रम्येति ॥ हे सखि यदपराधाद्दूतिदानीं प्रियत १२२
मसमालोकसमये श्रीराधायाः अक्ष्णोर्वर्तमान आनंदसमूहो अश्रुरूपेण पतितः हर्षाश्रुनिकरः पपातेत्यर्थः ॥
ननु समीचीन आनंदोत्थापितः कथं पपात तत्राह ॥ किं भूतयोरक्ष्णोः ॥ तरलतरतारं दधतोः संगे नातिशायेन चं
चलाक्षिकनीनिकं यथा स्यादेवं पततयोः ॥ सौंदर्याधिकेन अतिसतृष्णनिरीक्षणात् ॥ यस्मिन् अंगे दृष्टिः पति
ता पुनरुत्थानासामर्थ्येन तत्रैव स्थिता इति ज्ञापनाय पतितयोरित्युक्तं ॥ तथा च ॥ भावेन पतितेतदा धारव
त्कपपातेति भावः ॥ पातहेतुमुत्प्रेक्षते अतिक्रम्येति ॥ अपांगे नेत्रान्ते दत्तं ॥ अतिक्रम्योर्ध्वं श्रवणप र्य

र्यंतगमनप्रयासेनेव स्वेदांबुपूरप्रसर इव ॥ कर्णविस्ताविधिचलनजन्यायासेन स्वेदांबुपूर इव ॥ अन्योपि दूरग
मनेन श्रांतः स्विद्यति पतति च ॥ तथा चानेन विराजमानयन लंतस्याः स्रवितं ॥ अथवा तगतो हर्षाधिकतयांतः
स्थानमप्राप्य बहुरश्रुव्याजेन पतित इति भावः ॥ उत्प्रेक्षालंकारः ॥ १८॥ भजंत्या इत्यादि ॥ तस्मिन् काले तल्पांत
शय्यासमीपं भजंत्या आश्रयंत्याः मृगदृशो हरिणनयनायाः श्रीराधायाः लज्जापि सलज्जेव व्रीडावती च दूरम
तिशायेन व्यगमत् विगता अतिदूरं वा ॥ कस्मिन् ॥ अवहिता ली परिजने अवहितः कृतावधानो यस्याली प
रिजनः सखीपरिवारस्तस्मिन् गेहात् विलासनिकुंजात् बहिर्यातेगते सति ॥ कथं यथा स्यात् [illegible]याकप
अतिक्रम्यापांगं श्रवणपथपर्यंतगमनप्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयोः ॥ तदानीं राधायाः प्रियतम
समालोकसमये पपात स्वेदांबुप्रसर इव हर्षाश्रुनिकरः ॥ १८॥ भजंत्यास्तल्पांतं कृतकपटकंडूतिपिहितस्मि
तं याते गेहाद्बहिरवहितालीपरिजने ॥ प्रियास्यं पश्यंत्याः स्मरशरसमाकूतसुभगं सलज्जा लज्जापि व्यगमदति
दूरं मृगदृशः ॥ १९॥
टकं डूतिकर्णादिकंडूयनं तेन विहितमाच्छादितं यथा स्यात्तथा ॥ कीदृशायास्तस्याः प्रियास्यं प्रि
यमुखं पश्यंत्याः किं भूतं मुखं ॥ स्मरं सरसं ॥ स्मरेण कामेन सरसं शृंगाररससहितं ॥ पुनः कीदृशं आकूत
सुभगं ॥ आकूतेन तत्र क्रीडाभिप्रायेण सुभगं मनोहरं ॥ स्मरपरवशाकूतसुभगमिति पाठे ॥ स्मरपरव
शं यत् आकूतं अभिप्रायस्तेन सुभगं ॥ १९॥ जयश्रीत्यादि ॥ मुरजितो मुरारेर्भुजदंडो जयति ॥ सर्वोत्कर्षेण व

त्नि॥ मुरेण प्रियालिंगनेन जयो यस्यासौ मुरजित् तस्य मुरजित एवं मुरुजित्पदोपादानं॥ नक्तानां रक्षणाद्युधे
मुक्तर्षमित्यर्थः॥ किंलक्षणस्य॥ कुवलयापीडस्य वा कुंदेडस्य क्रीडयाविलासेनाहतः कुवलयापीडनामा करी ह

स्तीयेन तस्य॥ भुजदंडमुत्प्रेक्षते॥ जयश्रिया विजयलक्ष्म्या विन्यस्तैर्विक्षेपेण दत्तैर्मंदारकुसुमैः पारिजातपु
ष्पैर्महितइव पूजितइव॥ कीदृशएव॥ स्वयमात्मना द्विपेन कुवलयापीडेन यो रणः संग्रामस्तत्र यामुत दर्पस्तेन
सिंदूरेण तत्रामांगे आरक्तमंडनस्य शोभाप्रदत्वमिति मुदित इव॥ चित्रित इव॥ नन्वेवं कथमुत्प्रेक्षते तत्राह॥
प्रकीर्णस्त्रिर्बिंदुः विकीर्णरुधिरबिंदवो यत्र सतथा॥ अनेन सामर्थ्यलक्षणो नायक उक्तः॥ एवंभूते भुजदंडे

जयश्रीविन्यस्तैर्महित इव मंदारकुसुमैः स्वयं सिंदूरेण द्विपरणमुदा मुदित इव॥ भुजापीडक्रीडाहत
कुवलयापीडकरिरण प्रकीर्णस्त्रिग्बिंदुर्जयति भुजदंडो मुरजितः॥ १८॥ इति श्रीगीतगोविंदे एकादशः सर्गः

गाढालिंगनादिना श्रीराधायाः निःशंकक्रीडनं सूचितमिति तात्पर्यः॥ १८॥ इति अभिसारिकावर्णनं सानंदगो
विंदो नामैकादशः सर्गः॥ श्रीराधया आगमेन आनंदो यस्य गोविंदः श्रीराधया अभिप्राप्य विंदति नानाती
तिगोविंदः गोकुलेन्द्रः श्रीकृष्णस्तन्नामा सर्गः॥ ॥ इदानीं चिरकालं कांक्षित राधादर्शनो स्वाभिलषित मानसो १२४
हरिस्ताम् आहगतवतीत्यादि॥ हरिः प्रियामानहारकः प्रियां वाचच नेनैव प्रियामानहरणशीलः श्रीकृष्णः श्री
राधामुवाच॥ कसति॥ सखीवृंदे सखीसमूहे गतवति सति॥ कीदृशी॥ मंदाक्षो यस्य पानरोलज्जा नरस्ते

तनिर्नरीति तत्र यो यस्मरः प्रौढकामस्तत्परवशात् मदायत्तो यस्या कृतो निप्रायस्तेन मदृढं यातः स्मितं तेन स्नपितो
व्याभावधरो यस्यास्तां॥ पुनः कीदृशीं॥ सरसं रसो नुरागस्तत्सहितं मनो यस्यास्तां॥ किं कुर्वाणं नवपल्लवप्रसव
शायने॥ न च पल्लवाश्च प्रसवाश्च कुसुमानि तेषां शायने॥ नवकिंशालयपुष्पमये शायनीये निक्षिप्ताक्षीं वि
निहितनयनां मुकुर्वरिंवारं दृष्ट्वा विलोक्य एवंभूतां प्रियां परमवत्सलां दृष्ट्वा हर्षम् आप्य तवाचेत्यर्थः॥ अत्र
[illegible]ध्यावलोकनेन संभोगेच्छाधनिता अस्मिन्सर्गे स्वाधीनभर्तृका नायिका॥ तल्लक्षणं॥ यस्या रतिगुणाकृ
ष्टः पतिः पार्श्वं न मुंचति॥ विचित्रभ्रमासक्तः सा स्यात्स्वाधीनभर्तृकेति॥ १९॥ गीतेन वक्ष्यमाणाह॥ किंभूत

गतवति सखीवृंदे मंदत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधरां॥ सरसमनसं दृ
ष्ट्वा मुकुर्नवपल्लवप्रसवशायने निक्षिप्ताक्षीमुवाच हरिः प्रियां॥ १९॥

येति॥ गीतस्यास्य विनास रागः
॥ तल्लक्षणं॥ स्वच्छंदसंदमानितपुष्पचापप्रियारसस्वादुसुधान्वितः॥ पर्यंकमध्यस्य कृतोपवेशो नासः
सुनिद्रान्वितहेमगौर इति॥ केचित् तु रामकरीति॥ एकतालीतालस्य॥ गीतार्थस्तु॥ हे राधिके सुंदरि अधु
नामां अनुसर त्वं॥ किंभूतं मां॥ क्षणमनुगतं॥ तव दर्शनोत्सव व्याप्तं॥ अथ वा माम् अनुसर॥ किंभूतं॥ क्ष
णमधुना तव संभोगोत्सवमधुनामदेन अनुगतं स्वाधीनं क्षणमनुगतमिति पाठे॥ अनुगं अनुवर्तिनमि
त्यर्थः॥ ननु विद्यमाने एवं कथयसि परीकृत्स्नेहरहिते त्वयि कथं न जामीत्यत आह नारायणमिति॥ ॥

१२५ नारेषु अप्सु अयनं यस्येति त्वद्वियोगे विरहाग्नितप्तस्य मम जलमेवाश्रयोभूदित्यर्थः॥ अथवा नारा आ
पस्तस्येदमित्यण् स एवाश्रयो यस्येति वा॥ उक्तत्वां कोपरि हृत्यमानेनेति भावः॥ तव विरहे जलमेव श
रणं रोदनतया प्रवेशतया वा अतः परोक्षेपि तवैव स्मरणं करोमीत्यर्थः॥ अथवा अनुगतं त्वामेव अनु
सृतं मां क्षणं क्षणमात्रं अधुना इदानीं अनुसर भज॥ अथवा अधुना क्षणं इदानीं लब्धावसरं अत एव अधु
नैवानुसृतं शरणागतं मां अनुसर आश्रय प्रदानेन ननु एतावंतं कालं अन्यनारीरतं कथं भजामीत्याह
॥ कीदृशं मां नारायणं नारीणां अयनं आश्रयं आश्रयणीयं मां ननु अहं तासु आश्रयामि ता एव आश्र

किंशलयशयनतले कुरु कामिनि चरणनलिनविनिवेशं॥ तवपदपल्लववैरिपराभव
मिदमनुभवतु सुवेशं॥१॥ क्षणमधुना नारायणमनुगतमनुसर राधिके॥ ॥ध्रुवपदं॥ १२५

यं कुर्वंतीत्यर्थः॥ अनेनापि अन्यनारी आश्रयत्वमागतमित्यपरितोषात्तत्र राधया नामाह नारायण
मिति॥ नारी उत्तमस्त्री भवती एव अयनं यस्य तं नारायणं त्वदाश्रयं त्वामेव शरणं मां त्वमेव भज शर
णागतं मां परिपालयेति भावः॥ ध्रुवपदं॥ अथवा ध्रुवपदमत्र श्री राधाया उत्तरं चेति॥ हे कृष्ण त्वं
सर इतो गच्छ किं सति राधिके इति रः कामस्तेनाधिः सेतापलक्षणो व्याधिः केप्रकाशो सति॥ तर्हि किं गच्छा
मि तदर्थमेव तवाग्रितोस्मि न हि॥ नारायणमनुगतमिति॥ नारायणं जलाश्रयं अनुजकीकृत्य॥ इ

रेचेदृत अद्य गतं निकट एव प्राप्तं यमुनादिलक्षणं तच्च कामता प्रत्यांत्वेसरेत्यर्थः॥ परानि॥ हे कामिनि नित
वेश्मितमेव तदिति सा अभिप्रायं संबोधनं॥ किंशलयशयनतलेन च पल्लवशय्यायां चरणनलिनस्य पादपद्म
स्य विन्यासं कुरु॥ वीत्यनेनास्यां शय्यायां विविधप्रकारं चरणचेष्टितं भविष्यतीति ध्वनितं॥ इदं सुवेशमपि
सम्यग्वैचित्र्यरचनादिना सुष्ठु लंकृतमपि स्वाभावतोति सुंदराकृतिर्यस्य तादृशमिति वा॥ दिव्याकिंशलय
मयत्वात्॥ किंशलयनं तवपदपल्लववैरि॥ तवपदपल्लवयो वैरी शत्रुस्तस्मात् पराभवं तिरस्कारमनुभ
वतु॥ अथवा॥ तवपदपल्लवस्य वैरी स्पर्द्धी तवचरणविन्यासेन पराजयमनुभवत्वित्यर्थः॥१॥ करेति॥ अ

करकमलेन करोमि चरणमिदमागमितासि विदूरं॥ क्षणमुपकुरु शयनोपरि मामिव नूपुर
मनुगतिशूरं॥२॥

हं करकमलेन निजकरांबुजेन तवचरणं करोमि संवाहयामि॥ अथवा॥ चरणम
हमित्येकमेव पदं॥ तवचरणयोर्मर्दनजां संवाहनादिरूपां करोमि॥ कथमित्यत आह॥ दूरं अतिशये
न दूरं त्वं आगमितासि अर्थान्मया॥ तथा च दूरागमनजन्यं ते श्रमं मम पनयामीति भावः॥ शयनोपरि श
य्यायां उपरि क्षणमपि मां सुपकुरु॥ सान्निध्यं आकारय उपकारं वा कुरु यथा त्वां भजामि तथा कुर्वित्यर्थ
ः॥ कीदृशं मां॥ अनुगतो तवानुसरणे शूरं सर्वं रहस्यं कर्तुं समर्थं॥ कमिव॥ यथा तवानुगतिशूरस्य नू
पुरस्य परिधानेन तवचरणसन्निधानमहाद्युतिपादनोपकारः॥ तथैव चरणारविन्दापरीणमम आप्य

त्तिकांक्षितस्तपोपकारः भविष्यतीति भावः॥ अथवा परीपियोऽनुगतिशूरो भवति तस्योपकारउचित इति
ध्वनितं॥ अथवा पादपद्मस्य स्पर्शं निषेधयंतीं प्रत्याह मामनुगतिशूरं नूपुरमुपकुरु चरणपरिधानेन
स्वीकुरु॥ अनेन धृतस्यापि नूपुरस्यापरिणछलोज्ञातत्वादस्पर्शमार्थयते॥ करकमलोन्नातवचरणौ को १२६
मलौ अतएव कोमलहस्तेन शनैः शनैः तव परिश्रमं यथा गच्छति तथा संवाहयामीति भावः॥ करकम
लेन चरणं करोमीति गूढाभिप्रायो वा चरणौ धृत्वा रहस्यक्रीडां करोमीत्यर्थः॥ इहेति पागिह विजान्ना
श्रायने मां प्रतिगमितासि आगता असि विदूरं वकुंकालेयथास्यात्तथा प्राप्तासीत्यर्थः॥ क्षणमपि वि

वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलं॥ विरहमिवापनयामि पयोधररोधकमुरसि दुकू
रहः कल्पसमीपे भवतीति विदूरपदी पादानं॥२॥ गोपीयेणानवगाह्यमानाभिप्राय उत्तरमप्रयच्छं कूलं॥३॥
तीमाह॥ वदनेति॥ हे प्रिये अनुकूलं रतिजनकं संभोगसंपत्तिसंपादकमिति यावत्॥ वचनं रचय॥ परा
घत्रिमासमाधुर्येण संलापं कुरु एवं वद॥ कीदृशं॥ वदनमेव सुधानिधिश्चंद्रस्तस्मात् गलितं च्युतं॥ किमिव अमृ १२६
तमिव॥ अतस्त्वदाज्ञया उरसि वक्षसि वक्षसि स्थितं दुकूलं पट्टवस्त्रं अपनयामि दूरीकरोमि॥ कीदृशं॥
पयोधररोधकं तिरोधकं तिरोधायकं॥ किमिव॥ विरहमिव यथा नवसंगमे विरहोपनीतस्तथा स्तनाश्लेष
प्रतिबंधकमपीदमपनयामीति भावः॥ अथवा॥ विरहतापिताहं कथं वदिष्यामि॥ अतआह॥ दुकूल

मिव॥ विरहमपनयामि किंभूतमनुनयं उरसि हृदि वर्तमानं॥ पुनः किंभूतं पयोधररोधकं॥ नवरसधारेणा
प्यायनकरात् पयोधरपदोपात्तं॥ ननु परिणाहिवापादनायतथासति चिरनव्यत्वात्॥३॥ कुटिलमवलोक
यंतीमतिविकलः सन्नाह प्रियेति॥ हे राधे त्वं मदुरसि मदीयवक्षःस्थले कुचकलशं रमणं किं न विनिवेशा
पयसि॥ कीदृशं॥ अतिदुरापं॥ अतिदुर्लभं त्वदनुग्रहं विना तीव्रदुःखेनावाप्यत इति दुरवापस्तं॥ पुनः की १२६
दृशं पुलकितं रोमांचितं॥ अत्र हेतुमुत्प्रेक्षते प्रियपरिरंभणरसवलितमिव प्रियस्य प्राणवल्लभस्य मम परि
रंभणे यो रसस्तदुत्साहस्तेन वलितमिव युक्तमिव॥ अन्योपि योत्कर्षयुक्तो भवति तस्य रोमांचो भवत्येवेति ध्वनि

प्रियपरिरंभणरसवलितमिव पुलकितमतिदुरवापं॥ मदुरसि कुचकलशं विनिवेशय शोषय मन सिजतापं॥४॥
तं तेन कलशार्पणेन मनसिजतापं कामजन्यं संतापं शोषय नाशाय॥ संतप्तस्योपरि कि
लशोदकेनाभिषिक्तेन तापोपात्यैव॥ उक्तं गयाविपरीतरतं याचत इति तात्पर्यं॥ तथाच॥ मनसिजपदेन
गृहे॥ स्थितानि श्रितांत्येतत्र वर्तिज्जिनएव समर्थो भवतीति नान्यत्॥ अतएव त्वयैवास्य शांतिरिति भावः॥ शोषये
त्यनेनापि तापं शोषय ननु स्वविषयिकं कामं॥ पुनःपुनर्विलासमाधुर्यरूपं उत्पादकत्वात् तथा चास्यानु
प्रासनिर्वाहिकत्वं स्फुटमेव॥४॥ तदात्वनेकमीवनोऽहं त्वमेकजीवनी येत्याह॥ अधरेत्यादि॥ हे भामिनि का
मकलाकुशले प्रिये अधरसुधारसमुपनय उपसमीपे स्थितादेहीत्यर्थः॥ दाम्ह दाने इति धातोः॥ दान

गी·टी· पात्रे यद्दीयते तेन दुत्तयोर्हीनमतियावत्प्रियोः साफल्यं भवतीति भावः दासं दीयते यस्मै इति संप्रदानपात्रं ॥ जी
वय ॥ अत एव अधरामृतं दत्वा सफलं जीवनं दत्तयोः कुर्वित्यर्थः ॥ कीदृशं मृतमिव त्वदधरामृतं विना शून्य
२८ शून्यप्रायमिव अन्योपि मृतोऽमृतपानेन जीवतीति ध्वनितं ॥ दानपात्रत्वे हेतुमाह ॥ त्वयीति ॥ त्वयि विनिहि
तमनसं त्वय्यर्पितचित्तं ॥ पुनः कीदृशं ॥ विरहानलेन त्वद्वियोगरूपेणाग्निना दग्धं संतप्तं वपुर्यस्य तं अनंगर
वा विलासं क्रीडनचेष्टारहितं ॥ अन्योपि मृतः स्वकार्ये दग्धनिश्चेष्टितः समर्थनिश्चामिनाजीवनाय इति भावः ॥

अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासं ॥ त्वयि विनिहितमनसं विरहानलदग्धवपुषमविला
सं ॥ ५ ॥ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादं श्रुतियुगले पिकरुतविकले मम शमय चि २८
रादवसादं ॥ ६ ॥

॥ ५ ॥ चाटूक्त्या प्रसन्नामाह ॥ शशिमुखीति ॥ हे शशिमुखि चंद्रानने सुंदरतयामृतस्यंदित्वा
च शशिमुखयोरूप्यरूपकभावः ॥ मणिरसनागुणं मणियुक्तकांचीदाम मुखरय सशब्दं कुरु ॥ अनेन हंसली
लाख्यं विपरीतरतमाज्ञप्तमिति ध्वनितं ॥ तल्लक्षणं चोक्तं प्राक् ॥ कीदृशं मणिरसनागुणं ॥ अनुगुणकंठनिना
दं ॥ अनुगुणसदृशः कंठनिनादः कंठशब्दो यस्य तादृशं रसनागुणानुकारिकंठशब्दं कुर्वित्यर्थः ॥ अथवा स्वर
भंगेनालयंतीमाह ॥ कंठनादसदृशं रसनाशब्दं कुर्वित्यर्थः ॥ तेन शब्देन मम श्रुतियुगले श्रोत्रयुग्मे चिराद
वसादं चिरात्स्वरसंगमावधेः वर्तमानं अवसादं श्रामयशांतं कुरु नाशयेत्यर्थः कीदृशे श्रुतियुगले ॥ पिकरुते
न कोकिलकूजितेन विकले दुःखिते ॥ विरहिणो हि पिकरुतं दुस्सहं भवति ॥ ६ ॥ ॥ ६ ॥ ॥

३०

किंचिदवलोकयंतीमाह मामतीति ॥ हे प्रिये तवेदं नयनं नेत्रं मामवलोकयितुं मां वीक्षितुं मीलति मुद्रां प्राप्नो
ति ॥ किमिव लज्जितमिव ॥ कीदृशं मां ॥ अतिविफलरुषा अतिनिष्फलेन कोपेन विफलीकृतं विफलतां नीतं
॥ निरपराधदंडं मया कृतमिति मह त्वया लज्जितमिवेति भावः ॥ अतस्त्वमधुना इदानीं निष्फलकोपाद्विरम
विरक्ता भव ॥ रतिखेदं संभोगदैन्यं विसृज त्यज ॥ कोपं त्यक्त्वा मया सह रमणं कुर्वित्यर्थः ॥ अथवा ॥ अधुना
लज्जानिराकरणार्थं विशेषेण रमविविधकेलिं प्रकटय ॥ रतिखेदं रतेः दुःखं मुंच ॥ रत्यायासं विशेषेण
सृज उत्पादयेति वा ॥ तथा च तेन नेत्रमुद्रणं समीचीनमिति भावः ॥ अथवा किंचित्संमुखी प्रसुवा भमामिति

मामतिविफलरुषा विफलीकृतमवलोकयितुमधुनेदं ॥ मीलति लज्जितमिव नयनं तव विरम विसृज
रतिखेदं ॥ ७ ॥

॥ हे प्रिये मां अवलोकयितुं प्रत्यक्षीकर्तुं तव नयनमपि लज्जितमिव मीलति यथा कश्चिदति
लज्जितः सन्मुखो न भवति तथा तव नयनमपि मीलति विमुखतां याति ॥ कीदृशं तव नयनं अतिविफल
रुषा अकारणकोपेन विफलीकृतं निःफलं जातं मयि विषये अवलोकयितुं रुषा रुद्धमित्यर्थः अधुनाप्य
मे पि सति इदं मयि विषयरोषं कोपं विरम त्यजेत्यर्थः ॥ अथवा रतिखेदं च विसृज मया सह रत्या रमणेन
खेदं वियोगदुःखं विसृज त्यज विफलरुषा दुःखखेदं मा प्राप्नुहीत्यर्थः ॥ ७ ॥ श्रीजयदेवेत्यादि ॥ इदं श्री
जयदेवेन भणितं श्रीजयदेवेन कथितं गीतं ॥ रसिकजनेषु ॥ एतद्भंसनादिताशयलोकेषु मनोरमरतिर

गी॰टी॰ सद्भावविनोदं॥ रतिः संभोगः रसः शृंगाररसः भावा॥ संचारिसात्विकादयस्तेषां मनोरमं मनःप्रीतिकरं विभ्रा
१२८ कर्षकं विनोदं कौतुकं हर्षमितियावत्॥ जनयतु करोतु अथवा॥ मनोरमरतिरसेभावना चमत्कृतिमुत्पाद
यतु॥ तदुक्तं॥ यदि हरिस्मरणे इत्यादिना तेनैव॥ कीदृशं भणितं॥ अनुपदं प्रतिपदं निगदितो नितरां व
र्णितो मधुरिपोः श्रीराधाधरामृतमधुरिमालक्षणं तस्य रिपुः दंतातैरास्वादनेन मधुखंडनस्य श्रीकृष्ण
स्य मोदश्चानंदो यत्र तादृशं वाग्विलासरूपं मोद इत्यर्थः॥ अथवा मधुरिपुः प्रियामानमेव रिपुर्यस्य श्रीकृ
ष्णस्य प्रियायामानमेव रिपुर्यस्य श्रीकृष्णस्य प्रियायामानमोचनाय उक्तं वाक्यं मोदं हर्षं जनयतु॥ श्रीधोरोया

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं॥ जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदं॥
॥८॥२३॥

इत्यर्थः॥ कीदृशं वाक्यं श्रीजयदेवभणितं श्रीकृष्णमुखात् श्रुत्वा पठितं॥ इदं रसिकजनेषु राधामोह
नयोः रसविलासपरेषु अपि मोदं जनयतु महाफलरूपमिदमिति परमानंदं प्रापयतु॥ कीदृशं इदं मनोरम
रतिरसभावविनोदं श्रीराधामोहनयोः मनोरमो यो भावः परस्पररतिरसः संभोगरसः तस्य भावः अभिप्राय १२८
प्रकाराः तेन विनोदं परमवाक्यात्कृतं रमणं तादृशं॥ अथवा एवं अन्वयः श्रीजयदेवभणितं गुरुपरंपराप्रा
प्तं इदं श्रीराधां प्रति श्रीकृष्णवाक्यं रसिकजनेषु श्रीराधामोहनयोः परायणेषु भक्तेषु जनयतु श्रीराधामोह
नयोः रूपमिति शेषः॥ प्रकटयतु तत्सेवापरान् करोत्वित्यर्थः॥ कीदृशं भणितं अनुपदे अनुपदे निगदितः के

३१

ष्टितो मधुरिपोः श्रीकृष्णस्य मोदो हर्षो यस्मिंश्च तं पुनः कीदृशं भणितं मनोरमा रतिरसभावना संभोगभावमासं भो
गकामना उभयोर्यत्र तेन विमोदं कौतुकं यत्र तमित्यर्थः॥ ॥ एवं वाग्विलासमनुवर्ण्य राधासुरतारंभं निरू
पयति॥ प्रत्यूह इत्यादिना॥ तयो राधामाधवयोः स चिरं कांक्षितो लोकोत्तरो वा सुरतारंभः जयति॥ ललितारंभ इति पा
ठे॥ ललितो मनोहरश्चारंभो यस्य एतादृशः शृंगारक्रीडाविशेषः उद्भूत उद्भटः प्रियं भावुकः प्रियभवनभोजो
वन्नुद्भवजातः॥ भक इत्यत आह॥ यस्मिन् ललितारंभे निबिडाश्लेषे दृढतरालिंगने कृते अपि पुलकांकुरेण रोमां
चोद्गमेन प्रत्यूहो भूतः अंतरायो जातः॥ अनेनालिंगनेन स्पर्शोत्तममहासात्विकविकारः अंकुरपदेन सूचितः

प्रत्यूहः पुलकांकुरेण निबिडाश्लेषे निमेषेण च क्रीडाकूतविलोकितेऽधरसुधापाने कथानर्मभिः।
॥ आनंदाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूत् उद्भूतः स तयोर्बभूव सुरतारंभः प्रियंभावुकः॥७०

॥ अतिदृढभावश्लेषस्थायी येनालिंगने रोमांकुरसहिष्णुता जाता॥ एवं परमावधिरसो त्वभिदर्शिता॥ अपि
च॥ क्रीडाकूतविलोकिते क्रीडासु यदाकूतं पूर्वकमभिप्रायपूर्वं यद्विलोकितं तत्र निमेषेण नेत्रस्पंदेन प्र
त्यूहो भूतः॥ सततं तस्याभिप्रायावलोकने निमेषमात्रस्याप्यसहनमभूदित्यर्थः॥ तदुक्तं॥ नउन्नदीक्षणोपक्ष्म
कृदृशां॥ अथ च॥ अधरसुधापाने अधरामृतास्वादे कृते अपि कथानर्मभिः रहःकथाकौतुकैः प्रत्यूहो भूत
॥ अनेन पाने तृप्तिरुक्ता॥ तथा च॥ सुधामंत्रः कथयतेवेति कथाश्वासंवरणं॥ प्रत्येकमप्येंद्रियाणां तत्र

गी॰टी॰१२॰ ह्रावानां चातिशयावत्त्वं समुद्भूततरंगाणामिवेति भावः ॥ अथच ॥ मन्मथकलायुद्धे कामस्य चतुःषष्टिकलान्वि
तसुरतसंग्रामे आनंदाभिगमेन हर्षलाभेन मत्तः दीप्तः ॥ अनेन निरतिशयस्पृहणीयत्वमुक्तं ॥ संभोगस्य
१२८ नवजं प्रत्यय इति भावः ॥ क्रियानंदयोश्चापरत्वमिति ध्वनितं ॥ व्यंग्यपदत्रिस्थेयं ॥ संभोगाख्यः शृंगाररसः
भावविभावानुभावसात्त्विकव्यभिचारिभिस्थिरसतां नीतो भोगं प्राप्त महाकविना सांगो निरूपितः ॥ ७७ ॥
दोर्भ्यामित्यादिना ॥ दोर्भ्यां बाहुभ्यां अर्थात् राधिकायाः संयमितो बद्धः पयोधरभरेण स्तनभारेणापीडितः ॥ पा
णिजैर्नखैराविद्धस्ताडितः दशनैर्दन्तैः क्षताधरपुटः दष्टोऽधरपुटो येन स तादृशः कृतः ॥ श्रोणीतटेन नितंबे

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः १२८
॥ हस्तेनानमितः कचेऽधरमधुस्यंदेन संमोहितः कांतः कामपि तृप्तिमाप तदहो कामस्य वामा गतिः ॥ ८ ॥

नाहतः आस्फालितः हस्तेनानमितः ॥ कचे केशे धृत्वेत्यर्थात् ॥ अधरमधुस्यंदेन अधरामृतपानेन संमोहितः
सम्यक् मोहं प्रापितः ॥ एवं विशिष्टोऽपि कांतः कामस्याप्यनिर्वचनीयां तृप्तिमाप प्रापत् ॥ तत्तस्माद्धेतोरहो इत्या
श्चर्ये कामस्य वामा गतिः विरुद्धा गतिः वा मा रमणीया वा ॥ यस्य बंधनादिकं क्रियते सोऽपि प्रीतिं प्राप्नोतीत्यतः ए
व वामेति भावः ॥ अनेन विपरीतसुरतं कथितं ॥ अर्थांतरन्यासोऽलंकारः ॥ तदुक्तं दंडिना ॥ ज्ञेयः सोऽर्थांतरन्या
सो वस्तु निर्दिश्य किंचन ॥ तत्साधनसमर्थस्य वचनं यत्र दृश्यत इति ॥ तथाच ॥ संयमनादिभिः पीडनादिभिः

वीरशृंगारानुभावैर्वीरशृंगारोऽनुवर्णितः ॥ अथच सापराधेन नायकमौलिना यो दंडः प्राप्तितस्तयापि स एवा
नुष्ठित इति भावः ॥ ७८ ॥ तदेव स्पष्टयति ॥ मारांक इत्यादिना ॥ मारांके ॥ मारस्य कामस्य चिह्नं युद्धपक्षे मारणं चि
ह्नं यत्र तादृशे रतिकेलिसंकुलरणारंभे रतिकेलिश्चुंबनालिंगनबंधादिरूपाभिः संकुले व्याप्ते ॥ रणारंभे
कामयुद्धारंभे तया राधया साहसप्रायं साहसबहुलं कांतजयाय तदुपरि कांतस्योपरि किंचिद्यथा कोपारंभः
निभृतरूपा यितमार्ब्धं यत्तस्मात्त्वमात्तं वेगात् ॥ तस्या राधिकाया जघनस्थली निस्पंदा निश्चला जाता ॥ दोर्वल्ली
कुलता शिथिलता सखीभूता ॥ वक्षो हृदयमुत्कंपितं ॥ चक्षुर्मुद्रितं ॥ ततस्त्रीणां पौरुषरसः पराक्रमाभिलाष

मारांके रतिकेलिसंकुलरणारंभे तया साहसप्रायं कांतजयाय किंचिदुपरि प्रारंभि यत्संभ्रमात् ॥ निस्पंदा ज
घनस्थली शिथिलता दोर्वल्लिरुत्कंपितं वक्षो मीलितमाक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति ॥ ९ ॥ ॥ब॥

: कथं सिध्यति ॥ नापि तु न सिध्यत्येवेत्यर्थः अनेन क्रियानिवृत्तिः कथिता संभोगांते नायिकाया एवं भवत्येव ॥
वस्तुतस्तु विजय एव जातः ॥ ७९ ॥ तदेवाह ॥ तस्या इति ॥ एभिः कामशरैः कंदर्पबाणैः प्रस्फुरच्छोणे चिनयोः प्रा
तर्निर्यानैरारोपितैर्मनः कीलितं विस्मयस्तु अद्भुतमाश्चर्यमिभूतः ॥ अन्यत्र निर्यातैर्बाणैरन्यत्कीलितमित्यद्भुतम
भूदित्यर्थः ॥ मनः कीलितमभूदिति वा ॥ कैः कामशरैः ॥ तस्य राधायाः पाटलेन रक्तेन पाणिजनखेनांकितमु
रः ॥ निद्राकषायितं वक्षः ॥ निद्राकषाये लोहिते नहशोणे लोचने च ॥ निर्धौतोऽधरशोणिमा चुंबनादिना श्लथालिनो यो धर

गी० टी० स्पष्टशोणिमा जो लिप्तं च विलुलितः प्रक्षिप्ताः सकचग्रहचुंबनदानादिना अत एव स्रस्ताः गलिताः स्रजः पुष्पमाला
येषु तादृशाः केशाश्च ॥ दरमीषत् स्रस्तं श्लथं शिथिलमंचलं वस्त्रांतं यस्मात्तथाभूतं कांचीदाम मेखलामणिबंधं च ॥ अथवा
१३० ॥ कांचीदाम दरस्रस्तं श्लथांचलमपि ॥ तथा च ॥ संगीपती मे रपि विभिः रसावेशात्प्रकरनेन रसाधिकां कथितमिति ध्व
नितं ॥ कीलितमित्यनेन नायकवशीकरणात् श्रीराधाया एव विजयो जात इति ॥ अथ वा श्रीराधाया एभिः कर्तृ
कैः श्रीकृष्णस्य मनः कीलितं वशीकृतं ॥ अथवा श्रीराधायां विषये श्रीकृष्णस्यैव एभिः कर्तृकैः प्रेमरसास्वादैः श्री
कृष्णस्यैव मनः कीलितं श्रीराधावशो जात इत्यर्थः ॥ अथवा उनयोरेव कर्तृकैः सुरतयुद्धैः परस्परं मनो च्चा

तस्याः पाटलपाणिजांकितमुरो निद्राकषाये दृशौ निर्धौताधरशोणिमा विलुलितस्रस्तस्रजो मूर्धजाः ॥ कां
चीदाम दरश्लथांचलमिति प्रातर्निखातैर्दृशोरेभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितं ॥ २ ॥ ग

स्यंतरं चित्तं वशीजातमिति समानासोरतरति द्योतितात् तथापि नायकोनापि कायाः वशोजात इति नायिका १३०
या एव गौरवेण रसपुष्टिर्द्योतिते वाक्यार्थश्च सूचितः ॥ २ ॥ यदुक्तं ॥ पत्युर्मनः कीलितं तदेव प्रकटयति
व्याकोशा इत्यादि ॥ यं इयं राधा विलुलितस्रग्धरा खंडितमालाधारिणी ॥ तदपि मां धिनोति प्रीणयति ॥ किं कु
र्वती ॥ सद्यस्तत्कालं स्तनजघनपदं पाणिना हस्तेनाच्छादयति रोधयस्त्र च संज्ञासहितं यथा स्यादेवं मां पश्यंती ॥
कथंसलज्जेत्याह ॥ केशपाशः कबरी व्याकोशः शिथिलो जातः ॥ अलकैः चूर्णकुंतलैः स्खलितं ॥ कपोलौ

स्वेदलोलौ घर्मजलकणव्याप्तावभूतां ॥ अन्यच्च ॥ दष्टा विंबाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः
॥ हारिता कुचाविपि त्यक्ता ॥ अथवा ॥ हारश्रीः शरीरशोभा नैव हारिता चोरिता ॥ अपि च ॥ कांचीक्षुद्रघंटिका
कांचीदनिर्वचनीयां आशां गतिं दिशां दिशं गता ॥ अनेन संभोगावेशो ध्वनितः ॥ तथा च ॥ भूषणादिरहिता भिभू
षणां भूषणांगलक्ष्म्या पत्युर्मनो हारिणी भवतीत्यर्थः ॥ अनेन रूपमाधुर्यं निरूपितं ॥ यंगान्यभूषितान्येव केनचि
द्भूषणादिना ॥ येन भूषितवद्भांति तद्रूपमिति कथ्यते इति ॥ तद्यथा ॥ नीतं नैपुण्य रुक्कनांत्रमरकैः कस्तूरिका
पत्रकं नेत्राभ्यां विफलीकृतं कुवलयद्वंद्वं च कर्णार्पितं हारश्च स्मितकांतिभिर्गिरिरत्नं विद्यानुपेषीकृतः किं

व्याकोशाः केशपाशस्खलितमलकैः स्वेदलोलौ कपोलौ दष्टा विंबाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः
॥ कांचीकांचिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलितस्रग्धरेयं धुनोति
॥ ३ ॥
राधेत्यवमंडनेन नितरामंगैरस्मि द्योतितेति ॥ शोभा वासा शोभाभूष नीरागा द्येयत्स्यादंगविभूषणमिति ॥
॥ यथा ॥ धत्वारक्तांगुलिं किशलयैर्नीपशाखां विशाखा खानि क्रामंती व्रततिभुवनात्प्रातरुद्घूर्णिताक्षी ॥ वेणी
मंसोपरि विलुठंती मदुमुक्तां वहंती जन्यारूपांतेममनहि ॥ सेयमद्याप्ययासीदिति ॥ स्रग्धरा नाम कंछंदश्चेदं
॥ ३ ॥ मीलदित्यादि ॥ हर्षोत्कर्षविमुक्ताभिः सहतनोः हर्षोत्कर्षेण नानाविधरतजनितानंदातिशयेन विमुक्ता
श्लथानिः सहाव्यापारा सहा तनुर्यस्याः ॥ एवंभूताया कुरंगीदृशाः मृगवधूनयनायाः आननं मुखं धन्यः स्मा

गी॰टी॰ ञ्चगुणवान् कृष्णः धयति पिबति निर्निमेषं पश्यतीत्यर्थः॥ अधरपानेन वा मुखं पिबतीत्युक्तं॥ कीदृशाः॥ श्यामा
या उत्तुंगौ रसेन तौ यौ पयोधरौ कुचौ तयोः परिरंभे संगी आलिंगित॥ अनेनास्य रतिदशा ध्वनिता॥ किंन्नमान
१३१ नं॥ मीलदृष्टि मुद्रितेक्षिणी॥ मीलत्कपोलपुलकं कं च सरोमोद्गमौ गंडौ च यथास्यादेवं शीत्कारधाराः शी
कृतानां श्रेणय स्तद्वशात्॥ अव्यक्ता अप्रकटाः आकुला आकेलिकाकुः क्रीडाकाकवो ध्वनिविकारास्तैर्विकि
संतीये दंतांशवः तैर्धौताः प्रक्षालितो धरो यत्र तत्तथा॥ मीलदृष्टिमिलत्कपोलमित्याननस्य विशेषणं वा
॥५॥ अथेत्यादि॥ अथ शब्दो मंगलार्थः॥ आनंतर्ये वा॥ सा प्रसिद्धा वशीकृतकांता राधा आनंदेन सहसा॥ इदं

मीलदृष्टिमिलत्कपोलपुलकं शीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरं॥ श्वा १३१
सोत्तुंगपयोधरोपरिपरिष्वंगी कुरंगीदृशो हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननं॥५॥ अथ सह
सा सुप्रीतं सुरतांते सा नितांतखिन्नांगी॥ राधा जगाद सादरमिदमानंदेन गोविंदम्॥ ६॥ वक्ष्यमाणं गोविं
दं प्रति जगाद उक्तवती॥ किं लक्षणा सा॥ सुरतांते संभोगावसाने नितांतमतिशयेन खिन्नांगी सुरतायास
युक्तं शरीरं यस्यास्तादृशी॥ किं लक्षं गोविंदं सादरं किमपि मामाज्ञापयिष्यतीति तद्वचः श्रोतविष्यामीत्यादरे
ण सहवर्तमानं सुप्रीतं तत्याप्रसुखेन स्निग्धं॥ गोविंदं वचनमात्रेण सर्वलीलाप्रदमिति गोविंदपदोपादानं
अथवा श्रीराधायाः गोभिः वाक्यैः तस्याः गूढाभिप्रायं आभरणप्रार्थनेयेव पुनः रमणेच्छा एवं जानातीति विंद
ति जानातीति गोविंदपदेन सूचितमिति भावः॥ ६॥

नंदेव गीतेनाह॥ कुरु इत्यादि॥ गीतस्यास्य रामकरी रागः रूपकतालः॥ गीतार्थस्तु॥ सा राधा यदुनंदने यत्य
स्मात् श्रीकृष्णात् उत्पतोत्थानंदः यदुनंदनः आनंदप्रकाशकः श्रीकृष्णः तस्मिन् श्रीकृष्णविषये तमिममित्थं वा
नि जगाद उक्तवती॥ कीदृशे॥ यदुनंदने॥ क्रीडति रममाणे पुनः कीदृशे हृदयानंदजनके॥ ध्रुवपदं॥ किं जि
गादेत्याह कुरु इति॥ हे यदुनंदन॥ गोपकुलकुमुदचंद्र अत्र मम पयोधरे त्वं निकरेण मृगमदपत्रकं कस्तूरिका
पत्रावली कुरु रचय॥ कीदृशेन करेण॥ चंदनशिशिरतरेण॥ चंदनादपि शीतलेन॥ अथवा॥ यदुनंद
ने जगादेति पूर्वमेवोक्तं तदा यदुनंदन चंद्रः चंद्रादपि चंदनादपि शीतलेन करेणेत्यर्थः॥ शीतलतरेणेत्य

कुरु यदुनंदन चंदनशिशिरतरेण करेण पयोधरे॥ मृगमदपत्रकमत्र मनोभवमंगलकलशसहोदरे॥ १॥
॥ निजगाद सा यदुनंदने॥ क्रीडति हृदयानंदने॥ ध्रुवपदं॥ त्यर्थः शीतलतरेण करेण त्वनेन पुनः कामत
मेनेति स्वांगस्य शीतकामोद्दीपो धोक्तवैचित्र्येणेति भावः॥ कीदृशे पयोधरे॥ मनोभवस्य कामस्य यो मंगल
कलशो मांगल्याय कामस्याभ्युदयाय स्थापितः पूर्णकुंभस्तस्य सहोदरे सदृशे केचित्तु मंगलपदं हे महात्कामि
ति विशेषणं वा॥ १॥ कुरु इति॥ अलिकुलेत्यादि॥ हे प्रियलोचने त्वदधरा मांप्रचुंबनेनैतेन जंवितं गलितं यत्कज्ज
लं तदुज्वलय पुनरुद्दीपय नयनयोः कज्जलं पुनरर्पयेत्यर्थः॥ कीदृशे लोचने॥ रतिनायकस्य कामस्य सा
यकानां बाणानां॥ मुंचतीति रतिनायकमोचनं तस्मिन्॥ कीदृशं कज्जलं॥ अलिकुलस्य भ्रमरसमूह

गी·टी· स्य यत्कंजनं तिरस्कारस्तस्य संजनकं विधायकं॥ उज्वलो दीप्तिः श्रृंगारविशारदे सुखिकान्तानीतिविभ्रम्य गंजनो
निम्नवोना शाइतिरत्नकोषः॥ २॥ नयनेत्यादि॥ हे शुभवेश्य कल्याणमूर्ते श्रीमतः श्रोणबोवेशोलंकरणं यस्यता
१३२ दृशेतिवा॥ श्रुतिमंडलैकप्रदेशे कुंडलेविनिवेशाय स्थापय॥ कीदृशे श्रुतिमंडलेनयने एव यो कुरंगो मृगा
वतिवेगवत्वात्तयोस्तरंगं यस्य वेगस्य यो विकाशः प्रसरणं तस्य निरासकरे निरोधकारिणि॥ पुनः कीदृशे
॥ मनसिजस्य कामस्य यः पाशो बंधनविशेषस्तस्य विलासधरे तच्छीलालाव्रति॥ यदि करणमिंडुलं कामव्या

अलिकुलगंजनसंजनकं रतिनायकसायकमोचने॥ त्वदधरचुंबनलंबितकज्जलमुज्वलय प्रियलो
चने॥ २॥ नयनतरंगः कुरंगविकाशनिरासकरश्रुतिमंडले॥ मनसिजपाशविलासधरे शुभवेश निवेश
य कुंडले॥ ३॥ भ्रमरचयं रचयंतमुपरि रुचिरं सुचिरं मम सन्मुखे॥ जितकमले विमले परिकर्मय नर्म
जनकमलकं मुखे॥ ४॥

धपा शोनस्या त्रहिं कियद्दूरं नयनकुरंगयोर्गतिः॥ स्यादि चलोचनयोर्विशालत्वं
गं॥ तथा तरंगविकाशइत्यनेन कटाक्षाणां चांचल्यमितिभावः॥ ३॥ भ्रमरचयमित्यादि॥ हे करभ मम मुखे
अलकं चूर्णकुंतलं परिकर्मय भूषय॥ कीदृशमलकं॥ रुचिरं मनोहरं॥ पुनः कीदृशं नर्मजनकं क्रीडाजन १३२
कं॥ कीदृशे मुखे॥ विमले निर्मले॥ पुनः कीदृशे॥ जितकमले॥ जितं तिरस्कृतं निजशोभया सौरभेण च कम
लं येन तादृशे॥ सन्मुखे प्रसादवति॥ अन्तिमुखे वा किं भूतमलकं॥ सुचिरं चिरमुपरि वदनारविंदस्योपरि

३५

स्थित॥ भ्रमरचयं रचयंतं भ्रमरमंडलीशोभां जनयंतमित्यर्थः॥ सन्मुखइति मुखस्यातुलितलावण्यास्पद
त्वं सुचिरमिति नित्यमेवाव्यभिचारिशोभाप्रदत्वं चालकानां कथितं सुचिरं विविधरचनया रुचिरं यथा स्यात्त
था परिकर्मयेति वा॥ जिताव शोभया साधारणगुणैः कमलाश्रीर्येन तस्मिन् जितकमल इति॥ अत ए
व सवातिशायिय शसा विमले विख्यात इत्यर्थः॥ किंचालकानामपि नर्मजनकमिति विशेषणेन सुकांता दृशा
शोभया नस्य मंडनेनापि सर्वमेव परिहसतीति तादृशामित्यर्थः॥ नर्मयुक्तो जनः सखीजनः तस्य कं सुख
स्वरूपमिति वा॥ क्रीडागलितालकदर्शनात् सखीनां नर्मकलनवात्॥ सुचिरमित्यनेनालकभ्रमराणां सु

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे॥ विहितकलंककलंकमलाननविश्रमितश्रम
शीकरे॥ ५॥

खमकरंदपाने तृप्तिर्मकरंदस्य चाक्षयत्वमिति ध्वनितं॥ ४॥ मृगमदेत्यादि॥ हे कमलानन॥ प
द्ममुख॥ अलिकरजनीकरे॥ ललाटचंद्रे ललितं मनोज्ञं तिलकं विशेषकं कुरु॥ कमलामुखे यस्येति वा
उन्नयत शशं केण मैत्री ध्वनिता॥ कीदृशं तिलकं॥ मृगमदरसवलितं॥ मृगमदरसवलितं॥ मृगमदरसेन क
स्तूरीरसेन वलितं निर्मितं॥ कीदृशे॥ विहितकलंककले॥ विहिता कला कस्य लांछनस्य शोभा येन तादृशे
॥ अतनुश्यामरूपशोभा तासादृश्यात् कलंकशोभा यत्रलक्षणमिति भावः॥ कीदृशे अलके॥ विश्रमितो विश्रामं
प्रापितो यः श्रमस्तज्जनितशीकरो बुंकणो यत्र तादृशे॥ अनेन व्यजनादिना तद्भूतानां प्रस्वेदबिंदूनामति

गी·टी· शीतलतनया हिमकणत्वमाक्षिप्यते॥ तेन चालिकस्य चंद्रत्वरूपणं सांगं निर्वहतीति ध्वनितं॥ ललाटमलिकं
गोधिरित्यमरः॥ अथवा॥ विश्रामं प्रापित स्तेश्रमजनित श्रीकरो यस्मात्तादृशत्रादृश इत्यर्थः॥ प्रथमं व्यजनादिना
१३३ प्रस्वेदमपहर॥ पश्चान्निजकंरचय॥ स्वेदजलेति कस्यामंनवात्॥५॥ ममेत्यादि॥ हे मानद॥ अन्यमानिनीमा
नखंडनेन मपि वकुमानप्रदसौंदर्याधिनिमानिनीस्वसौंदर्यादिभिर्विना श्रेतिवा ममरुचिरे मनोहरे चिकु
रेजात्येकवचनं केशपाशश्इत्यर्थः॥ कुसुमानि पुष्पाणि कुरुस्वय॥ कीदृशे चिकुरे॥ रतिगलिते॥ रतौ मुक्तवं
धने॥ संभोगवशात्स्रस्त इत्यर्थः॥ ललिते मनोहरे॥ एवं द्विविपदेन सुरतहरबंकिलीतसौंदर्यमुक्तमत्र ल

ममरुचिरे चिकुरे कुरु मानद मानसजध्वजचामरे॥ रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडामरे ॥६॥ १३३

लितपदेन रतिगलितत्वेपि सौंदर्याधिक्यं कथितं॥ न तु पुनरुक्तिप्रसंगः॥ पुनः कीदृशे॥ मानसजस्य काम
स्य ध्वजचामरे पताकाचिह्नभूतवामरे॥ पुनः कीदृशे॥ शिखंडिनो मयूरस्य शिखंडकस्यापि बर्हस्येव डामरः
आटोपो यस्य तादृशे॥ ६॥ सरसघनेत्यादि॥ हे शुभानन शुभाननरुस्या अथ वा शुभ आननमस्येन शुभायः
करो यस्य॥ नादृशरसनादीनां करसाध्यत्वादयमर्थो युक्तः॥ मम सुंदरे जघने मणिरसनावसनाभरण
निमणिमयी या रसना क्षुद्रघंटिका वसनं वस्त्रं आभरणानि च वासय परिधापय॥ कीदृशे जघने॥ सरसघ
ने॥ सरसे शृंगाररससहिते स्निग्धे वा॥ घने निविडे॥ पुनः कीदृशे॥ शंबरनामानंदैत्यं दारयतीति शंबरदार

३८

णः कामः स एव वारणः महाबलत्वान्मत्तमातंगस्तस्य कंदरे॥ अपरोपि हस्ती गिरिकंदरायां तिष्ठतीति भाव
॥ कुंजरो वारणः करीत्यमरः॥ दरी तु कंदरो वा स्त्रीच॥ वस आच्छादने इत्यस्य णिजंतस्य प्रयोगः॥ अथवा सरस
शृंगाररसेन सह वर्तमान॥ मया सह सरसेति वा ममतव वक्ष्यमाणायाः जघने कटिप्रदेशे मणिरसना वसनाभ
रणानि मणिमयकटिमेखला वसनं साटिका आभरणं तद्बंधनसुवर्णफुंदनयुक्ता डोरिका एतानि च अनुक्रमे
ण वासय परिधापय तत्रानुक्रममाह आदौ वस्त्रपरिधानं तदनंतरं डोरिकाबंधनं पश्चात्क्षुद्रघंटिकाबंधनं का
र्यकमिति वा क्वार्थः॥ कीदृशे जघने घने निविडे मम मांसले स्थूले तन्नोगमम धेत्यर्थः॥ हे शुभानन शुभाननो मयि

सरसघने जघने मम शंबरदारणवारणकंदरे॥ मणिरसनावसनाभरणानि शुभानन वासय सुंदरे॥७॥

विषये आशयो अभिप्रायो यस्य तेनैव सुंदरे आभरणादिविना सहजशोभनेनेकटौ अत एव शंबरदारण
वारणकंदरे शं सुखं वरं श्रेष्ठं दारयति विरदारयति॥ अथवा॥ अवगाहयति एतादृशो वारणो हस्ती रूपो
नवानेव यत्र क्रीडकस्तस्य क्रीडार्कककरेरहस्य क्रीडागकरो यत्र तस्मिन् कटिप्रदेशे शुभाननाय शुभं वासना
युक्तेति वा॥७॥ श्रीजयदेवेत्यादि॥ प्रियासौंदर्यादिवैभवेन जयेन सर्वकलाकौशलेन विजयेन च दीव्यती
ति श्रीजयदेवः कृष्णस्तत्संबोधनं हे नागर मम वचसि मंडने मंडननिमित्तं हृदयं कुरु॥ पदसावधानेन त्व
यास्थेयेत्यर्थः॥ किंलक्षणे मंडने॥ जयदेव सपत्नीसकाशात् उत्कर्षपदे॥ हरेस्तव चरणे स्वाधीनतया मे

डनन्तूपाचरणंतस्यस्मरणंमनस्यवगाहनंदेवामृतंतेनकृतेकलिकलुषज्वरस्यमानादिषुकलहकालु
षसंतापस्यखंडनंनाशनंयेनताहृशे॥ एवंरोषविस्मार्केरमित्यर्थः॥ अथवा॥ श्रीजयदेवस्यकवेर्वचसिवा
२३४ क्येसहृदयंदयासहितंयथास्यात्तथाहृदयंकुरु॥ किंलक्षणेवचसि॥ मंडने॥ सकलजनकृतनतालंकाररूपे॥ जय
देवसर्वेभ्यःनिमनक्तिप्रदानेनसर्वोपरिविराजमानतयाविजयप्रदे॥ पुनःकीदृशे हरिचरणस्मरणमेवयदमृ
तंपरमानंदरूपमहौषधंतेननिर्मितंकलिकलुषज्वरस्यखंडनंनाशनंयेनताहृशे॥ कलिकलुषज्वरसंज्व
रेतिपाठेकृतआचरितीयःकलुषज्वरःपापरूपसंतापएवसंज्वरस्तस्यखंडनेछेदकेपापवतिविदारणेवचसी

श्रीजयदेववचसिजयदेहृदयंसहृदयंकुरुमंडने॥ हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखंडने॥ ज॥
रचयकुचयोःपत्रंचित्रंकुरुष्वकपोलयोर्घटयजघनेकांचीमंचस्रजाकबरीभरं॥ कलयवलयश्रेणीं ॥२४॥
पाणौपदेकुरुनूपुराविति निगदितः प्रीतः पीतांबरोपितथाकरोत्॥८॥

त्यर्थः॥८॥२४॥ रचयेत्यादि॥ हे २३४
प्रिय॥ कुचयोःपत्रंमकरपत्रिकांरचय॥ कपोलयोश्चित्रंचित्रकारवत्स्वनाविशेषंकुरुष्व॥ अथच॥ जघने
कांचींक्षुद्रघंटिकांघटयअर्पय॥ कबरीभरंग्रथितकेशसमूहंस्रजापुष्पमालयामंचपूजय॥ केशपाशशोभा
त्वंप्रापयेत्यर्थः॥ अंचेत्यंचगतिपूजनयोरित्यस्यलोट्मध्यमपुरुषैकवचनं॥ वलयश्रेणीकंकणपंक्तिंपा
णौहस्तेकलयअर्पय॥ पदेचरणेनूपुरौमंजीरौकुरु॥ इत्यनेनप्रकारेणराधयानिगदितउक्तःपीतांवरःत

क्तोतिवसनःश्रीकृष्णोपितथैवाकरोत्यथायथासाकथितवतीतद्रूमानेनतथैवाकरोदित्यर्थः॥ यथायथाश्री
राधाउक्तवतीतथातथैवाकरोदितिसंततास्ववत्वनेयमितिसूक्तं॥ तद्यथा॥ षडंघ्रिभिरमर्दितान्कुसुमसं
चयान्नाचिनोदरखंडमपिराधिकेवकुन्निरखंडकत्वकिरा॥ अमुंचननवपल्लवव्रजमुदंचरकोंचिल्लंकरोतुवरा
गोजनःकिमयमन्यदाज्ञापय॥ किंच॥ अहंभक्तपराधीनोह्यस्वतंत्रइवेति॥ तद्वशेदारुयंत्रवदिति॥ येयथा
मांप्रपद्यंतेतांस्तथैवभजाम्यहमितिचक्षणंयुगशतमिवयासांयेनविनाभवदितिनिःसीमानुरागभरेणवशी
कृतः॥ उक्तंच॥ श्रीमुखेनैवभगवतायेहमिति॥ भगवान्पुरुषोत्तमःसच्चिदानंदैकरससारैश्वर्यमहिमगुण
अच्युतस्वरूपः॥ तद्रूपेनांवेलाहरेरेवप्रियजनेनित्यानंदरूपचरितःनित्यमेवरममाणएवास्ते॥ आत्मारा
मयोगिभिर्भजनीयगुणत्वात्॥ यथात्मारामाश्चमुनयइति॥ उक्तंच॥ नकर्हिचिन्मत्पराःशांतरूपे
नंक्ष्यंतिनोनिमिषोलेढिहेतिः॥ येषामहंप्रियआत्मासुतश्चसखागुरुःसुहृदोदैवमिष्टमिति॥ आहृतंस्वा
मिचरणे॥ अनुअत्यलोकवतमदीयानांनोकुनोगपानांविनाशःनस्याच्छाह॥ हेशांतरूपेशांतंशुद्धंत
द्रूपेमद्वैकुंठेवामत्पराःकदाचिदपिननंक्ष्यंतिभोगहीनानभवंतिअनिमिषोमहेतिःकालचक्रंचनोलेढि
नात्रप्रसतितत्रहेतुःयेषामिति॥ सुतइवस्नेहविषयः॥ सखेवविश्वासास्पदं॥ गुरुरिवोपदेष्टा॥ सुहृदिव
हितकारी॥ इष्टंदैवमिवपूज्यः॥ एवंसर्वभावेनमांयेभजंतितान्मदीयंकालचक्रंनग्रसतीत्यर्थः॥ अथवा
॥प्रियःपतिःआत्मास्वरूपःसुतःपुत्रःसखामित्रंगुरुःपितासुहृत्संबंधीदैवमिष्टंसेव्यं॥ एवंशांतदासपुत्र

गी·टी·२· बंधुमित्रपितृपत्न्यश्चनत्वानिरूपिताः॥येतत्त्वमाकृतलंतकथयंतितेमंदमतयोज्ञेयाः॥उक्तंचभगवता॥अ
व्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः॥परंभावमजानंतोममाव्ययमनुत्तममिति॥तद्भिस्वयमेवरसिकशि
१३५ रोमणिभूतौश्रीराधाकृष्णौकथंतौगृहीतौभवतःस्वतंत्रत्वादितिकैमुत्यन्यायेनेत्यर्थः॥८७॥ ॥यद्गांधर्वेत्या
दि॥हेसुधियःपंडिताःसानंदाःसमाधानस्फुरणेनगतत्वांकयानंदसहिताः॥भगवद्गुणनामानंदरूपत्वाच्च
सानंदाःसंतः॥जयदेवपंडितकवेः॥यद्यपिपंडितकविरित्येकार्थपर्यवसायित्वंतथाप्यत्रविचारक्षमयुक्ति
वक्तापंडितः॥सरसयुक्तिमात्रवक्ताकविरितिभेदः॥यस्तत्क्रतुरित्यादाविवसद्रूपाःक्रतवःश्चसद्रूपायत्नाश्चेति
यद्गांधर्वकलासुकौशलमनुध्यानंचयद्वैष्णवंयच्छृंगारविवेकतत्त्वमपियत्काव्येषुलीलायितं॥तत्सर्वं १३५
जयदेवपंडितकवेःकृष्णैकतानात्मनःसानंदाःपरिशोधयंतुसुधियःश्रीगीतगोविंदतः॥८८॥ ॥
॥श्रीगीतगोविंदतःतत्सर्वंपरिशोधयंतुसर्वतोभावेनजानंतु॥तत्किमित्याह॥यत्गांधर्वकलासुकौशलंगा
नविद्यासुयत्नेषुएर्णगंधर्वमार्गादिशोविदुः॥मार्गस्थिस्वरपदात्मकत्वात्॥कलाः॥अंगविन्यासवैलक्षण्या
दिकातत्रनैपुण्यमितिध्वेक्तिमेवार्थांश्चथच॥वैष्णवंविष्णुसंबंधीयदनुध्यानंश्रीकृष्णचिंतनं॥यच्छृं
गाररसस्ययोविवेकःसंयोगविप्रलंभादिरूपेणाविवेचनं॥तस्यतत्त्वंयथार्थज्ञानं॥यद्यपिकाव्येषुकविकर्म
सुकवित्वनिर्माणरूपेषुलीलायितंविलसितमितितत्सर्वमित्यर्थः॥कीदृशस्यजयदेवस्यकृष्णैकतानात्मनः

कृष्णैकतानस्तत्परआत्मा॥मनोयस्यतादृशस्य॥एकतानोनन्यवृत्तिरेकाग्रेकमनाअपिसमरः॥८८॥ कविर्मृशि
से[illegible]केतणामान्निषःप्रमुंक्ते॥पर्यंकीति॥हरिःस्पृतिमात्रमेवरजिनपुंजभंजनः॥वोयुष्मान्पातुरक्षतु॥कृ
प्रणाशित्वात्पापनेनरक्षणव्यसनतामाह॥किंलक्षणः॥कायव्यूहंशरीरसमूहंआचरन्निवकुर्वन्निवउपचिती
भूतःहर्षिमार्सः॥तत्रहेतुः॥पादांभोरुहेचरणसरोजेधारयितुंशीलंयस्यास्तांवारिधिसुतांलक्ष्मीमक्ष्णांशता
नेनैत्राणांसहस्रैर्दिदृक्षुर्द्रष्टुमिच्छुः॥कथंतथाभवेत्तत्रत्याह॥पर्यंकीकृतःशय्याकृतोयोनागनायकःशे
षस्तस्यफणाश्रेणीनांपंक्तीनांयेमणयस्तेषांगणेसमूहेसंक्रांतप्रतिबिंबसंवलनयासंवद्धःप्रतिकृतिप्रसरणे
पर्यंकीकृतनागनायकफणाश्रेणीमणीनांगणेसंक्रांतप्रतिबिंबसंवलनयाबिभ्रद्विभुप्रक्रियां॥पादांभोरु
हधारिवारिधिसुतामक्ष्णांदिदृक्षुःशतैःकायव्यूहमिवाचरन्नुपचितीभूतोहरिःपातुवः॥८९॥ ॥छ॥ ॥
तविभुप्रक्रियांविस्तारप्रकारंबिभ्रत्दधत्प्रतिबिंबनिवपिकमणीनामनंततयादेहानामनंतत्वदेहानाम
नंततयानादृशानत्वलानोन्हदित्यर्थः॥अथवा॥श्रीराधायाविरहदुःखहंताहरिःश्रीकृष्णःवःश्रोतृवक्तॄन्पातु
श्रवणकीर्तनविघ्नेभ्योरक्षतु॥कीदृशोहरिःपादांभोरुहधारिचरणेनोरुहौश्रीराधायाःपादकमलौधारितौ
येनतादृशश्चासौवारिधिःसमुद्रस्तादृशोगंभीरोहृषतानुसत्सुतांश्रीराधांअक्ष्णांशतैःचक्षुवाकुल्यैरिवदामा
मेवनेत्राण्यंदिदृक्षुःअत्यादरेणअवलोकितवानित्यर्थः॥पुनःकीदृशः॥श्रीराधायाःसन्मुखत्वेनतस्याःका

येषु तिविंवितवान् अतः कायव्यूहमिवाचरन् उपचितीभूतः श्रीराधां वक्तृरूपेण आराधितवानिव नातीतित
स्याः सो नाप्यातिवनातीतितस्याः सोनप्यातिरेकोदर्शितः पुनः कीदृशः पर्यंकीकृतः हरिश्चासमंता द्राविनपाद
१३५ लांछनेनचंक्रीकृतयारूपादिएव्यतयापावनीकृतः नागनायकश्च कृतः कालीनागः तस्य फणाश्रेणीफ
णामंडलपंक्तिषु येमणयः तत्र मूरत्नातां गणाः समूहास्तस्मिन्संक्रांतप्रतिविंवसंवलनया तस्मिन्संक्रांतानि
संक्रमितानि प्रकाशितानि प्रतिविंवानि तेषां संवलनया नृत्यविशेषजनया विनुप्रक्रियां नाना नृत्यरचनां
विस्तरदधारश्च नेन नृत्यचातुर्येण यिनाप्यिकारंजननायकगुणाः दर्शिताः ॥ समुद्रेयथानानारत्नानि आवि
त्वामप्राप्यमयिस्वयंवरपरां क्षीरोदतीरोदरे शंके सुंदरि कालकूटमपिवन्मूढो मृडानीपतिः ॥ इत्थं पूर्वक
थाभिरन्यमनसो विक्षिप्य वक्षोंचलं राधायाः स्तनकोपरिमिलन्नेत्रो हरिः पातु वः ॥९०॥ नवितितथाच १३५
पन्नानीः तगवद्धर्मप्रकाशकस्य गोपश्रेष्ठस्य गृहे आविर्भूता प्रेमलक्षणा तक्तिरेव रत्नमिति वारिधिपदोपा
दानं ॥९१॥ अन्यत्र त्वामित्यादि ॥ हरिः श्रीकृष्णो वः पातु किंलक्षणः ॥ हे सुंदरि मूढो मृडानीपतिः रुद्रः क्षीरोद
तीरे क्षीरसमुद्रतटमध्ये मयि स्वयंवरपरां मदेकपतिकां त्वामप्राप्य लब्धा कालकूटं हालाहलं अपिवत्
पी॰ वानित्यहं शंकेतर्कयामि ॥ इत्थमनेन प्रकारेण पूर्वकथिताभिः पूर्वकथनैरन्यमनसोऽन्यमनस्कायारा
धायावक्षोंचलं स्तनावरकं विक्षिप्यापसार्य स्तनो कोरका विव तत्र परिमिलन्नेत्रः स्तनो द्रव तेकोरकोपमा सौ
दर्यादिनाच ॥ अनेन पार्वत्याः सकाशादपि सौंदर्याधिक्यं ध्वनितं ॥ ९०॥ ॥
माध्वीत्यादि ॥ इहलोके विघ्नरूप भवतः यावत् शृंगारसारस्वतं भावं करिता न वसि जयदेवस्य वचांसि यच्छंति दास्यं
॰ ॰नाद तहे माध्वीक मधुरा हमिति न वतः तव चिंता स्वाधीना भवति ॥ अपि च शार्करित्वं कर्करासि कदाचित्फ
॰॰ कदाचित्तत्फल मिच्छतस्त्वमपि विरसो भवतीति भावः ॥ हे द्राक्षे त्वां केद्रक्ष्यंति अवलोकयिष्यंति हे अमृत
म॰॰ममसि देवैः पीयमानात् ॥ हे क्षीरनीरं रसमसि मा कंद कंद ॥ हे महापक सहकार विफलत्वं कंद वैकल्यं प्राप्नु
पुहि श्रीराधामोहनयोः शृंगारः परस्पररताख्यः सारस्वतं भावं संभोगरसवर्णनिस्वरस्वबीजं भावं वा श्रीगीतगो
माध्वीमाध्वीक चिंता न भवति न वतः शार्करे कर्करासि द्राक्षे द्रक्ष्यंति के त्वाममृतमृतमसि क्षीरनीरं रस
सि ॥ माकंद कंद कांताधर धरणितलं गच्छ यच्छंति यावत् भावं शृंगारसारस्वतमिह जयदेवस्य विष्वग्वचां
सि ॥९१॥ श्रीभोजदेव प्रभवस्य रामादेवीसुत श्रीजयदेवकस्य ॥ पराशरादिप्रियवंधुकंठे श्रीगीतगोविं
दकवित्वमस्तु ॥९२॥ ॥इति श्रीकि॰ दुवि॰ल्वीयकविराजश्रीजयदेवकृतगीतगोविंदाख्यः प्रबंधः समाप्त.
विंदाख्य सरस्वती सारभूतः भावं अभिप्रायं श्रीराधारमणयोः प्रेमामृतं कांताधरतवर्णितिरिति नास्ति त्वं धर
णितलं गच्छ श्रीजयदेववाणि तिमधुरा ख्यानगवद्रसास्वादनिवृत्ता जनानन्दे कनिष्ठाः संतः एतेषां तिरस्कारं क
रिष्यतीति भावः ॥९२॥ इति श्रीगीतगोविंदे सुप्रीतपीतांवरो नाम द्वादशः सर्गः ॥१२॥ ॥श्री॥

गी॰टी॰र॰ श्रीराधां संप्राप्य सुप्रीतः श्रीकृष्णः तद्दर्शनप्रीत्या गीतेन वश्यं यस्य तादृशो हरिर्विशिनोति यत्र तत्तथा [illegible]
विस्तारप्रकारः परिच्छेदो वाऽयं ग्रंथसमाप्तिकर इत्यर्थः ॥ अथवा श्रीराधयाऽस्वमंडनेनियुक्त लिलानितायेन श्री
१७८ नवानित्यर्थः ॥ प्रफुल्लनगवज्जनेरसकदंबकल्लोलिनी प्रफुल्लयतु मोदनेनजनताचसंवर्द्धनाममस्तु
पुरुषा तु रीतिलितगीतगोविंदतः प्रसरत्सरसदीपिकामधुरपुंजमंजूषिका ॥ २ ॥ गीतगोविंदत इति षष्ठ्यं
तं पदं ॥ सार्वविभक्तिकत्वमित्यभिधानात् ॥ श्रीमद्वृंदावनेश्वरीप्रियकृत चरणपंकेरुहमकरंदास्वादन
परहृदरीकसंनायणमधानंदादोलचपलहृदयेन श्रीमद्भगवदासेन नगवज्जनपरितोषाय विरचिते
यं रसकदंबकल्लोलिनी श्रीमद्रसवदिनिर्नगवल्लियैरानंदसंदोहसंदीपनपरमोज्वलरसावगाहिमन
सो हर्षं संविचार्यताम् ॥ ॥ इति श्रीगीतगोविंदस्य रसकदंबकल्लोलिनी टीकेयं समाप्ता ॥ ॥ श्री ॥ ॥
श्रीमा [illegible] प्रभवाब्दे [illegible] लिखापितमिदं पुस्तकं श्रीराधावल्लभार्पितमस्तु जडियोपाभिधघनश्यामस्य

247